केशवचैतन्य ज. कुंटे ....
२३/८/०८

• प्रकाशकः
देवभाषाप्रकाशनम्
दारागंज-प्रयागः

• प्रथमसंस्करणम्
संवत् — २०३१ वि०
सन् — १९७४ ई०
मूल्यम् — दशमुद्राः

• देववाणी-मुद्रणालयः
दारागंज-प्रयागः

RĀMAGĪTAGOVINDAM

[RĀGAKĀVYAM]

•

By

KAVI JAYADEVA

[With Commentary of Hanuman Tripathi]

•

Edited by

PRABHĀT ŚASTRI

Published By :

DEVABHASHA PRAKASHANAM

Daraganj, Allahabad-6

FIRST EDITION

1974

Price Rs. Ten Only

Printed At

DEVAVANI MUDRANALAYA

ALLAHABAD-6

माननीयश्रीहेमवतीनन्दनबहुगुणाकरकमलयोः
सादरम्

जयदेवाऽऽननकाननविकासिलतिकाऽऽवलोकन्दम् ।
सुरवाणीकरपल्लवमुखरितवीणारसस्यन्दम् ॥
एतत्प्रभातदत्तं विन्दतु नयनाऽम्बुजाऽऽनन्दम् ।
हेमवतीनन्दन! तव काव्यं श्रीरामगीतगोविन्दम् ॥

प्रभातशास्त्री

भूमिका

•

महाकविकालिदासकृत'मेघदूतस्य' पीयूषवर्षिकविकोकिलजयदेवविहित 'गीत-गोविन्दस्य' चाध्ययनानुशीलनाभ्यां संस्कृतस्य सर्वेऽपि भावुकाः कवयः प्रभाविता अभवन्। ताभ्याञ्च सर्वे त उत्प्रेरणामपि जगृहुः। परिणामतोऽत्यधिकसंख्यायां संस्कृतभाषायां दूतकाव्यानां, रागकाव्यानाञ्च रचना समभूत्। तेषु धोयीमहाकवेः 'पवनदूतेन' प्रसिद्धालङ्कारिकरसमञ्जरीप्रणेतुर्भानुदत्तस्य 'गीतगौरीपति' काव्येन च संस्कृतसमाजो विशेषरूपेण परिचित एवास्ते। शेषाभिः कृतिभिर्नहीव परिचितोऽस्ति। अस्य कारणमेतदास्ते–यद्गीतकाव्यानां, दूतकाव्यानाञ्च परम्परायां लिखिता अधिकांशाः कृतयोऽद्यावध्यप्रकाशिताः सन्ति तथा याः प्रकाशिताश्चापि वर्तन्ते तासामध्ययनं प्रति सहृदयः सुधीसमाजोऽत्युदासीनतां भजते।

प्रस्तुता कृती 'रामगीतगोविन्दम्' जयदेवकृतगीतगोविन्दकाव्यस्य परम्परायां लिखितं संस्कृतस्य सरसं रागकाव्यमास्ते। अस्य लेखकस्याऽभिधानं जयदेव एवास्ति। [१] संस्कृते जयदेवनामानोऽनेके ग्रन्थकाराः समभूवन्। प्रसिद्धः शर्मण्यदेशीयो विद्वान्-आफ्रेक्टनामा स्वकीये 'कैटलोगस-कैटलोगरम्' इत्याख्ये

१—१—जयदेवदीक्षितः–नृसिंहपुत्रः, बलभद्रशुक्लस्य संरक्षकः, २—जयदेवपण्डितः—भगीरथमेघगुरुः, ३—जयदेवः— दार्शनिकरुचिदत्तपुत्रः, ४—जयदेववागीशः—कविचन्द्रपुत्रः, विष्णुरामपिता, ५—जयदेवः—अलङ्कारशतकरचयिता, ६—जयदेवः-त्रिलोचनदासद्वारोद्धृतः, ७—जयदेवः–गंगाष्टपदीकाव्य–कर्ता, ८—जयदेवः—नेमिना, जनार्दनेन चोद्धृतः ९—जयदेवः—पक्षधरोपनामकः, हरिमिश्रशिष्यो भ्रातृजश्च, १०—जयदेवकविः—त्रिपुरसुन्दरीस्तोत्रप्रणेता, ११—जयदेवः–प्रश्ननिधेर्लेखकः, १२–जयदेवः-रसामृतरचयिता, १३–जयदेवः-नृसिंहपुत्रः १४—जयदेवः—भोजदेवस्य तथा रामादेव्याः पुत्रः, गीतगोविन्दप्रणेता, १५—जयदेवः—महादेवस्य, सुमित्रायाश्च पुत्रः, चन्द्रालोकस्य तथा प्रसन्नराघवस्य कर्ता, १६—जयदेवपण्डितः—कवेरुत्कलनरेशास्याभयी—अलङ्कारशेखरस्यैकस्मिश्छन्दसि चर्चितः। पृष्ठम्। १९९ तथा २००। प्रथमो भागः।

ग्रन्थसूचीपुस्तके जयदेवाभिधानानां षोडशग्रन्थकाराणां चर्चां विहितवानाऽऽस्ते। प्रस्तुतां कृतिं आफ्रेक्टमहाशयो गीतगोविन्दलेखकस्य रचनारूपां प्रश्नवाचकेन चिह्नेन सहोल्लिलेख। अनेन कारणेन प्रस्तुतं रागकाव्यममीषु षोडशग्रन्थकारेष्वन्यतमस्यैव कस्यचिद्वर्तते? विषयेऽस्मिन् विचारविमर्शकरणं नाम नाप्रासंगिकं स्यात्। रचयिताऽसौ काव्यस्य षष्ठे सर्गे [1] स्वनिवासस्थानस्य चर्चामकरोद्येन प्रतीयते यदयं मिथिलाया निवासी आसीत् तथा च तत्रत्येन समस्तराजमण्डलेन संमानितः। स्वकीयाया अस्याः कृतेर्निर्माणकालस्य तथा राज्ञो नाम्न उल्लेखमन्ये संस्कृतलेखका इवायमपि नो चकार। अनेन लेखकस्य जन्मस्थानं मिथिलाऽऽस्ते—एतत्तु निर्विवादं सिद्ध्यति परन्तु कृतेर्निर्माणकालस्तथा तस्यैव साहाय्येन कृतिकारस्य जन्मकालः केवलमनुमानप्रमाणाधारं निश्चेतव्यौ भवेताम्।

लेखकोऽसौ काव्यस्यास्य प्रथमसर्गेऽध्यात्मरामायणस्य, काकभुशुण्डिरामायणस्य हनुमन्नाटकस्य च चर्चां कृतवानास्ते।[2] तेनैतत् सिद्ध्यति यदियं रचना चतुर्दशशताब्द्याः पूर्वकालीना कथमपि न भवितुमर्हति। यतो भारतीया विद्वांसोऽध्यात्मरामायणस्य रचनाकालं १४०० ईसवीयवर्षतः १६०० ईसवीयवर्षमध्ये मन्यन्ते।[3]

१—श्रीमद्विदेहनृपदेशविशेषवासो,
निःशेषभूमिपतिमण्डलमाननीयः।
एतच्चकार वरगानरसप्रधानं,
काव्यं कविप्रकरमौलिविभूषणं सत्॥
—रामगीतगोविन्दम्। सर्गः ६। श्लोकः ४।

२—वाल्मीकिनाऽऽद्यकविना शतकोटिसंख्यं,
रामायणं विरचितं शशिमौलिना च।
काकेन वायुतनयेन तथाऽपरेण,
किञ्चित्करोति जयदेवकविश्चरित्रम्॥
—रामगीतगोविन्दम्। सर्गः १। श्लोकः ३।

३—पण्डितज्वालाप्रसादमिश्रोऽध्यात्मरामायणमुपपुराणं तथा तुलनात्मिकया दृष्ट्या नवीनां रचनामकथयत्।—डा. भाण्डारकरो महाराष्ट्रियमहात्मन एकनाथस्य साक्ष्ये तामिमां रचनामाधुनिकीं प्रोक्तवान् स चेमां रचनां १४००—१६००शतकयोर्मध्यवर्तिनीं मेने। [डा. बदरीनारायणश्रीवास्तवलिखितम्—रामानन्दसम्प्रदायस्तथा हिन्दीसाहित्ये तत्प्रभावः। पृष्ठम् १४३। पी. सी. बागचीः इण्ट्रोडक्शन अध्यात्मरामायणस्य। कलकत्ता १९३५।]

एतेन निर्विवादं सिद्ध्यति यदसौ कृतिः—द्वादश्यां शताब्द्यां समुत्पन्नस्य[1] बंगीयनृपतेर्लक्ष्मणसेनस्य सभाकवेः 'गीतगोविन्दस्य' प्रणेतुर्जयदेवस्य नहि भवितुमर्हतीति। शर्मण्यविदुष आफ्रेक्टमहोदयस्य केवलं नामसाम्येन गीतगोविन्दकारः जयदेवस्यैषा कृतिरस्तीति भ्रमो जातो भवेन्नाम।

मिथिलावादी किलैको भारतीयो विद्वान् प्रसन्नराघवस्य तथा चन्द्रालोकलेखकस्य जयदेवस्यैव रचनां 'गीतगोविन्दं' चापि मन्यते[2] प्रसन्नराघवस्य प्रणेता मिथिलाप्रदेशवासी समभूदथवा विदर्भनिवासी, विषयेऽस्मिन् विदुषाम्मतैक्यं नास्ति। अन्ये विद्वांसः प्रसिद्धस्य नैयायिकस्य पक्षधरमिश्रस्यान्यदभिधानं जयदेव इति मत्वा तमेव हि प्रसन्नराघवस्य रचयितारं मन्यन्ते तथा चन्द्रालोकस्य लेखकमन्यं जयदेवं स्वीकुर्वन्ति[3]। डा. कीथः प्रसन्नराघवकारं जयदेवं विदर्भदेशस्य कुण्डिनपुरस्य निवासिनं मन्यते[4] यस्याधारः कदाचित् प्रसन्नराघवस्यैवच्छन्दोऽस्ति[5]। अस्यां स्थितौ ममेदं

१—बेवरकृतभारतीयसाहित्यस्य इतिहासः। पृष्ठम् २१०। सन् १९१४ ईसवीये वर्षे प्रकाशितः।

२—समालोचकैः सर्वथोपेक्षितोऽयं महाकविः। चन्द्रालोकरामगीतगोविन्दप्रसन्नराघवेतिग्रन्थत्रयं विरच्य निःशेषभूमिपतिमण्डलमाननीयो बभूव इत्येव मन्मतम्।

[आरातः प्रकाशिते संस्कृतपत्रे मागधे चतुर्थाङ्के आचार्यकमलाकान्तोपाध्यायस्य 'गीतपरम्परायां रामगीतगोविन्दम्' इति शीर्षको लेखः।]

३—चत्वारः श्रीजयदेवाः—मुकुटव्याख्यातच्छन्दःशास्त्रपुस्तकप्रणेता अभिनवगुप्तपादैः स्मृतः एकः। पीयूषवर्षोपाधिकः चन्द्रालोककर्ता द्वितीयः। बंगवासी-प्रसिद्धगीतगोविन्दगायकस्तृतीयः। प्रसन्नराघवनाटकप्रणेता चिन्तामण्यालोकदर्शनग्रन्थकर्ता च सोदपुरीये दिगौनवंशाम्बुनिधिशीतभानुर्मिथिलावासी पक्षधरमिश्रापरनामा चतुर्थः। [श्रीरामचन्द्रमिश्रलिखितप्रसन्नराघवभूमिकातः।]

४—डा० कीथस्य 'संस्कृतनाटकम्'। पृष्ठम्। २५७ तथा २५८। [डा० उदयभानुसिंहस्य हिन्दी अनुवादः।]

५—कवीन्द्रः कौण्डिन्यः स तव जयदेवः श्रवणयो-
रयासीदातिथ्यं न किमिह महादेवतनयः॥
—प्रसन्नराघवनाटकम्। अङ्कः १। १४ श्लोकः।

दृढं मतं भवति यद्धि प्रस्तुता कृतिः—'रामगीतगोविन्दम्' नाटककारस्य जयदेवस्य न भूत्वा सर्वेभ्योऽपि भिन्नस्य मिथिलाप्रदेशवासिनः कस्यचिदन्यस्य रामभक्तस्य जयदेवस्यास्तीति । शैलीदृष्ट्यापि चानुशीलने कृते तदिदं प्रतीयते यन्नाटककारो जयदेवोऽस्याः कृतेर्लेखको भवितुं न शक्नोति । प्रसन्नराघवनाटके गद्यस्य पद्यस्य च भाषा, पदावली चात्यन्तमलंकृता तथा यत्र तत्राडम्बरपूर्णाऽपि चाऽऽस्ते । अतो विपरीतं प्रस्तुतायां कृतौ गीतानां छन्दसामुभयेषामपि भाषा सर्वथा सरला सरसा सुबोधा चास्ते ।

इदानीं 'रामगीतगोविन्दस्य' रचनाकालस्य प्रश्नोऽवशिष्यते । कवेरस्य जन्मस्थानं मिथिलाऽऽसीदेतत् काव्यस्यास्य षष्ठसर्गस्य चतुर्थश्लोकेन स्पष्टं भवति तथा तेनैव ज्ञायते यद्धि कवेरस्य सामाजिकी स्थितिरादरणीया बभूव । कविरयं तत्कालीनमिथिलाप्रदेशराजानां राजपरिषदि सम्मानितोऽभूत् । काव्यस्यास्यानुशीलनेनाध्ययनेन च तस्य रचनाकालस्य विषये वयं न कामपि प्रामाणिकीं सामग्रीमुपलभामहे । अस्यां स्थितौ संस्कृतस्यान्येषां कवीनामिवास्य कृतिकारस्य सम्बन्धेऽपि चानुमानाश्रयग्रहणं श्रेयस्करम् । प्रस्तुता कृतिर्जयदेवस्य गीतगोविन्दस्य परम्परायां लिखिताऽऽस्ते, तथाप्यत्र तत्रं वाथवा कालिदासस्य कुमारसम्भव इव मर्यादाविहीनस्य शृंगाररसस्य प्रयोगो नास्ति संजातः । कविरसौ काव्येऽस्मिन्न क्वाऽपि जयदेवस्य राधाया इव मातुः सीतायाः सौन्दर्यं व्यावर्णितवान् । तस्मादेव मयास्य कवेरभिधानेन सह प्राग् 'रामभक्त' इति विशेषणं प्रयुक्तमास्ते । समग्रस्य काव्यस्य पठनादनन्तरमस्य कवेर्हृदयं रामं प्रति पवित्रश्रद्धामूलया भक्त्या चौतप्रोतं प्रतीयते ।

नवम्यां शताब्द्यामुत्पन्नः संस्कृतस्य कविः कुमारदासः कालिदासस्य कुमारसम्भवेन प्रभावितो भूत्वा स्वकीये 'जानकीहरण' महाकाव्ये[1] मर्यादापुरुषोत्तमस्य

1 —त्वं नितम्बमपवाहितांशुकं कामिनी रहसि पश्यति प्रिये ।
प्रार्थनामपि विनैव पल्लवस्निग्धरागमधुरं स्वयं ददौ ॥
सा मदेन मदनेन लज्जया साध्वसेन च विमिश्रचेष्टिता ।
आययौ सपदि तादृशीं दशां या न वक्तुमपि शक्यविभ्रमा ॥
— जानकीहरणम् । सर्गः ८ । श्लोकौ १७-१८ ।

रामचन्द्रस्य तथा मातुः सीतायाः सम्बद्धं सम्भोगशृङ्गारवर्णनं विहितवान् । अतः पूर्वं संस्कृतस्य केनापि कविना कृतं रामसीताविषयकं सम्भोगशृङ्गारपरकं वर्णनं नैव प्राप्यते । पञ्चदशशताब्द्याः पश्चात् केचन रामभक्ताः खलु रामचरिते रासलीलायाः परिकल्पनां चक्रुः । अस्य कारणं जनसमाजे श्रीकृष्णरासलीलाया लोकप्रियत्वमेव वक्तुं शक्यते । हनुमत्संहितालोमशसंहिताभुशुण्डिरामायणरामतत्त्वप्रकाशप्रभृतिग्रन्थानां रचनाया उद्देश्यमपि कदाचिद्रामसीतयो रासलीलाया ऐतिहासिकताप्रमाणीकरणं भवेन्नाम[1] । त एते ग्रन्था जनसमाजे समादरं लभेरन् इत्यनेन कारणेनैतेषां रचयितारः स्वाभिधानस्योल्लेखं न कृत्वा, तानिमान् मुनिऋषिप्रणीतान्निर्दिदिशुः । अमीषां साम्प्रदायिकानां लेखकानां कृपायाः फलं, यद्वाल्मीकेर्धनुर्धारी रामो मर्यादापुरुषोत्तमः सरयूनद्यास्तीरे तथा च तस्याः पारे

१—अखण्डरासमण्डले सखीसमूहकल्पिते,
रराज राजनन्दनो विमोहयन् जगत्त्रयम् ।
प्रकामकामकामुको मनोजमन्त्रभाविताम्,
रणन् सुवल्लकीं भृशं सुधा सुधारया तदा ॥
क्वचित्क्वचिद्वनान्तरे क्वचित्क्वचिल्लतान्तरे,
क्वचित्क्वचित्कुचान्तरे प्रविश्य राजनन्दनः ।
प्रदीपयन् मनोभवं प्रदर्शयन् स्वलाघवम्,
कलाकुतूहलं मुहुः प्रकामकामशास्त्रजम् ॥
—लोमशसंहिता २/१८७–१८९ संस्कृतगीतिकाव्यस्य विकासः । ३१५ पृष्ठतः–उद्धृतम् ।

एकान्ते सरयूतीरे कल्पपादपकानने ।
श्रीमान् नटवरवपुः कोटिकन्दर्पसुन्दरः ॥
रासलीलां पुनश्चक्रे ताभिस्त्रिस्तरगो विभुः ॥
—मधुराचार्यकृतरामतत्त्वप्रकाशः ।
भुशुण्डिरामायणस्य प्रस्तावना ४९ पृष्ठतः–उद्धृतम् ।

स्थिते कामिकावने, वनवाससमये च चित्रकूटे रासलीलापरायणः श्रृङ्गारी समभूत्। कोदण्डधरो रामो मयूरपक्षधारी, मधुरमुरलीवादकश्च बभूव।[१]

संस्कृतसाहित्ये भगवतो रामस्यैवंविधस्य श्रृंगारिस्वरूपस्य चित्रणपरम्परायां पूर्णतः पल्लवितायां जातायां सत्यामपि तदानीन्तने समये समुत्पन्नो महाकविस्तुलसीदासस्तेषामेतेषां कवीनाममर्यादितेन श्रृङ्गाररससिक्तवर्णनेन प्रभावितो न बभूव। रामचरितमानसे रामस्य स्वरूपं लोकरक्षकस्य, अन्यायमनीतिं प्रति सङ्घर्षकर्तु र्जगन्नियन्तुश्चाऽऽस्ते। रामस्य श्रृङ्गारिस्वरूपवर्णनपरम्परया प्रभाविते साहित्यिकवातावरणसमये समुत्पन्नोऽपि प्रस्तुतायाः कृतेः 'रामगीतगोविन्दम्' इत्यस्य लेखकः श्रीजयदेवः तादृशवातावरणेन सर्वथाऽस्पृष्टोऽस्ति। अतो वयमेतत्कथनमसंगतं नावगच्छामो यदस्मिँल्लेखके महाकवितुलसीदासरचितस्य रामचरितमानसस्य प्रभावः समधिकं पपात। एतदेव हि कारणं यद् 'रामगीतगोविन्दे' क्वापि च जगज्जनन्याः सीतायाः सौन्दर्यवर्णनं श्रृंगाररसेनौतप्रोतं नोपलभ्यते। मानसकार इवैव 'रामगीतगोविन्दस्य' प्रणेताऽपि—इति लेखनमुचितममंस्त[२]:—

वाल्मीकिनाऽऽद्यकविना शतकोटिसंख्यं
रामायणं विरचितं शशिमौलिना च।
काकेन वायुतनयेन तथाऽपरेण,
किञ्चित् करोति जयदेवकविश्चरित्रम्॥

१—प्रसूनबाणाङ्कितमिक्षुचापं, चक्राब्जपाशांकुशवंशनालम्।
करैर्दधानं घननीलवर्णं, श्रीकृष्णरूपं प्रणमामि रामम्॥
विहाय कोदण्डमिमं मुहूर्तं, गृहाण पाणौ मणिचारुवेणुम्।
मायूरबर्हञ्च निजोत्तमाङ्गे, सीतापते! राघव! रामचन्द्र!!
तत्रैव रामकर्णामृतात् भुशुण्डिरामायणस्य प्रस्तावनायामुद्धृतम्।

२—नानापुराणनिगमागमसंमतं यद्-
रामायणे निगदितं क्वचिदन्यतोऽपि।
स्वान्तःसुखाय तुलसी रघुनाथगाथा-
भाषानिबन्धमतिमञ्जुलमातनोति॥
—रामचरितमानसम्। बालकाण्डम्। श्लोकः ७।

तथा केषुचित् स्थलेषु रामचरितमानसेनास्याः कृतेः साम्यमपि वर्तते—

एकदा रघुपतिर्महागिरौ सीतया सह शिलातलेऽमले।
निद्रितोऽभवदुदारविक्रमः, शक्रसूनुरगमत् खगाकृतिः॥
विददार पदाङ्गुष्ठमैन्द्रिः काकपरीक्षया।
ईषिकास्त्रेण रामोऽक्षि काणं चक्रे दुरात्मना[१]॥
सर्गः ४। श्लोकौ २, ३।

तत्कालीनान्ये रामचरितगायका इव रामसीतयोः श्रृंगारिवर्णनस्याननुकरणात् तथोद्धृतानां पङ्क्तीनां रामचरितमानसस्य पङ्क्तिभिः साम्यदर्शनादिदं वक्तुं शक्यते यत् स एष लेखकस्तुलसीदासात् परवर्तिनि कस्मिंश्चित् समये जातः स्यादिति। तुलसीदासो रामचरितमानसस्य प्रारम्भं वैक्रमीये संवत् १६३१ तमे वर्षे, तदनुसारम् १५७४ ईसवीयवर्षे कृतवान्[२]। तुलसीदासस्य प्रादुर्भावोऽनेन कारणेन षोडशशताब्दयाः पूर्वभागो मन्यते। अतः प्रस्तुतायाः कृते रचनाकालः १७ तमशताब्द्याः पूर्वार्धोऽर्थात् १६२५ तमवर्षतः १६५० तमवर्षमध्ये कस्मिंश्चिदपि समये स्वीकर्तुं शक्यते।

१—सीतहिं पहिराये प्रभु सादर।
बैठे फटिक शिलापर सुंदर॥
....
सीताचरन चोंच हति भागा।
मूढ मन्द मति कारन कागा॥
—रामचरितमानसम् ३ + १

२—संवत् सोरह सै एकतीसा।
करौं कथा हरिपद धरि सीसा।
नौमी भौमवार मधुमासा।
अवधपुरीं यह चरित प्रकासा॥
—रामचरितमानसम्। १ : ३४।

अस्य रामगीतगोविन्दस्यैका हस्तलिखिता पाण्डुलिपिस्तच्चर्चा चावधप्रदेशपण्डितपरिवारस्य सूचीपत्रे विद्यते ।[१] तस्य लेखनकालः १८३४ ई० वर्तते । सेयं पाण्डुलिपिः सूचीनिर्माणसमये रायबरेलीमण्डलस्य पण्डितदेवीदयालस्य सविधे आसीत् । प्राचीनकाले कस्याऽपि ग्रन्थस्य प्रचारे प्रसारे तथा च विद्वत्समाजे समादरप्राप्तौ षष्टिसप्ततिप्रायाणि वर्षाण्यवश्यं व्यतियन्ति स्म । कारणं, तस्मिन् समये-आधुनिककाल इव यातायातयोः सुविधा तथा मुद्रणयन्त्रणानि नासन्, काप्यन्या पाण्डुलिपिरेवंविधा नोपालभ्यत, यस्यां लेखनकालस्योल्लेखो भवेन्नाम । यदि चास्याः कृतेर्निर्माणं सप्तदशशत्याः पूर्वमभविष्यत्तर्हि तत्कालीना पाण्डुलिपिरवश्यमेव हि प्राप्ताऽभविष्यत् । अस्यां स्थितौ यावत् सप्तदशशत्याः पूर्वतनी कापि च पाण्डुलिपिर्नोपलभ्यते, तावद्वयमस्या रचनायाः कालं सप्तदशशतेर्द्वितीयं चरणं स्वीकर्तुमर्हामः ।

अतःकेषांचिद्विदुषां मते स्वयं तुलसीदास एव 'रामगीतगोविन्देन' प्रभावित आसीत् स च 'रामगीतगोविन्द' मनुचकारेति अखण्डनीयानां प्रमाणानामभावे मतस्यास्य खण्डनमपि न सम्भवति । तुलसीदासे 'रामगीतगोविन्दस्य' प्रभाव आसीदथवा जयदेवे 'रामचरितमानसस्य' इत्ययं निर्णयः कठिनः प्रतिभाति । अयं हि भविष्यत्काले शोधकर्तॄणां प्रतिभया प्रकाशमानेष्यते । इदमेव मतं रामकथालेखकस्य विदुषः फादर कामिलबुल्के महोदयस्याऽपि वर्तते । यदि च वयं 'रामगीतगोविन्दस्य' 'रामचरितमानसे' प्रभावं स्वीकुर्महि तदा जयदेवस्य जन्मकालं पञ्चदशशताब्द्यास्तृतीचरणं तथा 'रामगीतगोविन्दस्य' रचनाकालं षोडशशताब्द्याः पूर्वचरणं मन्तुं शक्येमहि ।

प्रस्तुतायाः कृतेर्लेखकविषये तथा अस्या रचनाकालसम्बन्धे विचारकरणानन्तरं टीकाकारस्य श्रीहनुमतस्त्रिपाठिनः सम्बन्धेऽपि विचारकरणं नाप्रासंगिकं स्यात् ।

टीकाकारः टीकासमाप्तौ स्वविषयिणीमेकस्मिन्पद्ये चर्चामकरोत्[२] । तया प्रतीयते, यदसौ वत्सगोत्रीयस्त्रिपाठी वभूव । मैथिलेषु ब्राह्मणेषु त्रिपाठिनो न प्राप्यन्ते

१—अवधप्रदेशपण्डितपरिवारस्य हस्तलिखितपुस्तकसूचीपत्रम् । भागः १३ ।
२—एतच्छ्रीमद्रामगीतगोविन्दार्थविवर्णनम् ।
हनुमानकरोच्छ्रीमत्त्रिपाठी वत्सवंशजः ॥
—रामगीतगोविन्दम् । पृष्ठम् । १०५ ।

तथा सरयूपारीणेषु त्रिपाठिनस्तु सन्ति परं तेषां वत्सगोत्रं न भवति । अतष्टीकालेखको न मैथिलो न च सरयूपारीणो ब्राह्मणः । कारणेनानेन स उत्तरप्रदेशस्य पूर्वभागस्यापि निवासी नासीत् । टीकाकारः स्वटीकायां पाणिनेः सूत्राणामुद्धरणं न प्रददौ । प्रमाणे स सारस्वत-व्याकरणस्य सूत्राण्युद्धृतवान् । तस्य गोत्रमपि च वत्सगोत्रं वर्तते । अनेन प्रतीयते यत् सोऽयं कान्यकुब्जब्राह्मणो भवेन्नाम । यतोऽवधप्रदेशस्य, कान्यकुब्जेषु ब्राह्मणेषु वत्सगोत्रीयास्त्रिपाठिनोह्युपलभ्यन्ते, तेषु च सारस्वतव्याकरणस्याध्ययनस्य परम्पराप्यस्ति । टीकाकारस्य विषये इतोऽधिकं खल्वाधिकारिकरूपेण किमपि कथनं कठिनमाऽऽस्ते । टीकाया अध्ययनेनानुशीलनेन च तदिदं निश्चितरूपेण वक्तुं शक्यते यदसौ टीकाकारः स्वविषयस्याधिकारी विद्वानासीदिति ।

प्रस्तुता कृतिर्गीतकाव्यं विद्यते, यत्कृते शास्त्रीयः पारिभाषिकः शब्दो 'रागकाव्यम्' इति समीचीनोऽस्ति । गीतकाव्यस्य भारतीये साहित्यशास्त्रे का स्थितिः संतस्थे, विषयेऽस्मिन् विस्तृतं विवेचनमहं गीतगिरीशस्य भूमिकायां कृतवानस्मि ।[१] अथाभिनवगुप्तस्य भरतनाट्यशास्त्रटीकायाः प्रतीयते यद् 'राघवविजयम्' तथा 'मारीचवधम्' इति नामके द्वे काव्येऽपि चास्ताम् । प्रथमं ठक्करागे तथापरं ककुभग्रामरागे गीयमानमभिनीयमानं चाभूत् ।[२] जयदेवस्य गीतगोविन्दम् तस्यामेव परम्परायां लिखितं रागकाव्यमाऽऽस्ते । अस्यां स्थितौ पाश्चात्यविदुषामियं मान्यता यत्पूर्ववर्तिन्यामपभ्रंशभाषायां लिखितात् कस्माच्चित् काव्यात् प्रेरणां प्राप्य जयदेवो गीतगोविन्दमलेखीत् संगता वक्तुं न पार्यते । खेदस्यायं विषयो यदधुना राघवविजयम् तथा च मारीचवधम् रागकाव्ये

१—दृश्यताम्—गीतगिरीशस्य भूमिका । पृष्ठम् । ८ ।
२—अथोच्यते राघवविजयादिरामविजयादिरागकाव्यादिप्रयोगो नाट्यमेवाभिनययोगात् ।
—अभिनवभारती । अध्यायः ४ । पृष्ठम् । १७२ ।
तथाहि राघवविजयस्य ठक्करागेणैव विचित्रवर्णनीयत्वेन निर्वाहः । मारीचवधस्य ककुभग्रामरागेणैव, अत एव रागकाव्यानि उच्यन्ते एतानि । तत्रैव ।
—पृष्ठम् । १८२ ।

नोपलभ्येतेऽन्यथा विवादस्यास्य सर्वथा निराकरणं जातं भवेत् । वास्तविकी स्थितिः सैषास्ते यदद्यावधि संस्कृतस्य स्वरताललयभाषाबद्धस्य रागकाव्यस्य सत्यं मूल्याङ्कनं समालोचकैः कर्तुं न पारितम् । जयदेवस्य प्रत्येकस्य गीतस्य कृते काव्ये क्वचित् प्रबन्धस्य क्वचिच्चाष्टपद्याः प्रयोगोऽभूत् ।[१] आचार्य आनन्दवर्धनः प्रबन्धशब्दस्य प्रयोगं प्रबन्धकाव्यार्थं कृतवानाऽऽस्ते ।[२] भोजस्तु जयदेवेन गीतार्थे प्रयुक्तस्य प्रबन्धशब्दस्याधारं स्वीकृत्य एकां परिभाषामेव व्यरचयत्, सा च श्रृंगाररसप्रधाना स्वरताललयबद्धा रचनैव प्रबन्धो भवतीति ।[३] गीतगोविन्दस्य संजीवनीटीकाकारः श्रीवनमालीभट्टश्चापि प्रबन्धशब्दस्य व्याख्यामेवं कृतवान् ।[४] गीतगोविन्दस्य काव्यस्य कस्यां विधायां परिगणनं चिन्तनञ्च स्यात् नन्वेतदपि चाद्य यावत् सर्वथाऽनिर्णीतमास्ते । द्वादशसर्गेषु लिखितत्वात् केचन विद्वांसस्तदिदं महाकाव्यं स्वीकृतवन्तः । केचिदस्मन्मताद्विरुद्धाश्चापि सन्ति । डा० आर्येन्द्रशर्माणस्तदिदं महाकाव्यं स्वीकृतवन्तः ।[५]

१—अष्टपद्याः प्रयोगार्थं दृश्यताम्—लालभाई दलपतभाई, भारतीय-संस्कृत-संस्कृतविद्यामन्दिर—अहमदाबादतः प्रकाशितं 'गीतगोविन्दम्' तथा प्रबन्धशब्दस्य प्रयोगार्थं संस्कृतसाहित्यपरिषद्, उस्मानियाविश्वविद्यालयहैदराबादतः प्रकाशितं 'गीतगोविन्दम्' ।

२—प्रबन्धे मुक्तके वापि रसादीन् बद्धुमिच्छता ।
यत्नः कार्यः सुमतिना परिहारे विरोधिनाम् ॥
ध्वन्यालोकः । उद्योतस्तृतीयः ।

३—श्रृङ्गारैकप्रधानो यो गीततालादिसंयुतः ।
अभिसारार्थनिपुणः प्रबन्धः सम्प्रकीर्तितः ॥
संस्कृतसाहित्यपरिषद् उस्मानियाविश्वविद्यालयहैदराबादतः प्रकाशितायां गीतगोविन्दस्य संजीवनीटीकायां भोजस्य नाम्नोद्धृतम् । पृष्ठम् । ७ ।

४—प्रकर्षेण बन्धोऽन्योन्यासक्तिरूपो नायिकानायकयोर्यत्र स प्रबन्धः । तत्रैव पृष्ठम् । ८ ।

५—दृश्यताम्—संस्कृतसाहित्यपरिषद्, उस्मानियाविश्वविद्यालय हैदराबादतः प्रकाशितं गीतगोविन्दम् ।

वस्तुतो 'गीतगोविन्दम्' श्रव्यकाव्यविधाया कस्याश्चिदपि कोटेरन्तर्गतं न भवति । तदेतद् गेयनाट्यं वर्तते । काव्यभेदान्तर्गताया गेयनाट्यस्य चर्चाया अभावात् परम्परावादिनो भारतीया विद्वांसस्तदिदं मतं खण्डयन्ति, परन्तु परम्पराया एवाधारस्वीकरणमुचितं वक्तुं न शक्यते । प्रसिद्धो जैनविद्वान् हेमचन्द्राचार्योऽस्मभ्यं नव्यां दिशं प्रददौ । स हि काव्यानुशासनस्याष्टमेऽध्याये प्रबन्धात्मके काव्ये दृश्यकाव्यस्य द्वौ भेदौ पाठ्यं तथा गेयं च मेने[१] । स खलु गेयमपि चानेकेषु भेदेषु व्यभजत्[२] हेमचन्द्राचार्योऽन्ये साहित्यशास्त्रिण इव नाटकस्य कृते दृश्यशब्दस्य स्थाने प्रेक्ष्यशब्दस्य प्रयोगं कृतवान् । नाटकस्य तदिदं वर्गीकरणं हेमचन्द्राचार्यैः कदाचिद्-अभिनवगुप्तद्वारा अभिनवभारत्यां प्रोक्तेन रागकाव्येन प्रेरितः सन् कृतवान् । स हि किलास्य पुष्ट्यर्थं काव्यानुशासनस्य स्वरचितायां टीकायामलङ्कारचूडामणावभिनवभारत्याः शब्दावलिं साधारणेन परिवर्तनेन सहोद्धृतवान्[३] । अभिनवभारत्या उल्लेखो नास्ति । अस्तु—अस्यां दशायां गीतगोविन्दस्य गेयनाट्यस्वीकरणन्नास्त्येवासंगतम् । तदधुना प्रकृतमनुसरामः ।

पूर्वपृष्ठेषु तदिदं लिखितचरं यद्, 'रामगीतगोविन्दम्' जयदेवस्य गीतगोविन्दपरम्परायां लिखितं काव्यमस्ति । लेखकोऽस्या रचनायाः प्रयोजनं प्रारम्भे उद्घोषितवान्—

यदि रामपदाम्बुजे रतिर्यदि वा काव्यकलासु कौतुकम् ।
पठनीयमिदं तदौजसा रुचिरं श्रीजयदेवनिर्मितम् ॥

१—प्रेक्ष्यं पाठ्यं गेयं च । महावीरजैनविद्यालयमोहमयीतः प्रकाशितं काव्यानुशासनम् । पृष्ठम् । ४३२ ।

२—गेयं डोम्बिकाभाणप्रस्थानशिंगकभाणिकाप्रेरणरामाक्रीडहल्लीसरासकगोष्ठीश्रीगदितरागकाव्यादि । काव्यानुशासनम् । पृष्ठम् । ४४५ ।

३—तथापि गीताश्रयत्वेन वाद्यादेः प्रयोग इति गेयमिति निर्दिष्टम् । रागकाव्येषु च गीतेनैव निर्वाहः । तथाहि राघवविजयस्य विचित्रवर्णनीयत्वेऽपि ढक्करागेणैव निर्वाहः, मारीचवधस्य तु ककुभरागेणैवेति ।
—काव्यानुशासनस्य—अलङ्कारचूडामणिटीका । पृष्ठम् । ४४७ ।

एवमेव गीतगोविन्दकारोऽपि स्वकाव्यस्य प्रारम्भेऽलेखीत्--

यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम् ।
मधुरकोमलकान्तपदावलीं शृणु तदा जयदेवसरस्वतीम् ॥

द्वयोरपि ग्रन्थकारयोः प्रणयनप्रयोजन एकरूपतायां सत्यामपि चोद्देश्ये भिन्ने स्तः । पीयूषवर्षिणो जयदेवस्य 'गीतगोविन्दम्' विलासिजनानां मनोरञ्जनार्थं तथा च रामगीतगोविन्दस्य लेखनं काव्यकलाप्रणयिनां कृते बभूव । तस्मादेव गीतगोविन्दे यत्र 'विलासकलासु कुतूहलम्' लिखितं तत्रैव रामगीतगोविन्दे जयदेवः 'काव्यकलासु कुतूहलम्' इति लेखनमुचितं मेने । गीतगोविन्दकारस्य जयदेवस्य 'विलासकलासु कुतूहलम्' इति लेखनस्यार्थश्चोद्देश्यं च विभिन्नानां टीकाकाराणां व्याख्याभिः स्पष्टं भवति । सञ्जीवनीकारो वनमाली भट्टः[1], पदद्योतनिकाया लेखको नारायण पण्डितो[2], जयन्तीटीकायाः कर्ता कृष्णो,[3] रसिकप्रियाया रचयिता कुम्भनृपतिः,[4] रसमञ्जरीटीकाप्रणेता प्रसिद्धनैयायिको महामहोपाध्यायः शङ्करमिश्रश्चेति[5] सर्वेऽपि पदस्यास्य व्याख्यां स्वस्वप्रकारेण विदधिरे । तथापि त एते सर्वेऽपि टीकाकारा विषये किलैकस्मिन् येन केन प्रकारेणैकमता भवन्ति यत् कामशास्त्रोक्तासु विभिन्नासु कलासु पारंगतानां प्रणयिजनानां पठनार्थं गीतगोविन्दस्य रचना व्यधीयतेति । पदद्योतनिकाटीकाया लेखको—नारायणपण्डितस्तथा च रसिकप्रियायाः कर्ता कुम्भनृपतिस्तु 'विलासकलासु कुतूहलम्' इत्यस्य स्थाने 'विलासिकलासु कुतूहलम्' इति पाठं स्वीकृत्य स्वव्याख्यां व्याचख्यौ । एतेन तु

१—विलासः स्त्रीणां प्रतितिथिकेशाद्यधोऽङ्गस्पर्शश्चरणोर्ध्वं च रतिकोशोक्तस्तस्य कलासु चतुष्षष्टिक्रीडासु कुतूहलम् कौतुकम् । संजीवनी । पृष्ठम् । ११ ।

२—विलासकलाः चतुष्षष्टिः, तासु कुतूहलमस्तीति । पदद्योतनिका । १२ ।

३—विलासाः शृंगारचेष्टाः तद्वन्तो विलासिनः तेषां कलासु कुतूहलं कुतुकयुक्तं यदि भवति । जयन्ती । पृष्ठम् । १२ ।

४—विलासिनां शृंगारिणां कलास्तासु । गीतगोविन्दस्य रसिकप्रिया टीका । पृष्ठम् । ८ ।

५—विलासः स्त्रीणां हावविशेषस्तत्सम्बन्धिनीषु कलासु कुतूहलं कौतुकम् । गीतगोविन्दस्य रसमञ्जरीटीका । पृष्ठम् । ८ ।

सर्वथा स्पष्टमास्ते यज्जयदेवो हरिस्मरणेन साकं विलासिजनानां प्रसादनञ्चापि स्वकाव्यस्योद्देश्यं तथा च तान् स्वकीयगीतगोविन्दस्य पठने श्रवणे चाधिकारिणो मेने । अतो विपरीतं रामगीतगोविन्दस्य लेखकः 'काव्यकलासु कौतुकम्' लिखित्वा[1] काव्यसम्बन्धिनीनां कलानामध्ययनं प्रति येषां मनोऽभिलाषो भवेत्त एव हि जना मर्यादापुरुषोत्तमरामस्य पराक्रमेण, शौर्येण च पूर्णस्यास्य सुन्दरकाव्यस्य पठनेऽधिकारिणः सन्तीति स्वीचकार । अनेन सुस्पष्टं वर्तते यत् काव्यकलाप्रणयिनां कृत एव हि काव्यरचनायाः प्रयोजनं स स्वीकृतवान् । काव्यस्य टीकाकारेण श्रीहनुमत्त्रिपाठिना 'काव्यकलासु कौतुकम्' इत्यस्य व्याख्यायां 'विव्वोकहावादिषु कौतुकं स्यात्' इति यल्लिखतं तन्नहि संगतं प्रतीयते। सैषा व्याख्या ग्रन्थकारस्य भावनाभ्यो विपरीतास्ते । विव्वोको हावश्च पारिभाषिकशब्दौ स्तः । कामिनीनां भावनाविशेषस्याभिव्यक्तेर्हेतोः शब्दयोरनयोः प्रयोगः साहित्य-शास्त्रस्य पण्डितैः क्रियमाणोऽस्ति । प्रस्तुतकाव्यलेखकस्य मुख्योद्देशो गीतगोविन्दस्येव केलिपरस्य कामिनीनां हावभावप्रकाशकस्य च वातावरणस्याङ्कनं नास्ते । इदं समग्रं काव्यं मर्यादापुरुषोत्तमरामं प्रति पाठकानां मनसि भक्तेः, श्रद्धायास्तथा च तस्य गरिममण्डितमोजस्विकार्यकलापं प्रति समादरभावनाया उत्पादनायालिख्यत । कविरसौ–'तदौजसा रुचिरम्' विलिख्य स्वस्य तदिदं मन्तव्यमुद्घोषितवान् । स्पष्टमास्ते यदिदं काव्यमोजोगुणस्याभिव्यक्तिकारकमस्ति । अन्यानि गीतकाव्यानीवास्यापि शृंगाररसप्रधानं काव्यमिति कथनं नामाज्ञतायाः परिचायकं स्यात् । तदिदं वीररसस्य काव्यं विद्यते । एतदेव कवेरभीष्टम् । इण्डिया-आफिसलंदनस्य पुस्तकालये रामगीतगोविन्दस्यैका हस्तलिखिता प्रतिर्वर्तते । तस्यां काव्यस्यान्तिमश्लोकस्य तृतीयपादे 'गानरसप्रधानम्' इत्यस्य-

१—काव्यसम्बन्धिन्यः कलाः काव्यकलाः—तासु काव्यकलासु । मध्यमपदलोपी समासः ।

—अभिधानकोषः, छन्दोज्ञानम्, कियाकल्पः,

—कामसूत्रम् । अधिकरणम् १ । अध्यायः ३ ।

स्थाने 'वीररसप्रधानम्' इति पाठः प्राप्यते[1] । पाठेनानेन साकं काव्यस्यारम्भे कवेर्मन्तव्यस्य 'ओजसा रुचिरम्' इत्यस्य पूर्णा संगतिरपि जायते । वीररसस्य काव्य एवौजसोऽभिव्यक्तिः सम्भवति । अतः इण्डिया-आफिसलंदनपुस्तकालयस्य प्रतेः पाठः सर्वथा समीचीनोऽस्ति ।

प्रस्तुतायां कृतौ षट्सर्गा विद्यन्ते । समग्रं हि काव्यं मर्यादापुरुषोत्तमस्य रामस्योजस्विचरितेनौतप्रोतं विद्यते । कविः काव्यस्य प्रारम्भं मंगलाचरणेन कृतवान् । तदनन्तरमादिकविं वाल्मीकिं स्मृत्वा प्रवाहमय्या सरलया च भाषया भगवतो रामस्य दशावतारवर्णनं कविः 'जय जय राम हरे' इति मधुरलयेन गीतेनैकेन चकार । गीतेनानेन पाठकानां समक्षं भगवतो रामस्य दशावताराणां दिव्यं स्वरूपं मूर्तिमद् बोभूयते । गीतस्यास्यैकस्मिन्नंशेऽनीतिकारिणः शासकान् प्रत्याक्रोशस्याभिव्यक्तिं कुरुते—

यवनविदारण ! दारुण ! हयवाहन ! ए !
धृतकरवाल ! कराल ! जय जय राम हरे !

अत्र भगवतः कृते यवनविदारणहयवाहनधृतकरवाल-इत्येतैः सम्बोधनैः प्रतीयते यत् तत्कालीनैरत्याचारिभिः शासकैः प्रपीडितानां जनतानां रक्षार्थं कविः करवालधारिणः पौरुषपूर्णरूपस्य धारणाय रामं प्रति प्रार्थनां विदधाति। इत्थमोजस्विन्यां शैल्यां दशावताराणां वर्णनानन्तरं कविर्महता कौशलेनैकस्मिन् श्लोके समस्तस्य रामायणस्य कथानकं साङ्केतिक्यां शैल्यामुपस्थितं कृतवानास्ते ।

भूभारभञ्जन ! भवाब्धिवरिष्ठपोत !
मां पाहि कान्त ! करुणाकर ! दीनबन्धो !!
श्रीरामचन्द्र ! रघुपुङ्गव ! रावणारे !
राजाऽधिराज ! रघुनन्दन ! राघवेश !!

—सर्गः १ । श्लोकः ५ ।

१—श्रीमद्विदेहनृपदेशकृताधिवासो, निःशेषभूमिपतिमण्डलमाननीयः ।
एतच्चकार वरवीररसप्रधानं काव्यं कविप्रकरमौलिविभूषणं सत् ।।
इण्डियाआफिसपुस्तकालयलन्दनस्य सूचीपत्रम् ।
—भागः ७ । पृष्ठम् । १४८० ।

अनेन श्लोकेन कविर्बालकाण्डादारभ्योत्तरकाण्डपर्यन्तस्य समग्रामपि कथामत्यन्तसंक्षेपे कलात्मकेन प्रकारेण वर्णितवान् । टीकाकारोऽस्य श्लोकस्य वैदुष्यपूर्णायां स्वव्याख्यायामस्य प्रतिपादनं चकार । श्लोकेऽस्मिन् सम्बोधनात्मकशब्दस्याधारेण रामायणस्य सम्पूर्णायाः कथाया अवतारणां जयदेव इव प्रतिभाशाली कविरेव कर्तुं क्षमः । ततोऽग्रे कविः स्वस्या मिथिलापुर्याश्चापि मनोज्ञवर्णनं न व्यस्मार्षीत् । तत्रत्यानां लता-वापी-कूप-तटाकादीनां मनोहारिणः स्वरूपस्य चित्रण-प्रसंगे मिथिलाकर्मनिष्ठानां, सुशीलानां, बुद्धिजीविनां च पण्डितानां नगरी वर्तते, इत्यस्य पाठकानां समक्षं चर्चाकरणं चापि कविः समीचीनं मेने—

जयति विदेहनगरमनुरूपम् ।
दिशि दिशि राजमानचामीकर-
रचितविविधमणियूपम् ! ध्रुवपदम्
रुचिरलतातरुसुमनवाटिकावापीकूपतडागम् ।
वप्रवलयपरिखावृतमभिनवचित्रमुदयदनुरागम् ।।
शेषभयङ्करवेशनृपतिदुर्धर्षमहेशपिनाकम् ।
मणिमयसौधसमूहमुदग्रमरुच्चलविशदपताकम् ।।
तोरणनिकरकिरणसंचारविनिन्दितसुरपतिचापम् ।
आहुतिगन्धसहितमखधूमविधूतसकलजनपापम् ।।
गजरथतुरगपदातिविघट्टविशृङ्खलशब्दमुदारम् ।
शारदविधुसंकाशविकाशकनककलशाश्रिततारम् ।।
पण्डितसुमतिसुशीलसुधर्मसुकर्ममनुजपरिवारम् ।
प्रतिपदपद्मनिहितनिजचित्तचतुरसुन्दरपुरदारम् ।।
सुखदवितानमनेकतपोधनभूषितमतिशयशोभम् ।
पङ्कजयोनिविनिर्मितमिव कृतसन्ततमानसलोभम् ।।
श्रीजयदेवकवेरुदितं मिथिलापुरगीतमशोकम् ।
मङ्गलमोदभरेण करोतु सदा मुदितं जनलोकम् ।।

सर्गः २ । पृष्ठानि ३३-३४-३५-३६ ।

काव्यप्रतिभाधनस्य कवेः स्थानविशेषस्य पात्रस्य वा स्वरूपचित्रणं नितान्तं

सहजं प्रतिभाति । अथ भगवतः शङ्करस्य धनुर्भङ्गः संजातः । तदनयाऽनया स्वेष्टदेवस्य धनुर्भङ्गाद् रुष्टस्य शरचापं तथा तीव्रतरधारं, भयङ्करकुठारं धारयतः क्रोधावेशेऽधरोष्ठं खण्डयतश्च परशुरामस्य रौद्ररूपचित्रणं, कविरयं स्वस्य ज्यौतिषशास्त्रस्य पाण्डित्यसूचकानामुपमानां माध्यमेन प्रस्तुतं कृतवान्—

भृकुटीकुटिलमरुणवदनं रदखण्डितरदपरिधानम् ।
दधतमिव द्युमणिं शशिनं सकुजं ससितं कृतमानम् ॥
रुचिरजटामुकुटद्युतिपुञ्जविभासिमनोहरभालम् ।
पाणिसरोजनिहितशरचापकुठारमतीव करालम् ॥

सर्गः २ । पृष्ठम् । ३९ ।

अथैकस्मिन् गीते कविरसौ प्रयागस्याऽपि मनोहारि वर्णनं कृतवान् । अस्मिन् प्रसंगे त्रिवेण्यास्तटे समुद्धूयमानानां विविधवर्णानां पताकानामपि चित्रणं विद्यते । इत्थं प्रतीयते यदयं कविः स्नानार्थं प्रयागमागतोऽभूत् । एतदेव हि कारणं यत्साम्प्रतिकानामिव तत्कालीनानां गङ्गापुत्राणमपि चित्रविचित्रा विविधवर्णाः पताका दोधूयमाना आसन्, इत्यस्य दृश्यस्य चित्रमिवोपतिष्ठते । गीतस्यैकोंऽशो दृश्यताम्—

पश्य पश्य रघुवीर ! ! प्रयागम् ।
मज्जदखिलमुनिगणमतिरागम् ।
....
नीलपीतसितचित्रपताकम् ।
सुखसमूहशिथिलीकृतनाकम् ॥

सर्गः ३ । पृष्ठम् । ६६ ।

अनेनैव प्रकारेण कविरयं चित्रकूटस्याऽपि वर्णनमत्यन्तमनोयोगेन चकार । समस्ते काव्ये चित्रकूटस्यैतद्वर्णनं सहजतयैव हृदयमाकर्षति । यदि वयमिदं वर्णनं सर्वोत्कृष्टं वदेम, तदा नात्युक्तिर्भवेत् । एतावत् सुन्दरं वर्णनं तु कविरेष स्वजन्मभूमेर्मिथिलायाश्चापि नो चक्रे । उल्लेखनीयं तथ्यं विद्यते यदसौ कविरस्मिन्नेव गीते महाकविरिति विशेषणमपि प्रयुयोज । पठनसमये नैसर्गिकं दृश्यमुपस्थितं भवति—

चित्रकूटमवलोकय सीते !
उन्नतशिखरलिखितघनमण्डलमङ्गलकरणविनीते ! ध्रुवपदम्
मन्दाकिनीप्रवाहविलङ्घनचञ्चलपक्ष्मरालम् ।
विकसितकुन्दलवङ्गलतालवलीसरसीरुहमालम् ॥

चम्पकभूर्जकदम्बतमालमुनिद्रुमभूषितभागम् ।
वैरिविहीनमतङ्गजसिंहमयूरमहाविषनागम् ॥
... ...
गवयशरभहरिणीहरिणादनकपिकुलविपुलविहारम् ।
इन्धनदलफलकुसुमदर्भजलहेतुकमुनिसंचारम् ॥
श्रीजयदेवमहाकविनिर्मितमद्भुतभूधरगीतम् ।
हरतु मलं सकलं पठतामनिशं प्रकरोतु विनीतम् ॥

सर्गः ४ । पृष्ठानि ७०,७१, ७२, ७३ ।

इदं समस्तं काव्यमेवैतादृशैर्गीतैः परिपूर्णं वर्तते । समासपूर्णपदावलेः प्रयोगे जाते सति पाठकानां पदे पदे पठनसमये माधुर्यस्यानुभूतिर्भवति । अर्थबोधार्थं क्वाऽपि च बुद्धेर्व्यायामस्यावश्यकता न भवति । केषांचिद् गीतानां तु पठनसमये पाठका भावविमुग्धा भवन्त्येव ।

कविरयं कांश्चन नूतनतमशब्दान्नपि प्रयुयोज । तेषु 'नवीणा' शब्दोऽतीव महत्त्वपूर्णोऽस्ति[१] । संस्कृतकवयस्तमिमं शब्दं न प्रयुयुजिरे । टीकाकारोऽपि चास्य शब्दस्य सिद्धिं निपातेनमेने । गीतिकाव्ये शब्दप्रयोगस्य दृष्ट्या संस्कृतस्य कविगणा व्याकरणस्य नियमान् सदैव तिरस्कृतवन्तः । नवीणा शब्दस्येव संस्कृते 'नवल' शब्दस्यापि प्रयोगो न प्राप्यते तथा च गमनार्थसूचकस्य 'गमण' स्यापि प्रयोगो नास्ते । 'नवल[२]' तथा च 'गमण[३]' इत्यनयोःशब्दयोः प्रयोगं षोडश्यां शताब्द्यां रचितस्य 'कृष्णगीते' र्लेखकः कविसोमनाथः किलैकस्मिन् श्लोके तथा गीतस्य ध्रुवपदे कृतवानास्ते[४] । 'नवल' शब्दस्य प्रयोगं तु

१—**गायति सामखिलामृषिराजिरखण्डितवीणा ।**
नृत्यति देववधूरुचिरायुतभावभरेण नवीणा ॥
—दृश्यताम्—गीतस्यास्य टीकाऽपि । पृष्ठम् । १०३ ।

२—**श्रीराधिकानवलकेलिवशीकृतस्य,**
कृष्णांह्रिपद्ममकरन्दलिहां नराणाम् ।
आनन्दनाय कुरुते द्विजसोमनाथः ॥
--कृष्णगीतिः । श्लोक : ४ ।

३—**राजति राधा नवलवशे ।**
—पृष्ठम् । १८ । तत्रैव ।

४—**अतिरुचिरुचिकरलम्भितनीवीदर्शनघर्षितरमणे ।**
मन्थरचरणविहारविनिर्जितमदवारणगमणे ॥ पृष्ठम् २० । तत्रैव ।

२

संस्कृतस्यैक आधुनिकः कविरपि स्वकाव्ये कृतवानस्ति[1]। अद्यत्वे खल्वेवं-विधानां शब्दानां प्रयोगस्य प्रचलनं जातमास्ते। नवलशब्दस्य विषये केषांचिज्जनानां, मतमास्ते यत् सोऽयं शब्दः णउल्लशब्दस्य संस्कृतरूपं विद्यत इति। अस्यां दशायां 'गमण' शब्दस्य सम्बन्धे वक्तुं शक्यते यदस्मिन् शब्दे प्राकृतभाषायाः प्रभावोऽस्तीति। कारणं प्राकृतभाषायां[2] 'न–स्थाने' णकारो भवति। वास्तविकी स्थितिः सेयमास्ते यद्धि रागकाव्यस्य (गीतकाव्यस्य) प्राणो रागो भवति। तस्य कृतेऽन्त्यानुप्रास आवश्यकोऽस्ति। अस्याभावे माधुर्यस्य, चमत्कारस्य चाभिव्यक्तिर्न तत्र भवति। अर्थाद् गीतकाव्येऽन्त्यानुप्रासोऽनिवार्योऽस्ति। अस्यैवानुप्रासस्य मोहात् कविगणा एवंविधमपाणिनीयं प्रयोगं विधाय 'अनुप्रासस्य लोभेन भूपः कूपे निपातितः' इति तामिमां प्राचीनां सूक्तिं चरितार्थयन्तो दरीदृश्यन्ते। छन्दःशास्त्रस्य पण्डिताः प्रोचुः 'अपि माषं मषं कुर्याच्छन्दोभंगं न कारयेत्।' गीतेऽन्त्यानुप्रासस्याभावः प्रकारान्तरेण छन्दोभंग एव मन्तव्यः स्यात्। परन्तु श्लोके अपाणिनीयशब्दप्रयोगोऽक्षम्यो भवति। देशीयशब्दानां प्रयोगं तद्रूप एवोत्तरकालीनाः संस्कृतकवयः कृतवन्तो यथा—'मरहट्ट' 'गरीबनिवाज'[3] इत्यादि। अत्र अणुमात्रमपि परिवर्तनं शब्दे नास्ति। एतेनाऽपि पठनेन पाठकस्य मनो नो-

---

१—नवलहीरकहारिमुरारिदृक्,
चपलखञ्जनचारुविहारभूः।
स्तनयुगं तव भामिनि! भासुरं,
प्रभवताद् भवतापनिवारणे॥
—श्रीरामनारायणदत्तशास्त्रिपाण्डेय-
कृतहरिवल्लभास्तोत्रम्। पृष्ठम्। ३९।

२—नोणः सर्वत्र। वररुचेः प्राकृतप्रकाशः। पृष्ठम्। १६।
[कावेलस्य संस्करणम् १९६२]

३—नान्ध्रीपयोधरमिवातितरां निगूढः,
नो गुर्जरीस्तनमिवातितरां प्रकाशः।
अर्थो गिरामपिहितः पिहितश्च कश्चित्,
सौभाग्यमेति मरहट्टवधूकुचाभः॥
—काव्यप्रकाशस्य प्रदीपटीकाकारेण गोविन्दठक्कुरेणोद्धृतः।
सकलगुणपरीक्षणैकसीमा, नरपतिमण्डलवन्दनीयधामा।
जगति जयति गीयमाननामा, गरीबनिवाजनवाबखाना॥
—रुद्रकविकृतनवाबखानाचरितम्।

द्विजते संस्कृतभाषाया ग्रहणशीलताया एव प्रभावः। अनेनैव प्रकारेण गीतस्य ध्रुवपदे 'स्मृत्य विभुं वातसुतम्'[1] प्रस्तुतकाव्यलेखको लिलेख। व्याकरणस्य नियमानुसारं 'संस्मृत्य' भवितुमर्हति। शब्दस्यास्य विषये टीकाकारः स्वाभिमतं नालेखीत्। संस्कृतविश्वविद्यालय-वाराणस्याः सरस्वतीभवनपुस्तकालये स्थितस्य 'रामगीतगोविन्दस्य' एकस्यां खण्डितायां प्रतौ 'स्मृत्वा विभुं वायुसुतम्' पाठ उपलभ्यते। वस्तुतोऽयमेव पाठः शुद्धोऽस्ति। टीकाकारः 'स्मृत्य' इति मत्वा टीकामकार्षीत्। अत एव मया तदनुकूलः पाठः प्रादीयत।

पाण्डित्यप्रदर्शनार्थं कविर्यत्रतत्राप्रचलितायाः शब्दावलेश्चापि प्रयोगं कृतवान्। 'अतसीपुष्पस्य स्थाने 'क्षुमापुष्पं'[2] दशरथस्य कुम्भकर्णस्य च कृते क्रमशः पंक्तिरथस्तथा[3] घटश्रुतिः[4] इति शब्दौ प्रयुक्तौ स्तः। टीकाकारः श्लोके किलैकस्मिन्—

निदध्वनुर्दुन्दुमयः समन्ताज्जगुश्च गन्धर्वगणाः प्रवीणाः।
वनं सपुष्पं सरिदम्बुपूर्णाऽस्यराधरित्री विमलं नभश्च॥
सर्गः १। पृष्ठम्। १६।

प्रयुक्तं 'अस्यरा' शब्दमत्यन्तक्लिष्टकल्पनामूलाया व्युत्पत्तेः साहाय्येन साधयितुं प्रयेते। मन्मतेऽत्र लिपिकारः शीघ्रतावशात् स्थिरायाः स्थाने स्यरामलेखीत्। टीकाकारस्तत् 'स्यरां' बुबोध। नैतदेव वरंच पूर्णायाः स्यरायाश्च मध्ये खण्डाकारस्याऽस्तित्वं मत्वा 'अस्यरा' पाठमेव चकल्पे। तथा च तमेव हि वैयाकरणिक्या व्युत्पत्त्याः साहाय्येन शुद्धं पाठं साधयितुं हठधर्मितापूर्णं प्रयत्नं[5]

१—प्रस्तुतकाव्यम्—पृष्ठम्। ८०।

२—क्षुमापुष्पश्यामो विकचविशदाम्भोजनयनः,
प्रवालौष्ठौ विभ्रद्रुचिरतरकोदण्डभिदुरः॥
पृषत्कान् पाणिभ्यामतिविमलमुक्ताफलरदो,
महावीरो धीरो मनसि रघुवीरो निवसताम्॥
पृष्ठम्। २४।

३—तस्मिन् गते परशुराममुनावरण्यमानीय पंक्तिरथमात्मपुरोहितेन।
पूजां चकार महतीं विधिना विधिज्ञः, प्रपच्छ शारदशिवं जनकाधिराजः॥
सर्गः २। पृष्ठम्। ४८।

४—जघान हीमान् गिरिशृङ्गसन्निभान्, महाबलान् मुद्गरशस्त्रयोधिनः।
दशास्यमुग्रं घननादमुद्धटं, घटश्रुतिं चैव तथैव रामः॥
पृष्ठम्। ९३।

५—दृश्यताम्—प्रस्तुतश्लोकस्य टीका। पृष्ठम्। १७।



[वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनपुस्तकालये सुरक्षितहस्तलिखित-प्रतेः प्रतिकृतिः । अत्र काव्यार्थं 'महाकाव्य' शब्दस्य कविकृते च 'सकलकविकुल-चूडामणि' विशेषणस्य प्रयोगः पाठकैर्द्रष्टव्यः ।]

चक्रे । वस्तुतोऽत्र 'स्थिरा' इत्येव पाठः शुद्धोऽस्ति । पाठेनानेन श्लोकस्यार्थोऽपि च सरलतया संगच्छते ।

अपि 'रामगीतगोविन्दम्' महाकाव्यम् ? विषयेऽत्र संक्षेपतो विमर्शो नानुपयुक्तः स्यात् । सर्वास्वपि हस्तलिखितासु प्रतिषु तासां पुष्पिकासु महाकाव्यं लिखितमास्ते । इण्डिया-आफिस-पुस्तकालय-लन्दनस्य हस्तलिखितप्रतेः पुष्पिकायामपि[१] महाकाव्य-मुल्लिखितमस्ति । कारणेनानेन मया प्रस्तुतकाव्यस्य प्रतिसर्गान्ते महाकाव्यस्यापाकरणमुचितं न मतम् ।

द्वादशसर्गेषु निबद्धत्वाद् 'गीतगोविन्दम्' महाकाव्यं मन्तुं शक्यते । प्रस्तुतं काव्यं तु कथमपि महाकाव्यं भवितुं नार्हति । कविरसावात्मानं महाकविमुद्घोषितवान्[३] परन्तु पुष्पिकायां महाकाव्यशब्दस्य प्रयोगं कविरथवा तस्य श्रद्धालवो लिपिकाराः पश्चात् कृतवन्तः—अस्य निर्णयोऽत्यन्तकठिनोऽस्ति । एवमेवैकस्यां प्रतेः पुष्पिकायां 'सकलकविमुकुट' इति विशेषणं वर्तते तथा च इण्डिया-आफिसलंदनपुस्तकालयस्थायां प्रतौ मुकुटशब्दस्याग्रे मणिशब्दोऽपि प्राप्यते[२] ।

इण्डिया-आफिस-पुस्तकालयलन्दनस्य सूचीपत्रे प्रस्तुतस्य रागकाव्य-विषयकस्य विवरणेन प्रतीयते यत् सुदूरे-आन्ध्रप्रदेशेऽस्य रागकाव्यस्य प्रचार आसीत् । इण्डिया-आफिसस्थिता प्रतिस्तेलुगुलिप्या देवनागर्यां लिखितास्ते[२] । प्रस्तुतकाव्यस्य सम्पादनं टीकासहितामत्यन्तशुद्धां सुपाठ्यां चैकां हस्तलिखितां प्रतिं मुख्यमाधारं मत्वाऽक्रियत । पाठनिर्धारणे यत्र तत्र काठिन्ये जाते सति वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनपुस्तकालये सुरक्षिताभ्यः पूर्णाभ्यस्तथा चापूर्णाभ्यश्च प्रतिभ्यः साहाय्यं गृहीतमस्ति ।

अस्याः कृतेः सम्पादनप्रसंगे समये समये संस्कृतविश्वविद्यालय-वाराणस्याः-

१—दृश्यताम्—इण्डियाआफिसपुस्तकालयसूचीपत्रम् ।
पृष्ठम् । १४८० ।

२—एतत्कृतेऽपि दृश्यताम्—इण्डियाआफिसपुस्तकालयसूचीपत्रम् ।
पृष्ठम् । तदेव ।

३—श्रीजयदेवमहाकविनिर्मितमद्भुतभूधरगीतम् ।
हरतु मलं सकलं पठतामनिशं प्रकरोतु विनीतम् ॥
पृष्ठम् । ७३ ।

पुस्तकालयाध्यक्षात् पण्डितलक्ष्मीनारायणतिवारीमहोदयात्, श्रीतारिणीशझामहाभागात्, प्रयागविश्वविद्यालयसंस्कृतप्राध्यापकात् डा० सुरेशचन्द्रपाण्डेयात्, डा० शिवशङ्करत्रिपाठिनस्तथाऽन्येभ्यो यत् साहाय्यमुपलब्धं, तदमून् सर्वान् प्रति कृतज्ञतां वहामि। भूमिकायाः सुव्यवस्थितरूपापादने संस्कृतभाषायाः सुप्रसिद्धविदुषः श्रीगणेशरामशर्मणो मुख्यं साहाय्यमास्ते। एतदर्थमहं शर्मणोऽस्य कृतज्ञोऽस्मि।

प्रस्तुतं काव्यं कवेरेव शब्देषु तुलसीमालया[1] सुशोभितेभ्यो भगवतो रामस्य भक्तेभ्यः[2] साधुनिचयेभ्यो[3] मोदावहं तु स्यादेव साकमेव काव्यकलाप्रणयिनामपि कृतेऽमन्दानन्दसन्दोहजनकं स्यादिति मे द्रढीयान् विश्वासः।

सीतापतेर्भगवतो रामस्य कृपाया एव फलमिदमास्ते यत्तदिदं काव्यं कथमप्यहं प्रकाशयितुमपारयम्। अन्ते च कवेरेव पदानां स्मृत्या सह तामिमां भूमिकां समाप्तिं नयामि—

जय रामचन्द्र! कमलाविहार!
जय कोशलेश! करुणावतार!

गीताजयन्ती
प्रभातशास्त्री
२०३१ वै०

१—मन्दारमल्लीकुन्दतुलसीदामसंवलितम्।
श्रीवत्सचिह्नितवक्षसं स्वर्णोपवीतचितम्॥
—पृष्ठम्। ५३।

२—सुखयतु रामभक्तमतिमुदितम्। श्रीजयदेवकवेरिदमुदितम्।
—पृष्ठम्। ८६।

३—श्रीजयदेवविनिर्मितगानम्। सुखयतु साधुनिचयमनुमानम्॥
—पृष्ठम्। ८२।

रामगीतगोविन्दम्

अनुक्रमः

●

भूमिका		१–२२
प्रथमसर्गः	सानन्दरघुनन्दनः	१–२७
द्वितीयसर्गः	विजितपरशुरामः	२८–४९
तृतीयसर्गः	जगन्निवासः	५०–६९
चतुर्थसर्गः	लङ्काप्रवेशः	७०–८३
पञ्चमसर्गः	लङ्काविजयः	८४–९७
षष्ठसर्गः	रामाभिषेकः	९८–१०५
रामगीतगोविन्दस्य-पद्यानामकाराद्यनुक्रमणिका		१०६–१११
टीकायां निर्दिष्टानि ग्रन्थनामानि		११२
समागतवृत्त-लक्षणानि		११३–११४
टीकायां विशिष्टशब्दव्युत्पत्तिः		११५–११७
टीकोद्धृतसारस्वत—व्याकरण-सूत्रसूची		११८
जयदेव-विषयिणी-जनश्रुतिः		११९
समागतरागाणां लक्षणानि		१२०–१२४

●

। श्रीः ।

●

। श्री ग णे शा य न मः ।

●

। श्रीरामचन्द्राय नमः ।

●

अथाऽपवर्गादिसमस्तपुरुषार्थसाधनोत्कृष्टतरश्रीमद्रामचन्द्रगुणविवर्णने महति कर्मण्यन्तरायो मा भूयादिति हेतुना श्रीजयदेवः स्वेष्टदेवतानुध्यानरूपमङ्गलमाचरति—

गणाधीशं नमस्कृत्य नमस्कृत्याथ वै गुरून् ।
कुर्वे श्रीमद्रामगीतगोविन्दार्थविवर्णनम् ॥

●

श्यामं सहासवदनं सरसीरुहाक्षं,
केयूरकुण्डलकिरीटविराजमानम् ।
कामाभिराममुरुमौक्तिकदामदीप्तं,
पीताम्बरं किमपि धाम विचिन्तयामः ॥ १

●

वयं किमप्यनिर्वचनीयं धाम तेजः विचिन्तयामः विभावयामः । किम्भूतं तेजः—श्यामं श्यामवर्णम् । पुनः किम्भूतम्—सहासं वदनं यस्य तत् । पुनः किम्भूतम्—सरसीरुहाणीव अक्षीणि यस्य तत् । पुनः किम्भूतम्—केयूराश्च कुण्डलानि च किरीटानि च तैर्विराजमानं विशिष्टतया शोभमानम् । अत्र

विशब्दो ह्यानन्त्यसूचकः। 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्' इत्यादि-श्रुत्यनुरोधात्। पुनः किम्भूतम्—कामाभिरामं कामवदभिरामं कामाभिरामम्। यद्वा—कामेन यथेष्टाऽभिलाषेणाऽभिरमन्ते योगिनोऽस्मिन्निति कामाभिरामम्। अनेनैतद्धामोपासकेषु कालस्याप्यसामर्थ्यं सूचितम् तत्र यथेष्टाभिरमणत्वात्। पुनः किम्भूतम्—उरु महच्च तन्मौक्तिकं दाम माला तेन दीप्तं प्रकाशितम्। पुनः किम्भूतम्—पीताम्बरं पीतं पीतवर्णम् अम्बरं वासो यस्य तत् पीताम्बरम्, तडिदाभवसनमित्यर्थः। 'आश्रये तेजसि प्रोक्तं धाम धरणिकिरणयोः' इति विश्वः। १

अथैवं ध्यात्वाऽतिभक्तवत्सलतया स्वे हृद्युज्जिहानैतद्ग्रन्थप्रतिपाद्यदेवतां श्रीरामचन्द्रं प्रणमति—

संसारसागरतरीकृतनामधेयं,
ध्येयं समाधिरसिकैर्मुनिभिः सदैव।
दैवं विनाऽपि ददतं श्रियमानतेभ्यो,
वन्दे विभुं रघुपतिं करुणैकसीमम्। २

संसरणं संसारः अनवधित्वात्स एव सागरः तस्मिन् तरीकृतं तरीभूतं नाम एव नामधेयं राम इति द्व्यक्षरं नाम यस्येति संसारसागरतरीकृत-नामधेयम्। अनेन रामरामेति जप्त्वाऽविगणितशबर्यादिपापजीवाः संसारं गोष्पदी-कृत्याऽखण्डानन्दात्मकं परब्रह्मोपलभ्याद्यापि न निवर्तन्त इति सूचितम्। अत एव समाधौ चित्तैकाग्रतापूर्वकध्याने ये रसिकाः प्रवीणास्तैर्मुनिभिर्नारदादिभिर्ध्येयं ध्यानार्हम्। ननु तर्हि समाधिसामर्थ्यहेतुनाऽत एव कृतार्था इदानीन्तनास्तु तद्ध्या-नाऽशक्यत्वात्तद्विमुखा भवेयुरिति न सदैवेदानीं कलिकालेऽपि दैवं भाग्यं विनाऽपि आनतेभ्यः रामरामेति कृत्वा प्रणाममात्रमेव कुर्वद्भ्यः श्रियं ददतं स्वर्गापवर्गादि-फलप्रदातारम्। अनेनैतत्कालिकेषु तस्याऽतिदयावत्त्वं सूचितम्। तत एभिरवश्यमेव ध्येय इति भावः। अत एव करुणैकसीमं करुणा दया तस्या एका अव्यभिचारित्वे-

नाऽद्वितीया सीमा मर्यादा यस्मिंस्तम्। अनेनैवंविधोऽन्यो न कोऽपि दयावानासीन्न भविष्यतीति सूचितम्। अत एव विभुं सर्वातिवर्तिनम्। एतद्गुणविशिष्टं रघुपतिं रघुष्ववतीर्य सर्वं जगत्पातीति तं वन्दे प्रणमामि। 'सीमा घाटस्थिति-क्षेत्रेष्वण्डकोशेषु च स्त्रियाम्' इत्यमरः। २

एवं तावदिष्टदेवं प्रणम्याऽथ प्रतिपादनीयग्रन्थसम्प्रदायाविष्करणपूर्वकं कविः प्रतिजानीते—

वाल्मीकिनाऽऽद्यकविना शतकोटिसङ्ख्यं,
रामायणं विरचितं शशिमौलिना च।
काकेन वायुतनयेन तथाऽपरेण,
किञ्चित्करोति जयदेवकविश्चरित्रम्॥ ३

वल्मीकस्याऽपत्यं वाल्मीकिस्तेनैतद्विधेनाद्यकविना आदौ भवः आद्यः आद्यश्चासौ कविस्तेन यच्चरित्रं शतकोटिसङ्ख्यं यथा स्यात्तथा विरचितं विशिष्टतया वर्णितम्। तथा शशिमौलिना च काकेन च वायुतनयेन हनुमता च तथा अपरेणाऽन्येनापि कविना यद्विरचितं तदेव चरित्रं किञ्चित्संक्षिप्तं यथा स्यादेवं जयदेवकविःकरोति प्रीत्याभिवर्णयतीत्यर्थः। किम्भूतं चरित्रम्—रामायणम् रमन्ते क्रीडन्ति योगिनोऽस्मिन्निति रामोऽखण्डानन्दमयब्रह्म तस्यायो निश्चय इति रामायः तं नयति प्रापयतीति रामायणम्। यद्वा—रामस्य श्रीमद्रामचन्द्रस्याऽयनं रामायणम्। अनेनाद्यतनकाले श्रीमद्रामचन्द्रोऽनन्यरूपत्वेनात्रस्थ एवातस्सर्वं परित्यज्यैतदेव पठनीयं श्रवणीयं मननीयमिति भावः। उक्तञ्च—'त्वत्कथाऽमृत-पाथोधौ विहरन्तो महामुदः। कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमम्।' ३

अथेदानीं कविः स्वकीयग्रन्थप्रयोजनमाविष्करोति—

यदि रामपदाम्बुजे रतिर्यदि वा काव्यकलासु कौतुकम्।
पठनीयमिदं तदौजसा रुचिरं श्रीजयदेवनिर्मितम्॥ ४

यदि चेत् स्वकीयगुणोत्कर्षेण रामयत्याह्लादयतीति रामः। यद्वा रमन्ते योगिनोऽस्मिन्निति रामः तस्य पदाम्बुजं तस्मिन् रतिः स्यात्। यदि वा काव्य-कलासु उत्तममध्यमाधमच्छन्दोविचित्यलङ्कृतिविव्वोकहावादिषु कौतुकं स्यात्। 'कौतुकं चापि क्रीडायामुत्सवे च महत्यपि, इति कोशः। तदा इदम् एतदेव काव्यं पठनीयं पठनार्हमस्तीत्यन्वयः। पठनार्हत्वे सहेतुविशेषणद्वयमाह—किम्भूतमिदम्—ओजसा रुचिं राति गृह्णातीति रुचिरं रामतेजः पराक्रमेण काव्यभावनापरिपक्वबुद्धीनां प्रीतिदमित्यर्थः। पुनः किम्भूतम्—श्रीजयदेवेन निर्मितम्। यद्वा—श्रीश्च जयश्च ताभ्यां सहितश्चासौ देवः श्रीजयदेवो रामचन्द्रस्तत्प्रीतये निर्मितम्। अनेनैतस्यात्युत्तमकाव्यत्वमस्त्यतोऽवश्यमेतदेव-पठनार्हमस्तीति भावः। 'ओजस्तेजः-पराक्रमे' इति विश्वः। ४

अथ गीतं प्रथमम्

एवं तावदेतन्माहात्म्यं निरूप्याथ तत्प्रारम्भं करोति स्मृतिवेदेत्यादिना गीतेन गीतस्यास्य मालवो रागः रूपकतालः—

स्मृतिवेदाद्युद्धारक ! जनतारक ! ए।
शंखशमन ! सुरवन्द्य! जय जय राम! हरे !। ध्रुवपदम्

ए इति सम्बोधने। स्मृतिवेदादीनुद्धारयतीति तत्सम्बुद्धौ हे स्मृतिवेदाद्युद्धारक ! मनुप्रश्नोत्तरद्वारा मत्स्यपुराणानुकीर्तनेन जनांस्तारयतीति तत्सम्बुद्धौ हे जनतारक !। एतदेव विशिनष्टि—शंखस्य शमनः तत्सम्बुद्धौ हे शंखशमन !। 'शमनो यमराड्यमः' इत्यमरः। सुराणां देवानां मध्ये वन्द्यः वन्दनार्हः तत्सम्बुद्धौ हे सुरवन्द्य !। वन्द्यत्वे हेतुमाह—हरति दुःखमिति हरिस्तत्सम्बुद्धौ ए हरे !। एवं सर्वथा प्रकारेण रमन्ते योगिनोऽस्मिन्निति तत्सम्बुद्धौ ए राम !। जय जय स्वीयोत्कर्षाऽऽविष्करणं कुरु कुरु। अत्र द्विरुक्तिर्वीप्सायामस्ति सा द्विधा—आदरद्यो-

तिका भयद्योतिका च। तन्मध्येऽत्रादरद्योतिका संसारतरणहेतुभयाद्भयद्योतिकाऽपि ज्ञातव्या। इति ध्रुवपदं प्रतिपदमनुवर्तनत्वात्। १

एवं धृतमत्स्यरूपं श्रीरामं स्तुत्वाऽथ कूर्मं स्तौति—

नमदाखण्डलशेखर ! धृतमन्दर ! ए।
सन्ततजगदाऽऽधार! जय जय राम! हरे!।। २

नमत् आखण्डलस्य शेखरं मुकुटं यस्मै तत्सम्बुद्धौ। 'आखण्डलः सहस्राक्षः' इत्यमरः। अथ तत्प्रयोजनमाह–धृतः मन्दरो येनेति तत्सम्बुद्धौ हे धृतमन्दर ! सन्ततं सविस्तारं च यत् जगत् तस्याऽऽधारोऽधिष्ठानम् एवंभूत ए राम ! ए हरे ! जय जयेत्यन्वयः। २

अथ वाराहं स्तौति–

हेमनयनसंहारण ! खलदारण ! ए।
भुवनानन्द! मुकुन्द! जय जय राम! हरे !।। ३

'हृञ्–हरणे' इति स्वार्थिकण्यन्तात् युप्रत्यये कृते संहारयतीति संहारणः हेमनयनस्य संहारणः तत्सम्बुद्धौ हे हेमनयनसंहारण !। एवं च दारयतीति दारणः खलानां दारणः तत्सम्बुद्धौ हे खलदारण !। अत एव भुवनेषु आनन्दो येन तत्सम्बुद्धौ हे भुवनानन्द !। अत एव–'खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः। मुहूर्तात्सर्वमुत्सृज्य गतवानभयं हरिम्' इति स्मृत्वा तथा–'विकर्षतोऽन्तर्हृदयाद्दासीपतिमजामिलम्। यमप्रेष्यान्विष्णुदूता वारयामासुरोजसा' इत्यादि वाक्यस्मरणं कृत्वा वदति 'डुदाञ्–दाने' एतस्मात् 'आतो डः' इति डप्रत्यये कृते मुना मुहूर्तेन कुं कुशलं ददातीति मुकुन्दः तत्सम्बुद्धौ हे मुकुन्द !। तदेवं विशिनष्टि–रमन्ते आर्ता यस्मिंस्तत्सम्बुद्धौ ए राम! ए हरे ! जय जय०। अनेन खट्वाङ्गो यथा मुहूर्तमात्रेणापि कुशलीकृतः यथाऽन्तकपाशच्छेदनं कृत्वाऽजामिलः कुशलीकृतस्तथा

मामपि कुशलिनं कुरु मा चिरमिति सूचितम् । मुकुन्देत्यत्र नामैकदेशेन नामग्रहण कृतं यथा भीमो भीमसेनः दत्तो दत्तात्रेय इत्यादिवत् 'ब्भ्यः' इति सूत्रनिर्देशात् ।३

अथ नरहरिं स्तौति—

कनककशिपुतनुधर्षण ! घनकर्षण ! ए ।
धृतजगतीवरभार! जय जय राम! हरे !।। ४

कनककशिपुतनुं धर्षयतीति तत्सम्बुद्धौ कनककशिपुतनुधर्षण ! । अथैतद्रूपातिशयमाविष्करोति घनान्कर्षयतीति तत्सम्बुद्धौ हे घनकर्षण !। श्रीमद्भागवते यथा— 'सटावधूता जलदाः परापतन्ग्रहाश्च तद्दृष्टिविमुष्टरोचिषः । अम्भोधयः श्वासहता विचिक्षिपुर्निर्ह्लादभीता दिगिभा विचुक्रुशुः' इति । अथातिमात्रैतद्रूपाक्रान्तेयं भूः कुतो न शीर्णेत्याशंक्याह–धृतेति । सर्वत आकृष्यात्मनैव धृतः जगतीवरभारो येनेति तत्सम्बुद्धौ हे जगतीवरभार !। अनेन भूभारोऽप्यात्मनैव धृत इत्यद्भुतत्वं सूचितम् । एवं भूत ए राम !ए हरे ! जय जय० ।४

अथ वामनं स्तौति—

चरणसलिलकृतपावन ! वटुवामन ए ।
अजिनदण्डधर,! देव! जय जय राम! हरे! ।।५

चरणसलिलं कृतपावनं यस्य तत्संबुद्धौ । वटुः कृतयज्ञोपवीतश्चासौ वामनस्तत्सम्बुद्धौ वटुवामन !। तदेव दर्शयति–अजिनदण्डौ धरतीति तत्सम्बुद्धौ हे अजिनदण्डधर !इत्यत्राप्यद्भुतत्वं दर्शयति–देवेति । दीव्यति बलिप्रभृतीन् दैत्यान् विजिगीषतीति देवस्तत्सम्बुद्धौ हे देव! । एवम्भूत ए राम !ए हरे! जय जय० ।५

अथ परशुरामं स्तौति—

क्षत्रियवंशनिकन्दन ! भृगुनन्दन ! ए ।
करकोदण्डकुठार! जय जय राम!हरे ! ।।६

'कदि क्रदि—नाशने' । निकन्दयतीति निकन्दनः क्षत्रियवंशस्य निकन्दनस्तत्सम्बुद्धौ हे क्षत्रियवंशनिकन्दन !। अत्राप्यद्भुतत्वं दर्शयति–भृगुष्ववतीर्य नन्दयति विश्वमिति तत्सम्बुद्धौ हे भृगुनन्दन !। करयोः कोदण्डकुठारौ धनुःपरशू यस्येति तत्सम्बुद्धौ करकोदण्डकुठार !। एवम्भूत ए राम! ए हरे! जय जय० । 'धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्' इत्यमरः । ६

अथ रामं स्तौति—

विहितसुजनसम्भावन ! जितरावण ! ए ।
रघुकुलकमलदिनेश! जय जय राम! हरे! ।।७

विहितं कृतं सुजनानां सम्भावनं सम्माननं येन तत्सम्बुद्धौ हे विहितसुजनसम्भावन !। अथ तत्प्रयोजनं दर्शयति जितेति । रावयतीति रावणः जितः रावणो येनेति तत्सम्बुद्धौ हे जितरावण !। अत एवाऽनरण्यपुरावृत्तानुसारेण रघुकुलमेव कमलं तद्विकाशनाय दिनेश इव भवतीति तत्सम्बुद्धौ रघुकुलकमलदिनेश !। एवम्भूत ए राम ! ए हरे ! जय जय० । अनेनास्य कुलदीपकत्वं सूचितम् । ७

अथ कृष्णं स्तौति—

मुरचाणूरविनाशक ! रिपुशासक ! ए ।
सिन्धुसुतासञ्चार! जय जय राम ! हरे ! ।। ८

मुरचाणूरयोर्विनाशकस्तत्सम्बुद्धौ मुरचाणूरविनाशक !। रिपून् शास्तीति तत्सम्बुद्धौ रिपुशासक !। सिन्धुसुतया सह सञ्चारो यस्येति सिन्धुसुतासञ्चार !। एवम्भूत ए राम !ए हरे !जय जय० । अनेन भौमहननेन्द्रपराभवपारिजातानयनादि सूचितम् । ८

अथ बुद्धं स्तौति—

वेदविहितविधिखण्डन ! सुरमण्डन ! ए ।
दनुजभेदकर ! देव ! जय जय राम ! हरे !॥ ९

वेदविहितविधिं खण्डयतीति तत्सम्बुद्धौ वेदविहितविधिखण्डन !। सुरान्देवान्मण्डयत्याभूषयतीति तत्सम्बुद्धौ हे सुरमण्डन !। हे दनुजभेदकर ! भेदनं भेदो भ्रमः दनुजानां भेदं करोतीति तत्सम्बुद्धौ । अथैतदेव विशिनष्टि—दीव्यति अतिवलीयसो दनुजादीन्मतिभेदनेनैव जिगीषतीति देवस्तत्सम्बुद्धौ हे देव !। एवम्भूत ए राम ! ए हरे ! जय जय० । ९

अथ कल्किनं स्तौति—

यवनविदारण ! दारुण ! हयवाहन ! ए ।
धृतकरवाल ! कराल ! जय जय राम ! हरे ! ॥ १०

यवनान् म्लेच्छान् विदारयतीति तत्सम्बुद्धौ । अत एव हे दारुण । हे हयवाहन !। धृतः करवालः खड्गो येन तत्सम्बुद्धौ धृतकरवाल !। अत एव–हे कराल! तद्विनाशाय धृतकालस्वरूप! । एवम्भूत ए राम! ए हरे! जय जय० । १०

अथाऽऽगतस्वपुरावृत्तस्मृतिर्भावनया पुरोगतमिव तं प्रार्थयति—

श्रीजयदेवविधायक ! युतशायक ! ए ।
कुरु कुशलं प्रणतेषु जय जय राम ! हरे ! ॥ ११

श्रीजयदेवं विदधाति विशिष्टतां नयतीति तत्सम्बुद्धौ हे श्रीजयदेवविधायक !। युतेति । युताः जगद्रक्षायां नियुक्ताः शायका येनेति तत्सम्बुद्धौ युतशायक !। वाल्मीकीयोत्तरकाण्डे यथा—'बाणा एव मया मुक्ता इह रक्षन्ति मे प्रजाः । तथाऽपि त्वं महाबाहो! प्रजारक्षणतत्परः ।' एवम्भूत–ए राम! ए हरे! जय जय० । ननु किमर्थमेवं प्रार्थयसे इति चेत्तत्राह—प्रणतेषु शरणागतेष्वात्मभक्तेषु यद्वा—फलभारेणाऽतिनम्रो वृक्षो यथा विनश्यति तथा स्वकर्मपरिपाकविपाकफलेन ये नताः

स्वकर्मफलेन नम्रीभूतास्तेषु कुशलं कुरु 'कुशलं क्षेममस्त्रियाम्' इत्यमरः । ११

इति गीतं प्रथमम् ।

एवं दशावतारस्तवं कृत्वाऽथ साक्षाद्भगवन्तं श्रीरामचन्द्रं स्तौति—

भूभारभञ्जन ! भवाब्धिवरिष्ठपोत !,
मां पाहि कान्त ! करुणाकर ! दीनबन्धो !।
श्रीरामचन्द्र ! रघुपुङ्गव ! रावणारे !,
राजाऽधिराज ! रघुनन्दन ! राघवेश ! ॥ ५

अत्रावतीर्य भूभारं भञ्जयतीति तत्सम्बुद्धौ । अनेन बालकाण्डकथाविर्भावो दृश्यते । भवति जन्म यस्मादिति भवो दशरथः अब्धिरिव भवतीत्यब्धिः संसारः भवादीनामब्ध्युत्तरणाय वरिष्ठपोत इव भवतीति तत्सम्बुद्धौ । अनेनाऽयोध्याकाण्ड० । वने गत्वा शबरीशरभङ्गजटायुरादिषु करुणां करोति तत्सम्बुद्धौ । अनेनारण्यकाण्ड० । दीनानां सुग्रीवादीनां बन्धुरिव भवतीत्यनेन किष्किन्धाकाण्ड० । सुन्दरे तु हनुमता भूविवरप्रवेशादिसागरोल्लङ्घनसीतान्वेषणादि रामरामेति जपप्रभावेणैव कृतमिति हे श्रीरामचन्द्र हे रघुपुङ्गवेति द्वयेन सुन्दरकाण्ड० । तथा हे रावणारे हे राजाधिराज हे रघुनन्दनेति त्रयेण लङ्काकाण्ड० । ईश्वरत्वेन निरूपणत्वात् हे राघवेशेत्यनेनोत्तरकाण्डकथाविर्भावो दृश्यते । हे कान्तेत्यनेन शूर्पणखाविरूपकरणादि दृश्यते । एवं चात्र श्लोके सर्वं रामायणं पूरितम् । अस्यायमभिप्रायः—कदाचिदभिध्यायतो जयदेवस्य हृदयादेष श्लोको बीजाङ्कुर इव बहिर्निर्गतः । पुनः षट्सर्गस्कन्धोऽनेकगीतश्लोकपल्लवोऽनेककाव्यरचनामयामोदोऽनेकविधैहिकाऽऽनन्दच्छायोऽनेकविधस्वर्गादिफलः कल्पद्रुम आसीदिति । ५

रावणाऽभिभवक्लान्ता देवा ब्रह्मपुरोगमाः ।
गताः क्षीरनिधेस्तीरं तुष्टुवुः कमलापतिम् ॥ ६

रावणात् यः अभिभवः तेन क्लान्ताः क्लिष्टा ब्रह्मपुरोगमा देवाः कमलापतिं तुष्टुवुः । किम्भूताः—क्षीरनिधेस्तीरं गताः । ६

अथ गीतं द्वितीयम्

अथ ब्रह्मादिकृतस्तवो वन्द इत्यादिना गीतेन वर्ण्यते—

गीतस्यास्य वसन्तो रागः, प्रतिमण्ठस्तालः ।

वन्देऽरविन्दनयनाऽम्बुदाभ ! ।
कमनीयमूर्तिधर! पद्मनाभ ! ।।१ ध्रुवपदम्

अरविन्दाविव नयने यस्य तत्सम्बुद्धौ । देवैः सह अहं त्वां वन्दे । किम्भूत—अम्बुदस्य आभेवाभा यस्य तत्सम्बुद्धौ । अत्राप्यद्भुतत्वं दर्शयति—कमनीयमूर्तिं धरतीति तत्सम्बुद्धौ । अत्राप्यद्भुतत्व दर्शयति—पद्मं नाभौ यस्य तत्सम्बुद्धौ । १

कोदण्डकलाकौतुकनिधान ! ।
पाखण्डविखण्डन! गरुडयान ! ।। २

अथ ततोऽप्यद्भुतत्वम् । पुनः किम्भूत—कोदण्डकलाकौतुकानां निधानमक्षयनिधिस्तत्सम्बुद्धौ । अनेनैकाद्वीजादेक एवाकुङ्रो भवति । भवतो बीजभूतादनेके प्ररोहा बभूवुभवानद्यापि तादृगेवेत्यद्भुतत्वं सूचितम् । पुनः किम्भूत—पाखण्डं विखण्डयतीति तत्सम्वुद्धौ । पुनः किम्भूत—गरुडः यानं यस्येति तत्सम्बुद्धौ । २

कल्पान्तकोल ! करुणावतार ! ।
कल्याणकमठकृत् ! कर्णधार ! ।। ३

पुनः किम्भूत—कल्पान्ते लयान्ते कोलो भवतीति तत्सम्बुद्धौ । 'कल्पं दृढे समर्थे च रचनायां कल्पमुच्यते । कल्पं लये तथा रोमनीलकर्मणि भास्वरे' इति हलायुधः । 'कोलश्चाधोमुखश्चैव सूकरो यज्ञरोमकः' इति विश्वः । पुनः किम्भूत—करुणया दयया यद्वा—तद्रूपया स्वशक्त्या सहाऽवतारो यस्य तत्सम्बुद्धौ ।

पुनः किम्भूत—कल्याणाय कमठरूपं करोतीति तत्सम्बुद्धौ । अत एव पुनः किम्भूत—कर्णधार इव भवतीति तत्सम्बुद्धौ । 'कर्णधारस्तु नाविकः' इत्यमरः । ३

इति कमठावतारं स्तुत्वाऽथ न साक्षात्कमठोऽसीत्याह—

मायाविलास! नानास्वरूप ! ।
कुन्दाऽऽभदशन! जगदेकभूप ! ।। ४

मायाविलासेन नानाविधानि स्वरूपाणि यस्य तत्सम्बुद्धौ अथ भाविनं श्रीरामचन्द्रं स्तौति—कुन्देति । कुन्दपुष्पस्येवाऽऽभा येषां तानि दशनानि यस्य तत्सम्बुद्धौ । पुनः किम्भूत—जगति एकः अद्वितीयश्चासौ भूपस्तत्सम्बुद्धौ । ४

राजाधिराज ! वीराधिवीर ! ।
रणकर्मकुशल ! वलगुणगभीर !।। ५

राज्ञाम् अधिराजः राजाधिराजस्तत्सम्बुद्धौ । अत एव पुनः किम्भूत—वीराणामधिवीरस्तत्सम्बुद्धौ । अत एव पुनः किम्भूत—रणकर्मणि कुशलः प्रवीणस्तत्सम्बुद्धौ । अत एव पुनः किंभूत—बलेन सहिताश्च ते गुणाश्च बलगुणास्तैर्गंभीरोऽगाधः तत्सम्बुद्धौ । अत्र मुमागमाभावो वैकल्पिकः । ५

त्रिशिरःखरदूषण, ! दूषणान्त ! ।
अज! निर्व्यलीक । गोऽतीतकान्त ! ।। ६

पुनः किम्भूत—त्रिशिराश्च खरश्च तौ तयोर्दूषणस्तत्सम्बुद्धौ । पुनः किम्भूत—दूषणस्यान्तो नाशकस्तत्सम्बुद्धौ । एवं तावद्भाविवर्णनेन रक्षोमारणादिस्वाऽभिप्रायं निरूप्याऽथ ब्रह्मत्वेन निरूपयन्ति—पुनः किम्भूत—अज !। अत एव पुनः किम्भूत—निर्गतं दूरस्थं व्यलीकमसत्यत्वं यस्मात्तत्सम्बुद्धौ । पुनः किम्भूत—गावो वाण्यः वर्णनाऽशक्यत्वेन अतीता निवृत्ता यस्मात् एवम्भूतश्चासौ कान्तस्तत्सम्बुद्धौ । अनेन यथाऽसि तथा वर्णनाऽशक्यत्वाद्वयं कथं तव स्तवं कुर्मः इति सूचितम् । ६

ब्रह्माऽऽदिदेवगणपूज्यपाद !।
विभ्राजमान! विस्मितविषाद! ।। ७

पुनः किम्भूत—ब्रह्माऽऽदिदेवगणैः पूज्यौ पादौ यस्य तत्सम्बुद्धौ । अथ पूज्यत्वे हेतुमाह—पुनः किम्भूत—विशेषेण भ्राजमानः समष्टिरूपेण वर्तमानस्तत्सम्बुद्धौ । पुनः किम्भूत—विस्मितजनः विषादः सीताहरणत्यागादिरूपखेदो यस्य तत्सम्बुद्धौ । अत्र मध्यमपदलोपो ज्ञातव्यः । ७

एवं स्तवनिरूपणं कृत्वाऽथ तत्फलस्तवं करोति—

जयदेवभणितमयशस्त्रवर्म ।
विदधातु सदा प्रणतेषु शर्म ।। ८

जयदेवभणितमयं च तत् शस्त्रवर्म तत् प्रणतेषु रामाय प्रणामं कुर्वत्सु शर्म कल्याणं विदधातु । ८

इति गीतं द्वितीयम् ।

ते देवाः केचिन्नानारागतालस्वरादिललितगान्धर्वेणाऽस्तुवन्केचन नानाकाव्यकलाकल्पितहृद्यपद्यैश्चाऽस्तुवन्नित्याशयेनाऽथ तत्कृतमेव स्तवं निरूपयति—

कालाम्भोदावभासं मणिमयमुकुटं कुण्डलोद्भासिगण्डं,
केयूराऽऽपूर्णबाहुं कमलमसिगदाशार्ङ्गशंखं दधानम् ।
स्मेरं कुन्दाभदन्तं सुरगणमुनिभिर्वेष्टितं चक्रपाणिं,
स्फूर्जद्दिव्यासनस्थं हुतवहसदृशं देव ! देवं नमामि ।। ७

हे देव ! देवं त्वामहं नमामि । किम्भूतम्—काले प्रावृषि आगतश्चासौ अम्भोदस्तद्वदवभासतेऽसौ तम् । पुनः किम्भूतम्—मणिमयं मुकुटं यस्य तम् । 'मण्डनं चाथ मुकुटं किरीटं पुंनपुंसकम्' इत्यमरः । कुण्डलोद्भासितौ गण्डौ यस्य तम् । 'अधस्ताच्चिबुकं गण्डौ कपोलौ तत्परा हनुः' इत्यमरः । पुनः किम्भूतम्—केयूराभ्याम् आपूर्णा बाहवो यस्य तम् । पुनः किम्भूतम्—

कमलमसिगदाशार्ङ्गशङ्खं दधानम् । पुनः किम्भूतम्—स्मेरं सस्मितम् । पुनः किम्भूतम्—कुन्दाभाः दन्ताः यस्य तम् । पुनः किम्भूतम्—सुरगणमुनिभिर्वेष्टितं नियतनिकटवर्तिसुरादिनिषेवितम् । पुनः किम्भूतम्—चक्रं पाणौ यस्य तम् । पुनः किम्भूतम्—स्फूर्ज्जद्दिव्यासनस्थम् । अत एव हुतवहसदृशम् । अनेन यथाऽग्नौ हवनशीलस्य पापमेव भस्मीभवति हविरनन्ततामेति तथा त्वद्हुतं सुकृतमानन्त्यमेति दुष्कृतं नश्यतीति सूचितम् । ७

इति तेषां स्तुतीः कृत्वा भगवान्भक्तवत्सलः ।
प्रादुरासीदयोध्यायां कौसल्यायां शुभे दिने ।। ८

भगवान् अयोध्यायां कौसल्यायां शुभे दिने प्रादुरासीदजनिष्ट । किं कृत्वा—इति पूर्वोक्तास्तेषां ब्रह्मादीनां स्तुतीः श्रुत्वा । किम्भूतः—भक्तेषु वत्सलः प्रीतः । ८

अथ गीतं तृतीयम्

अथ श्रीमद्रामावतारं गुर्जरीरागेण रूपकतालेन रम्यबालरूपमित्यादिना गीतेन वर्णयति—

रम्यबालरूपं राममभिराममहमीडे ।
रावणाऽभिभवपरितप्तसुरसिद्धगण—
याचितं जयति वरमोडे १ ।। ध्रुवपदम्

अत्र सप्तमपदेन सहान्वय इति ज्ञेयम् । कौसल्या तदा इति अवदत् । तदा कदा—यदा रावणेन कृतश्चासावभिभवस्तेन परितप्ताश्च ये सुरसिद्धगणास्तैर्याचितम् ईडे वरं जयति स्मोत्कर्षेणाविर्बभूव । यद्वा—किम्भूतं रामम्—जयति सर्वोत्कृष्टे ईडे स्तव्यपदार्थे वरं सर्वोत्कृष्टतरम् । ईड—स्तुतौ इत्यस्मात् 'घञर्थे कः' इत्यनेन कप्रत्यये कृते ईडचते ईडः स्तव्यपदार्थः । 'वरं च वपुषि श्रेष्ठ ऊढे वर इहेष्यते' इति विश्वः । इति किमवदत्—हे केशव ! रामं

त्वामहम् ईडे स्तौमि । किञ्च—त्वं मां त्राहि अव्याः । किञ्च—अद्भुतमलौकिकं रूपं जहिहि माऽऽविष्कुरु । अनेन यथा दरिद्रो यदृच्छाप्राप्तं धनमाविष्कर्तुं नेच्छति तथा साऽपीति सूचितम् । किं कृत्वा—वीक्ष्य किम्भूतम्—अभिरामम् ।१

इन्द्रनीलाभतनुमतनुशतकोटिरुचिमिन्दुमुखचन्द्रमुरुहारम् ।
कौस्तुभाऽमुक्तकन्धरमरुणपाणिपदमम्बुरुहनयनमलितारम् ।।२

पुनः किम्भूतम्—इन्द्रनीलाभा तनुर्यस्य तम् । पुनः किम्भूतम्—अतनुः कामस्तस्मात् शतकोटिगुणा रुचिर्यस्य तम् । पुन. किम्भूतम्—इन्दुमुखम्, चन्द्रमाह्लादकं यस्य तम् । पुनः किम्भूतम्—उरुर्महान् हारो यस्य तम् । पुनः किम्भूतम्—कौस्तुभेन अमुक्ता एवम्भूता कन्धरा ग्रीवा यस्य तम् । पुनः किम्भूतम्—अरुणौ पाणिभिः सह पादौ यस्य तम् । पुनः किम्भूतम्—अम्बुरुहे इव नयने यस्य तम् । पुनः किम्भूतम्—अली इव तारे अक्षिकनीनिके यस्य तम् । 'अलिः स्याद् भ्रमरे भक्तौ स्यादालिश्च सखीजने' इति विश्वः । २

कम्बुनिभकण्ठमतिनीलचिकुरावलिविजितजलवाहसङ्घातम् ।
गूढतरजत्रुमाजानुभुजदण्डधरमुरसि भृगुचरणजलजातम् ।।३

पुनः किम्भूतं रामम्—कम्बुनिभः कण्ठो यस्य तम् । पुनः किम्भूतम्—अतिनीलाश्च ये चिकुराः केशास्तेषां या आवलिः पङ्क्तिस्तया विजितः जलवाहसंघातो येन तम् । 'चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः' इत्यमरः । पुनः किम्भूतम्—गूढतरे जत्रुणी यस्य तम् । जत्र्वादयो निपात्याः । 'अस्थिभेदे च जत्रु स्यान्नाडिकासु विशेषतः' इति विश्वः । 'स्कन्धो भुजशिरोंऽसोऽस्त्री सन्धी तस्यैव जत्रुणी' इत्यमरः । पुनः किम्भूतम्—आजानु च ते भुजदण्डास्तान् धरतीति । पुनः किम्भूतम्—उरसि भृगुचरणजलजातं यस्य तम् । ३

विविधमणिचित्रहेमाऽऽभरणभूषितं हेतिसंविहितजयगानम् ।
मन्दमन्दस्मितं बन्धुजीवाऽधरं पन्नगाऽमित्रवरयानम् ।।४

पुनः किम्भूतम्—विविधमणिचित्राणि च तानि हेमाऽऽभरणानि तैर्भूषितस्तम् । पुनः किम्भूतम्—हेतिना चक्रेण संविहितं सम्पादितं जयगानं यस्य तम् । पुनः किम्भूतम्—मन्दमन्दस्मितम् । पुनः किम्भूतम्—बन्धुजीवः बन्धूकपुष्पं तद्वदधरौ यस्य तम् । पुनः किम्भूतम्—पन्नगाऽमित्रो गरुडः स एव वरयानं यस्य तम् । ४

कनकमयपट्टमण्डितललाटस्थलं कुन्दकुङ्कुमाभरदभासम् ।
रुचिरमखसूत्रभृतमिन्दिरासंकुलं पीतकौशेयशुभवासम् ।।५

पुनः किम्भूतम्—कनकमयपट्टेन मण्डितं ललाटस्थलं यस्य तम् । पुनः किम्भूतम्—कुन्दकुङ्कुमाभा रदभाः दन्तभाः यस्य तम् । पुनः किम्भूतम्—रुचिरतरमखसूत्रं मनोज्ञयज्ञोपवीतं बिभर्तीति तम् । पुनः किम्भूतम्—इन्दिरया लक्ष्म्या सङ्कुलस्सम्पन्नस्तम् । अनेन श्रीरामावतारप्रभावतः सर्वं तद्गेहराष्ट्रादिकं च रमाक्रीडमभूदिति सूचितम् । पुनः किम्भूतम्—पीते कौशेये कृमिकोशोद्भवे वाससी यस्य तम् । ५

सुखदनासापुटं शीलकरुणाऽऽकरं सत्यसंकल्पमहितल्पम् ।
दानवानीकमत्तेभपञ्चाननं विहितपलदिवसयुगकल्पम् ।।६

पुनः किम्भूतम्—सुखदे नासापुटे यस्य तम् । पुनः किम्भूतम्—शीलं च करुणा च तयोः आकरस्तम् । 'खनिः स्त्रियामाकरः स्यात्' इत्यमरः । पुनः किम्भूतम्—सत्यः सङ्कल्पो यस्य तम् । पुनः किम्भूतम्—अहिस्तल्पं यस्य तम् । पुनः किम्भूतम्—दानवानीकेषु ये मत्तेभा इव भवन्ति तेषां वधाय पञ्चाननस्तम् । 'सिंहो मृगेन्द्रः पञ्चास्यः' इत्यमरः । पुनः किम्भूतम् — विहिताः सम्पादिताः पलदिवसयुगकल्पा येन तम् । यद्वा—'हि—गतौ वृद्धौ च' इति विहिता व्यतीताः अथवा—वृद्धाः पलदिवसयुगकल्पा यस्य तम् । यद्वा—'धाञो हिः किति ते' इति धाञः प्रयोगे विहिताः धृताः पलदिवसयुगकल्पा येन तम् । अनेन कालोऽपि त्वमेवेति सूचितम् । ६

कोशलाऽधीशजायादिशिशुशोकहरमद्भुतं वीक्ष्य कौसल्या ।
अवददिति रूपमधुना जहिहि केशव! त्राहि मामपगतशल्या ।। ७

पुनः किम्भूतम्—कोशलाधीशजायादीनां शिशुशोकहरस्तम् । किम्भूता कौसल्या—अपगतं शल्यं यस्याः सा । 'शल्यं छिद्रे च बाणे च शल्यं च विषकण्टके। व्याधौ शल्यमिति प्रोक्तं प्रसूतायां विशेषतः, इति हलायुधः । स्पष्टमन्यत् । ७

पठति यो ज्ञानमज्ञानतिमिरापहं वैष्णवं त्रिजगदतिसारम् ।
भावुकं चारु जयदेवकविनिर्मितं याति भवसिन्धुपरपारम् ।। ८

यः पुमान् जयदेवकविनिर्मितम् इदं गीतं पठति सः भवसिन्धुपरपारं याति । तत्र हेतुमाह—किम्भूतं गीतम् ज्ञानं ज्ञानदं ज्ञानेनैव मुक्तिरिति भावः । ऋते ज्ञानान्न मुक्तिः इत्यादिश्रुतेः । तदेव पुनः किम्भूतम्—अज्ञानतिमिरापहम् । पुनः किम्भूतम्—वैष्णवं विष्णुवर्णनात्मकम् । पुनः किम्भूतम्—त्रीणि च तानि जगन्ति तेषु अतिसारं सारतमम् । पुनः किम्भूतम्—भावुकं क्षेमरूपम् । 'भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम्' इत्यमरः । ८

इति गीतं तृतीयम् ।

अवतारभेदान्निरूपयति—

कैकेय्यां भरतो जज्ञे सुमित्रायां यमौ सुतौ ।
शत्रुघ्नलक्ष्मणौ नाम शरदिन्दुनिभाननौ ।। ९

यमौ द्वौ । शरदिन्दुनिभं शरच्चन्द्रसदृशम् आननं ययोस्तौ शारदिन्दुनिभाननौ। स्पष्टमन्यत् । ९

निदध्वनुर्दुन्दुभयः समन्ताज्जगुश्च गन्धर्वगणाः प्रवीणाः ।
वनं सपुष्पं सरिदम्बुपूर्णाऽस्यरा धरित्री विमलं नभश्च ।। १०

दुन्दुभयः समन्ताद्दिवि भूमौ च निदध्वनुरवाद्यन्त । च पुनः प्रवीणाः निपुणाः गन्धर्वगणाः जगुरगायन् । च पुनः वनं सपुष्पमासीत् । च पुनः सरित् अम्बुसम्पदा

पूर्णा अम्बुपूर्णा आसीत् । च पुनः धरित्री अस्यरा आसीत् । 'षो—ऽन्तकर्मणि' स्यत्यङ्गवैवर्ण्यजर्जरीभावरूपान्तकर्म करोतीति विग्रहे 'दृशादेः शः' इति शप्रत्यये कृते 'दिवादेर्यः' इति यप्रत्यये तदनु 'य्योः' इत्योकारलोपे स्यः इति सिद्धम् । तदनु स्यं राति गृह्णातीति विग्रहे 'आतो डः' इति ड प्रत्यये स्यरेति सिध्यति । न स्यरा अस्यरा पुनर्नवीना । यद्वा—सानां सदानन्दश्रीवनधनयौवनवस्तुवृन्दानां भावः स्यम्, स्यं रातीति स्यरा आसीत् । अनेन येयं धरित्री पूर्वं रक्षोभयान्निरानन्दाऽऽसीन्निरानन्दत्वान्निःश्रीकाऽऽसीत्तथा निर्वना निरोषधिवना चासीत् निर्धना चासीत् । निरानन्दत्वेन निःश्रीकत्वेन निर्वनत्वेन च निर्यौवनाऽऽसीत् । निर्यौवनत्वाच्च या निर्वस्तुवृन्दाऽऽसीत् सैव धरित्री श्रीमद्रामचन्द्रावतारप्रभावात् सदानन्दवती श्रीमती वनधनयौवनवती वस्तुवृन्दवत्यासीदिति सूचितम् । 'वृषे च सः सदानन्दे सा श्रियां सं वनं धनम् । यौवनेऽपि समाख्यातं वस्तुवृन्दे समाहृतम् ।' इति नाममालिकायाम् । नभः विमलम् आसीत् । १०

अथ गीतं चतुर्थम् ।

अथ कदाचिदयोध्याप्रतोलीषु विचरन्तं श्रीरामचन्द्रं प्रति नागरिकोक्तिः—आशावरीरागेण रूपकतालेन रामवदनमित्यादिना गीतेन वर्ण्यते—

रामवदनमतिमञ्जु विलोकय ।
शारदकोटिशशिनमिव निर्मल-
मक्षिचकोरं रोपय ।। ध्रुवपदम्

मञ्जुमतिक्रम्य भवतीत्यतिमञ्जु व्यादत्तनेत्रं विलोकय । तत्प्रयोजनमाह—शारदात्कोटिगुणश्चासौ शशी तमिव निर्मलं रामवदनम् अक्षिचकोरं रोपय । १

भृकुटीकुटिलधनुर्वलितं नवकुङ्कुमतिलकललाटम् ।
सुहृदयहृदयविशोककरं करुणामयनयनविपाटम् ।।२

किम्भूतं रामवदनम्—कुटिलं च यद्धनुः तस्येव वलिते भृकुटचौ कुटिलधनुर्व-

लिते यस्मिन् तत् । अनेनैतच्छ्रीराममुखं स्वभ्रूभङ्गमात्रेणैव सर्वथा सर्वं जयतीति सूचितम् । पुनः किम्भूतम्—नवकुङ्कुमतिलकललाटम् । पुनः किम्भूतम्—सुष्ठु हृदयं येषां तेषां यद्धृदयं तस्य विशोककरम् । पुनः किम्भूतम्—करुणामयं नयन-विपाटं नेत्रोन्मीलनं यस्मिन् तत् । २

क्षीरपयोनिधिवीचिविनिन्दकविशदमनोहरहासम् ।
कुन्दकुसुमकमनीयलसद्दशनावलिकिरणविकाशम् ॥३

पुनः किम्भूतम्—क्षीरपयोनिधिवीचिविनिन्दकः विशदः मनोहरः हासो यस्य तत् । पुनः किम्भूतम्—कुन्दकुसुमकमनीयाः लसन्तश्च ये दशनाः दन्तास्तेषां ये आवली पङ्क्ती तयोर्ये किरणमयूखास्तेषां विकाशो यस्मिंस्तत् । ३

नागलतारसरागधराधरपल्लवमयहृदि हासम् ।
कीरमुखाकृतिधीरसुगन्धसमीरणनासाऽऽवासम् ॥४

पुनः किम्भूतम्—नागलतारसरागधरौ च यौ अधरपल्लवौ तन्मयः तत्प्रतिभा-विकारापन्नः हृदि हासो यस्य यत् । पुनः किम्भूतम्—कीरमुखस्य शुकतुण्डस्या-कृतिरिवाकृतिर्यस्य धीरो मन्दः सुगन्धः सौगन्ध्ययुक्तः समीरणः पवनो यस्यैवम्भूतः नासाऽऽवासो नासिकाकारो यस्मिंस्तत् । ४

नानारत्नविचित्रहिरण्मयमुकुटविभागमतोलम ।
मकराकारकनककुण्डलयुगचलनविभासिकपोलम् ॥५

पुनः किम्भूतम्—नानारत्नविचित्रं हिरण्मयं च तन्मुकुटं तेन विधिना चासौ भातां गच्छतीति तत् । अनेनैतस्यानेकभात्वं सूचितमतो यथाऽस्ति तथा वर्णयितुं न शक्यत इति भावः । तदेवाह—पुनः किम्भूतम्—अतोलम् । 'तुल—उन्माने' उन्मानं तोलनम् । तुल्यते उपमीयते इति विग्रहे 'घञ् भावे' अनेन घञि कृते तोलमिति सिद्धम् । न तोलम् अतोलम् । अनुपमेयमित्यर्थः । पुनः किम्भूतम्—मकराकारे कनकनिर्मिते च ये कुण्डले तयोर्यत् युगं तस्य यच्चलनं कम्पनं तेन विभासिनौ

नानात्वेन शोभमानौ कपोलौ यस्य तत् । 'गण्डौ कपोलौ' इत्यमरः । 'कर्णिका तालपत्रं स्यात्कुण्डलं कर्णवेष्टनम्' इत्यमरः । ५

कम्बुरुचिरतरकण्ठभृदम्बुदनीलविजृम्भितकेशम् ।
रघुकुलकैरवकानननियतविकाशकचारुनिशेशम् ॥ ६

पुनः किम्भूतम्—कम्बुरुचिरतरकण्ठं बिभर्ति इति तत् । पुनः किम्भूतम्—अम्बुदवत् नीलाः विजृम्भिताः कुटिलाः केशाः कुन्तलाः यस्मिंस्तत् । पुनः किम्भूतम्—रघुकुलमेव कैरवकाननं कुमुदवनं तस्य नियतविकाशकः उद्बोधकः चारुनिशेशः पूर्णचन्द्रो भवतीति तत् ।६

मङ्गलमोदकरं सुचिरं निजभक्तसतामनुकूलम् ।
लोकचतुर्दशपालनदक्षमपक्षविनाशमतूलम् ॥ ७

पुनः किम्भूतम्—मङ्गलमोदकरम् । पुनः किम्भूतम्—सुचिरमनाद्यन्तम् । पुनः किम्भूतम्—निजभक्ताश्च ये सन्तस्तेषामनुकूलं तदधीनम् । पुनः किम्भूतम्-लोकाश्च ये चतुर्दश तेषां यत्पालनं तस्मिन्दक्षं निपुणम् । पुनः किम्भूतम्—अपक्षान् शत्रून् विनाशयतीति तम् । अनेनैतद्भ्रूभङ्गमात्रेणैव रावणादिनाशो भविष्यतीति सूचितम् । यद्वा—अपक्षान्पक्षरहितानानाथान्सुग्रीवशबरीविभीषणादीन् विशेषतां नयतीति अपक्षविनम् आ समन्तात् शम् आशम् अपक्षविनं च तत् आशं च अपक्षविनाशम् । अनेन यथा सुग्रीवशबरीविभीषणादीन् विशिष्टतां नेष्यति एषां च यथा शं करिष्यति तथाऽस्मानपि विशिष्टतां नेष्यति अस्माकमपि शं करि-ष्यतीति सूचितम् । अतः सादरावलोकनं कुरुतेति भावः । पुनः किम्भूतम्—अतूलम् 'तूल—निष्कर्षे' निष्कर्षो निष्कोषणं तच्चान्तर्गतस्य बहिर्निःसारणम् । तूलतीति तूलम् । अस्याग्नेस्तूलं निस्सारकमुत्पत्तिस्थानम् अतूलम् । 'मुखादग्नि-रजायत' इति श्रुतेः । 'अः शिवे केशवे वायौ ब्रह्मचन्द्राग्निभानुषु' इत्यक्षर-मालिका । 'श्वःश्रेयसं शिवं भद्रम्' इत्यमरः । ७

श्रीजयदेवकवेरिदमुदयति हरिचरणस्मृतिसारम् ।
सुखयतु साधु जनं सततं किल शमयतु विषयविकारम् ।।८

श्रीजयदेवकवेः इदं गीतं हरिचरणस्मृतिसारं प्रति उदयति अत्युत्कृष्टमस्ति अतः जनं साधु यथा स्यात्तथा सुखयतु विषयविकारं शमयतु नाशयतु ।८

इति गीतं चतुर्थम् ।

अथ तत्पितुः सौभाग्यमाह—

रराज भूपतिः पुत्रैश्चतुर्भिर्गुणशालिभिः ।
भुजैरिवास्त्रकुशलैर्भगवान्भक्तवत्सलः ।। ११

भूपतिर्दशरथः गुणशालिभिर्नानागुणोत्कृष्टैश्चतुर्भिः पुत्रैः रराज शोभितवान् । कैः क इव—भुजैर्भगवानिव श्रीविष्णुरिव । किम्भूतो भगवान् भक्तेषु वत्सलः प्रीतः भक्तवत्सलः । किम्भूतैः पुत्रैः अस्त्रकुशलैः अस्त्रप्रवीणैः । ११

एवं पृथङ् निरूप्याऽथ सावतारभेदं निरूपयति—

मणिचित्रकिरीटधारिणो धनुरिष्वाशिविभासिपाणयः ।
शरदिन्दुनिभानना बभुस्तनया भूमिभुजो महौजसः ।। १२

भूमिभुजो नृपस्य दशरथस्य तनयाः पुत्राः बभुः शुशुभुः । किम्भूताः—मणिचित्रकिरीटधारिणः । पुनः किम्भूताः—अश्नाति शत्रूनित्याशिश्चक्रम् अत्र 'वपादेरिञ्' इति सिद्धिः । विभश्चासौ असिः विभासिः । धनुश्च इषुश्च आशिश्च विभासिश्च ते पाणिषु येषां ते । पुनः किम्भूताः—शरदिन्दुनिभानि शरच्चन्द्रसदृशानि आननानि येषां ते । पुनः किम्भूताः—महत् ओजो येषां ते । 'ओजस्तेजः पराक्रमे' इति विश्वः । १२

अथास्यैव लीलां विवृवुर्विश्वामित्राऽऽगमनं निरूपयसि—

सुबाहुमुख्यै रजनीचराद्यैरुपप्लुतो गाधिसुतो महर्षिः ।
अगादयोध्यां नृसहस्रसङ्कुलां शिष्यायुतैः पूरितपार्श्वभागः ।।१३

सुबाहुर्मुख्यो येषु तैः । रजनीचराद्यैर्नानारक्षोभेदैः उपप्लुतः उपद्रुतः महर्षिर्गाधिसुतो विश्वामित्रः अयोध्याम् अगाद् गतवान् । किम्भूतः—शिष्यायुतैरयुतशः शिष्यैः पूरितपार्श्वभागः पूर्णपार्श्वः । किम्भूतामयोध्याम्—नृसहस्रसङ्कुलाम् । १३

ननाम साकेतनृपो महर्षये कृताञ्जलिः पादपयोजयोर्द्रुतम् ।
निवेशयामास सुतौ मनोहरौ प्रसन्नचित्तः प्रबभूव योगवित् ।। १४

साकेतनृपः अयोध्यापतिर्दशरथः महर्षये ननाम सुतौ पादपयोजयोर्द्रुतं शीघ्रं निवेशयामास तस्य शेषः । तदा योगवित् प्रसन्नचित्तः प्रबभूव ।

अथ गीतं पञ्चमम् ।

अथ विश्वामित्रो रामहस्तं स्पृशन्नाह दशरथम् । मालवरागेण रूपकतालेन रामचन्द्रेत्यादिना गीतेन—

रामचन्द्रकरकमलमुदारम् ।
भज भजनीयममलमतुलित-
रुचिदमितदनुजपरिवारम् ।। १ ध्रुवपदम्

हे राजन् ! रामचन्द्रकरकमलं भज सर्वमेतल्लीलैवेति बुद्धया सेवस्व । किम्भूतम्—उदारं यथेष्टम् । पुनः किम्भूतम् — भजनीयं भजनार्हम् । भजनार्हत्वे हेतुः । पुनः किम्भूतम्—अमलं स्फटिकवन्निर्मलम् । अनेन स्फटिको यथाऽधिष्ठानरागाधीनतामेति तथेदमपि भक्तानुरागतामेत्यतोऽवश्यं भजनीयमिति भावः । पुनः किम्भूतम्—अतुलिता अपरिमेया रुचिर्यस्य तत् । पुनः किम्भूतम् शमितः दनुजपरिवारो येन तत् । १

धृतकोदण्डविशिखमणिभूषणमरुणमनोहरवेषम् ।
भागधेयसूचकविशुद्धतरविविधवर्णशुभरेखम् ।। २

पुनः किम्भूतम्—धृतानि कोदण्डविशिखमणिभूषणानि येन तत् । 'पृषत्क-बाणविशिखा अजिह्मगखगाशुगाः' इत्यमरः । पुनः किम्भूतम्—अरुणः मनोहरः वेषो यस्य तत् । पुनः किम्भूतम्—भागधेयसूचकाः विशुद्धतराः विविधवर्णाः अनेकधा वर्णनार्हाः शुभाः रमणीयाः रेखाः यस्मिन् तत् । २

स्फुरदङ्गुलिनखराजिविराजितममरनिकरकृतरागम् ।
मुक्तादलभूषितदलसङ्कुलसरसिजमिव वरभागम् ।। ३

पुनः किम्भूतम्—स्फुरन्ती दीप्तिवती चासौ अङ्गुलीनखराजिस्तया विराजितम् । पुनः किम्भूतम्—अमरनिकरैर्देवसमूहैः कृतः रागो यस्मिंस्तत् । पुनः किम्भूतम्—मुक्तादलैर्भूषितं दलैः पत्रैः सङ्कुलं सम्पन्नं च तत्सरसिजं तदिव । 'मुक्तास्फोटे प्रवाले च मुक्ता मुक्तगतौ स्मृतः' इति हलायुधः । 'दलं पत्रे च खण्डे च दलं राजबलेऽपि च' इति विश्वः । पुनः किम्भूतम्-वरा उत्कृष्टा चासौ भा तां गच्छतीति तत् । 'स्युः प्रभा रुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः' इत्यमरः । ३

तदेव विशिनष्टि—

वरमभीष्टमभयं दददद्भुतमाजिकलासुपवीनम् ।
अरिषड्वर्गमधुपमदगञ्जनमनुपममञ्जनहीनम् ।। ४

पुनः किम्भूतम्—अभीष्टमभिलषितम् अभयम् भयरहितं वरं ददत् । पुनः-किम्भूतम्—अद्भुतम् । ननु किमत्राद्भुतत्त्वमिति चेत्तत्राह—पुनः किम्भूतम्—आजये समराय कलन्ति गच्छन्तीत्याजिकलाः स्वकीयपरकीयवीराः तेषु स्वकीयानाम् असुरिव प्राण इव प्राणो यथा नस्यधिष्ठायेन्द्रियाद्यात्मबलं रक्षति तद्वत् । परेषां पवीनाम् इनः पवीनः स इव वज्रराज इव । समरे विमुक्तं वज्रं यथा कमपि शत्रुं न मुञ्चति तद्वत् । 'इनः सूर्ये प्रभौ राजा मृगाङ्के' इत्यमरः । 'ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः । शतकोटिः स्वरुः शंबो दम्भोलिरश-

निर्द्वयोः' इत्यमरः । अरीणां ये षड्वर्गास्त एव मधुपाः भ्रमरास्तेषां मदगञ्जनं हर्षनाशकम् । अन्यस्मिन्कमले भ्रमराणां हर्षवृद्धिरस्त्यत्र तदन्यथात्वं दृश्यते इत्याश्चर्यम् । षड्वर्गो यथा—उपायः साधनोपायो विभागो देशकालयोः । विनिपातः प्रतीकारः सिद्धिश्च—इति । पुनः किम्भूतम्—अनुपमम्—अञ्जनहीनं निरञ्जनं तत्तत्कर्मफलशून्यम् । ४

धर्मादिकफलनमितमहर्निशमजशङ्करमुनिगीतम् ।
कमलापाणिकमललालिततममसुरविघातविनीतम् ।। ५

पुनः किम्भूतम्—अहर्निशं धर्मादिकफलनमितं धर्मार्थकाममोक्षप्रदानाय सदैवाधोमुखम् । तत्र प्रमाणयति—पुनः किम्भूतम्—अजश्च शङ्करश्च मुनयश्च तैर्गीतं प्रीत्योद्गीयमानम् । पुनः किम्भूतम्—कमलापाणिकमलैर्लालिततमं कृतातिलालनं तत् । पुनः किम्भूतम्—असुराणां विघाते विनीत इव शिक्षित इवेति तत् । ५

कपिलादिकसनकादिनिषेवितमशुभशमनमतिभारम् ।
वेदपुराणसकलसम्मतमिव सादितविषमविकारम् ।। ६

पुनः किम्भूतम्—कपिलादिकाश्च सनकादयश्च तैर्निषेवितं प्रीत्याभिध्यातं तत् । पुनः किम्भूतम्—अशुभशमनम् । पुनः किम्भूतम्—अतिक्रान्तः भारो येन तदतिभारं भारहरम् । यद्वा—अतिशया चासौ भा तां राति ददातीति तत् । पुनः किम्भूतम्-वेदपुराणानां सकलं कलासहितं सम्मतमिव सिद्धान्त इव । पुनः किम्भूतम्—सादिताः विच्छिन्नाः विषया विकारा येन तत् । ६

चिन्तामणिसुरधेनुकल्पतरुकोटिदानगुणशीलम् ।
प्राकृततत्त्वप्रपञ्चरोगहरमखिलचराचरलीलम् ।। ७

पुनः किम्भूतम्—चिन्तामणिश्च सुरधेनुश्च कल्पतरुश्च ते तेभ्यः कोटिगुणं दानगुणशीलं दानकरं तत् । पुनः किम्भूतम्—प्राकृतो यो तत्त्वानां प्रपञ्चस्स एव

रोगस्तं हरतीति तत्। पुनः किम्भूतम्—अखिलाश्च ये चराचरास्तेषु लीला यस्य तत्। ७

श्रीजयदेवभणितमतिमञ्जुलमधुरमनोहरगानम् ।
दिशतु सदा मङ्गलमतुलितमिति परमानन्दनिधानम् ।। ८

इतीदं श्रीजयदेवभणितं सदा अतुलितमपरिमितं मंगलं दिशतु ददातु। किम्भूतमिदं जयदेवभणितम्—अतिशयेन मंजुलं मधुरं मनोहरं गानं यस्मिस्तत्। अत्र त्रिवारं माधुर्योपपादनेन मुक्तमुमुक्षुविषयिणां त्रयाणामप्येतन्मनोज्ञमिति सूचितम्। श्रीमद्भागवते यथा—'निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात्। क उत्तमश्लोकगुणानुवादात्पुमान्विरज्येत विना पशुघ्नात्।' इति। पुनः किम्भूतम्—परमानन्दस्य निधानमधिष्ठानं तत्। ८

इति गीतं पञ्चमम्।

इदानीं समग्राङ्गं श्रीरामं स्तुवन्प्रार्थयते—

क्षुमापुष्पश्यामो विकचविशदाम्भोजनयनः,
प्रवालोष्ठो बिभ्रद्रुचिरतरकोण्डभिदुरः।
पृषत्कान्पाणिभ्यामतिविमलमुक्ताफलरदो,
महावीरो धीरो मनसि रघुवीरो निवसताम्।। १५

रघुवीरः श्रीरामः मे मनसि निवसताम्। किम्भूतो रघुवीरः क्षुमाया यत्पुष्पं तद्वत् श्यामः। 'अतसी स्यादुमा क्षुमा' इत्यमरः। पुनः किम्भूतः—विकचविशदाम्भोजे इव नयने यस्य सः। पुनः किम्भूतः—प्रवालाविव ओष्ठौ यस्य सः। 'मुक्ताथ विद्रुमः पुंसि प्रवालं पुंनपुंसकम्' इत्यमरः। पुनः किम्भूतः-रुचिरतरश्चासौ कोदण्डस्तेन भिदुरः सुन्दरः। 'भिन्नोत्कटे च भिदुरं सुन्दरे भिदुरं स्मृतम्' इति वैजयन्ती। पुनः किम्भूतः—पाणिभ्यां पृषत्कान्बिभ्रत्। 'पृषत्कबाणविशिखा अजिह्मगखगाशुगाः' इत्यमरः। पुनः किम्भूतः— मुक्ताफलानीव

रदा यस्य सः। 'रदना दशना दन्ता रदाः' इत्यमरः। पुनः किम्भूतः महावीरः। पुनः किम्भूतः—धीरः धृतिमान्।

अथ विश्वामित्रो दशरथं प्रार्थयते राजेति द्वाभ्याम्—

राजब्रह्ममहर्षिभ्यो राजंश्चित्रमिदं तपः।
राजन्ते येन रामाद्या ब्रह्मेशा लोकशासिनः।। १६

हे राजन्! तवेदं तपः राजब्रह्ममहर्षिभ्यश्चित्रम् आश्चर्यरूपम्। तदेवाह—किमिदं तपः—येन तपसा रामाद्या राजन्ते त्वयि पुत्रत्वेनावातरन्। किम्भूता रामाद्याः—ब्रह्मेशाः वेदाऽधिष्ठातृदेवाः। पुनः किम्भूताः—लोकशासिनः लोकस्थितिप्रवर्तकाः। १६

कस्तूरिकाश्यामलचारुवेशं किरीटमाभूषितभालदेशम्।
श्रीरामचन्द्रं नृप! देहि मह्यं सलक्ष्मणं रक्षतु यज्ञमुग्रम्।। १७

कस्तूरिकावत् श्यामलः श्यामवर्णः चारुः मनोहरः वेशो यस्य तम्। किरीटस्य या मा लक्ष्मीस्तया भूषितः भालदेशो यस्य तम्। 'लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया। इन्दिरा लोकमाता मा क्षीरोदतनया रमा।' इत्यमरः। एवम्भूतं श्रीरामचन्द्रं हे नृप! मह्यं देहि। सः उग्रं यथा स्यात्तथा यज्ञं रक्षतु। किम्भूतं श्रीरामम्—सलक्ष्मणम्।

क्षमापालः कालोद्भटदनुजजालोच्छ्रितशिर-
श्छिदद्बाणोद्बाहुर्गुरुकथितजन्मान्तरकथः।
अदाद्रामं श्यामं जलदमिव सौमित्र्यनुचरं,
समाश्लिष्य प्रायः कुशिकतनयोऽथाश्रुनयनः।। १८

क्षमापालः रामम् अदात् दत्तवान्। किं कृत्वा समाश्लिष्याऽऽलिङ्गनं कृत्वा। अथ कुशिकतनयो विश्वामित्रः प्रायः अतिशयेन अश्रुनयनः प्रेमोद्गताश्रुरासीत्। किम्भूतं रामम्—श्यामम्। कमिव जलदमिव। पुनः किम्भूतं

रामम्—सौमित्र्यनुचरम्। किम्भूतः क्षमापालः—कालोद्भटाश्च ये दनुजास्तेषां जालानि तेषाम् उच्छ्रितानि यानि शिरांसि तेषां छिदन्तश्च ये बाणास्तैरुत्कृष्टो बाहुर्यस्य सः। पुनः किम्भूतः—गुरुणा वशिष्ठेन कथिता जन्मान्तरकथा यस्य सः। १

हत्वा मार्गे मार्गणेन ताडकां लोकताडकाम्।
ययौ तपोवनं रामो महर्षेर्गाधिजन्मनः ।।१९

रामः मार्गे मार्गणेन बाणेन लोकानां जनानां ताडका मारिका ताम् एवम्भूतां ताडकां हत्वा निहत्य गाधेर्जन्म यस्य तस्य महर्षेर्विश्वामित्रस्य तपोवनं ययौ प्राप्तवान्। १९

अथ तत्र गते रामे तत्रत्योत्सवमाह—

वैदूर्यद्युतिमिन्दुसुन्दरमुखं पूर्णेन्दुतूणीयुगं,
मुक्ताहारकिरीटरत्नविलसत्स्वर्णाङ्गदालङ्कृतम्।
स्फूर्जद्बाणधनुर्धरं रघुवरं संवीक्ष्य सभ्रातरं,
प्रेक्षन्तं सिरतारका मुनिवराश्चन्द्रं चकोरा इव ।। २०

•

इति श्रीमद्रामगीतगोविन्दे महाकाव्ये
श्रीजयदेवकृतौ सानन्दरघुनन्दनो
नाम प्रथमः सर्गः ।। १

•

वैदूर्यस्य मणिविशेषस्य द्युतिरिव द्युतिर्यस्य तम्। इन्दुसुन्दरमुखम्। अक्षयशायकत्वाज्जनाऽऽह्लादकत्वाच्च पूर्णेन्दू इव तूण्यौ पूर्णेन्दुतूण्यौ तयोर्युगं युग्मं यस्य

तम्। मुक्ताहारश्च किरीटं च रत्नविलसत्स्वर्णाङ्गदश्च तैरलंकृतः भूषितस्तम्। स्फूर्जती च ते बाणधनुषी ते धरतीति तम्। प्रेक्षन्तं प्रकर्षेणाऽऽलोकयन्तम्। सभ्रातरं भ्रातृसहितम्। एवम्भूतं रघुवरं श्रीरामं संवीक्ष्य मुनिवराः सिरतारका बभूवुः। 'षिञ्—बन्धने' रूपे दृष्टि सिन्वन्ति बध्नन्ति युञ्जन्तीति सिराः अत्र 'स्फायादेरक्' इति रक् प्रत्ययः। सिराः रामे बद्धदृष्टयस्तारकाः येषां ते। 'तारकाक्ष्णः कनीनिका' इत्यमरः। कं संवीक्ष्य के इव—चन्द्रं संवीक्ष्य चकोरा इव। २०

इति श्रीमद्रामगीतगोविन्दार्थविवर्णने प्रथमः सर्गः। १

•
•
•

द्वितीयसर्गः

रामचन्द्रं समालोक्य मुनयो वनवासिनः ।
योगं विस्मृत्य सहसा चक्रुः स्तुतिमनेकधा ।। १

वनवासिनः वनस्थाः मुनयः रामचन्द्रं समालोक्य सम्यग् दृष्ट्वा अनेकधा पृथक् पृथक् स्तुतिं चक्रुः । किं कृत्वा—सहसा योगं विस्मृत्य । अस्यायमर्थः—सहसा तत्कालमेव प्राप्तं योगफलमपवर्गं विस्मृत्यानादृत्यास्तुवन्निति । अत्र योगशब्देन योगफलं गृह्यते आम्रशब्देनाम्रफलं यथा । यद्वा—सहसा शीघ्रं कदाऽत्र श्रीमद्रामचन्द्राऽऽगमनं भविष्यति कदा द्रक्ष्याम इत्याशयेनाहरहः क्रियमाणं योगं विस्मृत्य । अनेनैषां सिद्धावस्थात्वं सूचितम् । १

अथ गीतं षष्ठम्

अथैतत्कृता स्तुती रामकरीरागेण रूपकतालेन प्रणमामीत्यादिना गीतेन वर्ण्यते-

प्रणमामि राममनुत्तमं मनुवंशकञ्जरविम् ।
कन्दर्पकोटिसमानसुन्दररूपमादिकविम् ।। १ ध्रुवपदम्

अहम् अनुत्तमं सर्वोत्तमं रामं प्रणमामि वन्दे । अत्र प्रणमामीत्यत्रैकत्वविवक्षादोषोऽगम्यः पूर्वश्लोकेऽनेकधेति पदोपादानात् । तदैकेनैव कृतेयं स्तुतिरेवं सर्वेऽपि पृथक् पृथग् स्तुवन्नित्यवगम्यम् । किम्भूतं रामम्—मनुवंश एव कञ्जं तस्य रविरिव भवतीति तम् । पुनः किम्भूतम्—कन्दर्पाश्चाऽनेककोटयः तैस्समानं यत्तस्मादपि सुन्दरं रूपं यस्य तम् । अनेनाभूतोपमत्वं सूचितम् । —पुनः किम्भूतम् आदिकविम् । तस्माद्यज्ञात्सर्वहुतऋचः सामानि जज्ञिरे इति श्रुतेः । १

एवं स्तुत्वा यदैको विरराम तदाऽन्य ऋषिभिरेवाऽस्तौदित्याह—

ब्रह्माभिधानमलेपमजमद्वैतमप्रलयम् ।
सद्रूपवन्तमबाधितं चिन्मात्रमम्बुशयम् ।। २

अहं ब्रह्माभिधानं रामं प्रणमामि । किम्भूतं रामम्—अलेपम् । 'एको देवस्सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । सर्वाध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च' इति श्रुतेः । पुनः किम्भूतम्—अजम् । 'नात्मा जजान न मरिष्यति' इति श्रुतेः । पुनः किम्भूतम्—अद्वैतम् । सत्यं ज्ञानमनन्तं ब्रह्म नेह नानाऽस्ति किञ्चन इति श्रुतेः । पुनः किम्भूतम्—अप्रलयम् । 'न मृत्योः स मृत्युमाप्नोति' इति श्रुतेः । अत एव पुनः किम्भूतम्—सद्रूपवन्तम् । त्रिष्वपि कालेष्वव्यभिचारेण वर्तमानम् । पुनः किम्भूतम्—अबाधितम् । 'नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः । न चैनं क्लेदयन्त्यापो न शोषयति मारुतः' । इति स्मृतेः । पुनः किम्भूतम्—चिन्मात्रं चित्स्वरूपम् । पुनः किम्भूतम्—अम्बुशयम् । 'आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणस्स्मृतः' । इति स्मृतेः । २

अथान्यः स्तौति—

सत्यस्वरूपममेयमक्षरमप्रपञ्चगतम् ।
अव्यक्तमप्रतिमं निरीहमखण्डमीशगतम् ।। ३

सत्यस्वरूपं रामं प्रणमामि । सच्च त्यच्च सत्यम् । सच्छब्देन पृथिव्यप्तेजांसि त्यच्छब्देन वाय्वाकाशौ एवं च सत्यं भूतपञ्चकम् 'तत्सत्यमित्याचक्षते इति श्रुतेः' । सत्यस्य स्वरूपं यस्मादिति तम् । किम्भूतं रामम्—अमेयम् अपरिमितम् । 'ततो विराडजायत विराजोऽधिपूरुषः । स जातोऽत्यरिच्यत पश्चाद्भूमिमथो पुरः' इति श्रुतेः । पुनः किम्भूतम्—अक्षरमव्ययम् । पुनः किम्भूतम्—अप्रपञ्चगतम् प्रपञ्चाद्बहिर्भूतम् । पुनः किम्भूतम्—अव्यक्तम् बहिर्दृग्भिरविज्ञातम् । पुनः किम्भूतम्—अप्रतिमम् असदृशम् । पुनः किम्भूतम्—निरीहं

निश्चेष्टम् । पुनः किम्भूतम्—अखण्डम् पूर्णतमम् । पुनः किम्भूतम्—ईशैरन्तर्दृग्भिर्गतः ज्ञातस्तम् । 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । नस वेत्ति वेद्यं न च तस्याऽस्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ।' इति श्रुतेः । ३

अथान्यः स्तौति—

स्मृतिवेदहरशङ्खाऽसुरप्रतिघातदक्षतरम् ।
क्षीरोदमथनमहागमन्दरपृष्ठभागधरम् ॥ ४

स्मृतिवेदहरश्चासौ शङ्खाऽसुरस्तस्य प्रतिघाते मारणे दक्षतरः प्रवीणतरस्तं रामं प्रणमामि । किम्भूतं रामम्—क्षीरोदमथने महागश्चासौ मन्दरस्तं पृष्ठभागेन धरतीति तम् । अनेन मत्स्यकमठावतारौ सूचितौ । ४

अथान्यो धृतवाराहरूपं राममित्थं स्तौति—

उत्तुङ्गरदशिखरेण चायतभूमितूलकरम् ।
प्रह्लादपालकमसुरकालकमभ्रभेदधरम् ॥ ५

उत्तुङ्गमत्युन्नतं च तत् रदशिखरं तेनायताऽतिविस्तारा चासौ भूमिस्तस्यास्तूलकरः जलाद्वहिर्निःसारणकारकस्तम् । 'कूटोऽस्त्री शिखरं शृङ्गम्' इत्यमरः । अथान्यो नृसिंहरूपिणं रामं स्तौति—प्रह्लादपालकं रामं प्रणमामि । किम्भूतम् रामम्—असुरं हिरण्यकशिपुं कालयतीति तम् । पुनः किम्भूतम्—अभ्राणां भेदो यैस्ते अभ्रभेदाः सटास्तान् धरतीति । भागवते यथा—'सटाऽवधूता जलदाः परापतन्' इति । यद्वा—अभ्राणां भेदो येनैवंविधमद्भुतवामनरूपं धरतीति । अनेन वामनाऽवतारः सूचितः । ५

कोदण्डवाणकुठारकरतलमखिलवाहुजहम् ।
साकेतभूपतिनन्दनं सत्यादिवाहुवहम् ॥ ६

कोदण्डश्च वाणश्च कुठारश्च ते करतले यस्यैवंविधं रामं प्रणमामि । किम्भूतं रामम्—अखिलाश्च ये बाहुजाः क्षत्रियास्तान्हन्तीति तम् । अथ

कश्चिन्मुनिरिति स्तौति—साकेतभूपतिनन्दनं रामं प्रणमामि । किम्भूतं रामम्—'सत्यं च समदर्शनम्' इति भगवद्वाक्यस्मरणात् सत्यं समदर्शनम् आदि मुख्यं यस्मिन्निति सत्यादिः कल्पद्रुमस्तद्वच्च यौ बाहू सत्यादिबाहू वहति दधातीति तम् । अनेनाऽतिवदान्यत्वं सूचितम् । यद्वा—'तपः शौचं दया सत्यमिति पादाः प्रकीर्तिताः' । 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्' । इत्यादिस्मरणात् सत्यम् आदि मुख्यं येषु ते सत्यादयः धर्मपादास्तान् बाहुना वहति पुनःपुनर्यथातथ्यतां नयतीति तम् । यद्वा—वनप्रयाणसीताहरणत्यागात्मत्यागादिविपत्सु तथा रामेण सहानेकविधराज्याधिभोगादिसम्पत्सु सत्यं समदर्शनम् आदि मुख्यं यस्मिन्निति सत्यादिर्लक्ष्मणः बाहुवद्वहति सहायतां नयतीति बाहुवहः सत्यादिर्बाहुवहो तस्य तम् । अनेनैकाकी एष श्रीमद्रामचन्द्रोऽस्मद्यज्ञादिकार्यसाधने प्रभुर्यदि सलक्ष्मणस्तर्हि किमुत । ६

जलदाभमिन्दुनिभाननं किञ्जल्कपीतपटम् ।
मणिचित्रहेमकिरीटभूषितचारुभालतटम् ॥ ७

पुनः किम्भूतं रामम्—जलदाभं मेघश्यामम् । पुनः किम्भूतम्—इन्दुनिभाननं चन्द्रप्रतिमवक्त्रम् । पुनः किम्भूतम्—किञ्जल्कवत्पीतौ पटौ यस्य तम् । 'किञ्जल्कः केसरोऽस्त्रियाम्' इत्यमरः । 'वस्त्रमाच्छादानं वासश्चैलं वसनमंशुकम् । सुचेलकः पटोऽस्त्री स्यात्—'इति चाऽमरः । पुनः किम्भूतम्—मणिचित्रं च तत् हेमकिरीटं तेन भूषितं चारुभालतटं भालप्रदेशो यस्य तम् । ७

इति पठति यो रघुवीरवर्णनमुज्ज्वलं सुचिरम् ।
जयदेवनिर्मितमित्यनूपममेति मोदभरम् ॥ ८

जयदेवनिर्मितमितीदं गीतं यः पठति सः सुचिरमनन्तं मोदभरमानन्दकदम्बम् एति । किम्भूतं गीतम्—उज्ज्वलं निरपवादम् । निरपवादत्वे हेतुः । पुनः किम्भूतं—'लघि—गतौ' इति धात्वर्थातिशयात् । 'संक्रन्दनो निमिषऽएकवीरः'

इति श्रुतेश्च। रघुः सर्वातिगश्चासौ वीरः रघुवीरः श्रीरामचन्द्रस्तस्य वर्णनं यस्मिन् तत्। अतः पुनः किम्भूतम्—अनूपमम् अनुपमेयम्। किम्भूतं मोदभरम् अनूपमम्। ८

इति गीतं षष्ठम्।

अथो वितायमाने यज्ञे मारीचादिनिपातो वर्ण्यते प्राप्येति त्रिभिः—

प्राप्य नैशाचरीं सेनां श्येनालिचलदंशुकाः।
मारीचप्रमुखा भीमा ववृषू रुधिरं भृशम्॥ २

भीमाः भयङ्कराः मारीचप्रमुखाः राक्षसाः भृशं यथा स्यात्तथा रुधिरं ववृषुः। किं कृत्वा—निशाचराणामियं नैशाचरी तां सेनां प्राप्य लब्ध्वा। अनेन बहुशो रक्षःपृतनापतिभिः सहैते रावणेन प्रेषिता इति सूचितम्। किम्भूता मारीचप्रमुखाः—श्येनालिभिः श्येनपक्षिभिः चलन्त्यंशुकानि येषां ते। 'अलिः स्याद् भ्रमरे पंक्तौ स्यादालिश्च सखीजने' इति विश्वः। २

मारीचं मारयामास वायव्यास्त्रेण राघवः।
अत्यन्तव्याकुलो भूत्वा ययौ सागरसन्निधिम्॥ ३

राघवः श्रीरामचन्द्रः वायव्यास्त्रेण मारीचं मारयामास। सः मारीचः अत्यन्तव्याकुलो भूत्वा सागरसन्निधिं ययौ सागरतटे पपातेत्यर्थः। ३

ददाह पावकास्त्रेण सुबाहुं नाम राक्षसम्।
शेषास्तमीचरास्तत्र लक्ष्मणेन निपातिताः॥ ४

चेति शेषः। च पुनः सुबाहुं नाम राक्षसं पावकास्त्रेण अग्निबाणेन ददाह भस्मीचकार। तत्र तस्मिन्नेव क्षणे शेषास्तमीचराः लक्ष्मणेन निपातिताः समरशयने शायिता इत्यर्थः। ४

अथान्यामपि भगवल्लीलां वर्णयिष्यन्मिथिलामुनियानं वर्णयति प्रतिचचालेति द्वाभ्याम्—

प्रति चचाल पुरीं मिथिलामथो दशरथप्रभवानुगतो मुनिः।
गिरिशकार्मुकभङ्गमहेक्षणं क्षितिभृता जनकेन निमन्त्रितः॥ ५

मुनिः विश्वामित्रः मिथिलां प्रति चचाल प्रतस्थे। किम्भूतो मुनिः—दशरथात्प्रभवो ययोस्तौ अनुगामिनौ यस्य सः। पुनः किम्भूतः—क्षितिभृता क्षितिपेन जनकेन निमन्त्रितः निमन्त्रणं दत्त्वाऽऽहूतः। किं कृत्वा—गिरिशकार्मुकभङ्गस्य महः उत्सवः तस्य यत् ईक्षणं गिरिशकार्मुकभङ्गमहेक्षणम् उद्दिश्येति शेषः। 'मह उद्धव उत्सवः' इत्यमरः। ५

गौतमीं तारयित्वादौ नमस्कृत्य च जाह्नवीम्।
ददर्श मिथिलां पुण्यां जनकेनाऽभिपालिताम्॥ ६

मुनिः गौतमीम् अहल्याम् आदौ तारयित्वा रामेण तच्छापविमोचनं कारयित्वा। च पुनः जह्नोरियं कन्या जाह्नवी तां नमस्कृत्य प्रणम्य जनकेन राज्ञाऽभिपालितामभिरक्षितां पुण्यां पुण्यकारिणीं मिथिलां पुरीं ददर्श दृष्टवान्। ६

अथ गीतं सप्तमम्

रामोऽथ लक्ष्मणं प्रत्याह। तदेवाऽऽशावरीरागेण रूपकतालेन जयतीत्यादिना गीतेनाभिवर्ण्यते—

जयति विदेहनगरमनुरूपम्।
दिशि दिशि राजमानचामीकर-
रचितविविधमणियूपम् ॥१ ध्रुवपदम्

हे लक्ष्मण! विदेहनगरम् अनुरूपं यथा स्यात्तथा जयति सर्वोत्कर्षेणाभिवर्तते।

किम्भूतं विदेहनगरम्—दिशि दिशि राजमानाश्चामीकररचिताः विविधमणियूपाः नानामणिजटितयज्ञस्तम्भाः यस्मिंस्तत् । १

रुचिरलतातरुसुमनवाटिकावापीकूपतडागम् ।
वप्रवलयपरिखावृतमभिनवचित्रमुदयदनुरागम् ॥ २

पुनः किम्भूतं विदेहनगरम्—रुचिराः मनोहराः लतातरुसुमनवाटिकाः वापीकूपतडागाः यस्मिंस्तत् । वाटिकाः—लताश्च तरवश्च सुमनसश्चेति विग्रहे 'टाडकाः' इति डप्रत्यये कृते लतातरुसुमना इति साधुः । लतातरुसुमनानां वाटिकाः लतातरुसुमनवाटिकाः । 'वल्ली तु व्रततिर्लता' इत्यमरः' । 'वृक्षो महीरुहः शाखी विटपी पादपस्तरुः' इति चाऽमरः । 'स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्' इत्यमरः । सुमनस्शब्दः स्त्रीलिंगः 'सुमना मालती जातिः' इत्यमरः । 'पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः' इत्यमरः । पुनः किम्भूतं विदेहनगरम् वप्रः प्राकारः स एव वलयं वप्रवलयम् परितः खाता परिखा वप्रवलयं च परिखा च ताभ्याम् आवृतमावेष्टितं तत् । पुनः किम्भूतम्—अभिनवं नूतनं चित्रं रचनाविशेषो यस्मिंस्तत् । पुनः किम्भूतम्—उदयन्प्रकाशमानः अनुरागः सुधादिरागो यस्मिंस्तत् । यद्वा–'अय—गतौ' इति धात्वर्थातिशयात् उदयते इत्युदयन्तः धनुर्यज्ञनिरीक्षणायोत्कण्ठतया गच्छन्तः अनुरागाः देवाः यस्मिंस्तत् । अनु पश्चात् रागो येषां तेऽनुरागाः । २

शेषभयङ्करवेशनृपतिदुर्धर्षमहेशपिनाकम् ।
मणिमयसौधसमूहमुदग्रमरुच्चलविशदपताकम् ॥ ३

पुनः किम्भूतम्—शेषस्येव भयङ्करः वेशो यस्य तत् शेषभयङ्करवेशं तदेव नृपतिदुर्धर्षं नृपाधृष्यं महेशपिनाकं शिवधनुर्यस्मिंस्तत् । पुनः किम्भूतम्—मणिमया मणिनिर्मिताश्च ये सौधास्तेषां समूहो यस्मिंस्तत् । 'सौधोऽस्त्री राजसदनम्' इत्यमरः । पुनः किम्भूतम्—उदग्राः उन्नताः मरुच्चलाः पवनचञ्चलाः विशदाः उज्ज्वलाः प्रकाशमानाः पताकाः यस्मिंस्तत् । ३

तोरणनिकरकिरणसञ्चारविनिन्दितसुरपतिचापम् ।
आहुतिगन्धसहितमखधूमविधूतसकलजनपापम् ॥ ४

पुनः किम्भूतम्—तोरणनिकरकिरणसञ्चारेण विनिन्दितः मन्दीकृतः सुरपतिचापो यस्मिंस्तत् । पुनः किम्भूतम्–आहुतिगन्धसहितश्चासौ मखधूमस्तेन विधूतं दूरीकृतं सकलजनपापं यस्मिंस्तत् । ४

गजरथतुरगपदातिविघट्टविशृङ्खलशब्दमुदारम् ।
शारदविधुसंकाशविकाशकनककलशाश्रिततारम् ॥ ५

पुनः किम्भूतम्–गजाश्च रथाश्च तुरगाश्च पदातयश्च ते तेषां विघट्टः सङ्घट्टः गजरथतुरपदातिविघट्टः तस्य यो विशृङ्खलशब्दः कोलाहलो यस्मिंस्तत् । पुनः किम्भूतम्–उदारम् अतिविशालम् । पुनः किम्भूतम्–शारदविधुसंकाशः शरच्चन्द्रसदृशः विकाशो येषां ते च ये कनककलशास्तेषु आश्रिताः स्थापितास्ताराः शुद्धमौक्तिकमणयो यस्मिंस्तत् । 'निभसंकाशनीकाशप्रतीकाशोपमादयः' इत्यमरः । 'तारो मुक्तादिसंशुद्धौ तारणे शुद्धमौक्तिके' इति विश्वः । ५

पण्डितसुमतिसुशीलसुधर्मसुकर्ममनुजपरिवारम् ।
पतिपदपद्मनिहितनिजचित्तचतुरसुन्दरपुरदारम् ॥ ६

पुनः किम्भूतम्–पण्डिताः सुमतयः सुशीलाः सुधर्माणः सुकर्माणश्च ये मनुजास्तेषां परिवारः समूहो यस्मिंस्तत् । पुनः किम्भूतम्–पतिपदपद्मनिहितनिजचित्ताश्चतुराः सुन्दराः पुरदाराः पौरस्त्रियो यस्मिंस्तत् । 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः । ६

सुखदवितानमनेकतपोधनभूषितमतिशयलोभम् ।
पङ्कजयोनिविनिर्मितमिव कृतसन्ततमानसलोभम् ॥ ७

पुनः किम्भूतम्–सुखदानि वितानानि यस्मिंस्तत् । पुनः किम्भूतम्–अनेकाः नानाविधाश्च ये तपोधनास्तैर्भूषितम् । पुनः किम्भूतम्–अतिशयेन सर्वाधिक्येन

लोभयतीत्यतिशयलोभम् । पुनः किम्भूतं विदेहनगरम्—कृतं प्रारब्धसम्पादितं सं वस्तुवृन्दं यस्मिंस्तत् । अनेन येषां महान् प्रारब्धसञ्चयोऽस्ति त एवात्र सञ्जायन्ते निवसन्ति च तेषामेवैषाऽक्षिगोचरा भवतीति सूचितम् । यद्वा—कृतयुगस्य सं तारुण्यं यस्मिंस्तत् । 'वृषे च सः सदानन्दे सा स्त्रियां सं वनं धनम् । यौवनेऽपि समाख्यातं वस्तुवृन्दे समाहृतम्' । इति नाममालिकायाम् । एवं चास्य धर्मार्थकामास्पदत्वं दर्शयित्वाऽथ मोक्षास्पदत्वं दर्शयति—पुनः किम्भूतम्—'विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु—' 'या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता' 'या देवी सर्वभूतेषु जातिरूपेण संस्थिता' 'या देवी सर्वभूतेषु विष्णुमायेति शब्दिता' इत्यादिवाक्यस्मरणात् । स्त्रीधनजातिरूपेण तता विस्तीर्णा चासौ मा ततमा लोभेन सह वर्तमानाः सलोभाः न सलोभाः नसलोभाः ततमायां नसलोभाः यस्मिंस्तत् । यद्वा—'मन-ज्ञाने' इति धात्वर्थातिशयात् मन्यते ज्ञायतेऽनेनेति मानम्—'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । सर्वाध्यक्षः सर्वभूताधिवासः—।' इत्यादिश्रुतेः । ततस्याऽनन्तविस्तरस्य परब्रह्मणः मानं ज्ञानं ततमानं तस्मिन्सलोभाः जनाः यस्मिंस्तत् । यद्वा—'मान-पूजने' इति धात्वर्थातिशयात् ततस्य मानं पूजनं तस्मिन्सलोभाः यस्मिंस्तत् । एवमनेकधाऽस्य मोक्षास्पदत्वं सूचितम् । किमिव—पङ्कजस्य योनिरुत्पत्तिस्थानं पङ्कजयोनिः श्रीविष्णुः तेन यद्विनिर्मितं तदिव वैकुण्ठमिव । अनेन यन्मया स्वेनैव निर्मितं तदिह केनाऽनीतमित्याश्चर्यमिति सूचितम् । वैकुण्ठस्य स्वहस्तनिर्मितत्वं भागवते—'पत्नी विकुण्ठा शुभ्रस्य वैकुण्ठैः सुरसत्तमैः । तयोः स्वकलया जज्ञे वैकुण्ठो भगवान्स्वयम् । वैकुण्ठो निर्मितो येन लोको लोकनमस्कृतः' । ७

श्रीजयदेवकवेरुदितं मिथिलापुरगीतमशोकम् ।
मङ्गलमोदभरेण करोतु सदा मुदितं जनलोकम् ॥ ८

श्रीजयदेवकवेः उदितमुद्भूतं मिथिलापुरगीतं मङ्गलेन सहितो यो मोदः आनन्दः तस्य यो भरः समूहस्तेन जनलोकं मुदितम् आनन्दितं करोतु । किम्भूतं गीतम्—अशोकं शोकनाशनम् । ८

जनकोऽथ विश्वामित्रं पृच्छति—

अर्भकद्वयमवेक्ष्य मैथिलः सिंहसंहननमात्तकार्मुकम् ।
गाधिनन्दनमुवाच सादरं कस्य नाथ ! तनयौ सुलक्षणौ ॥ ७

इदमिति शेषः । मैथिलः जनकः सादरं यथा स्यात्तथा गाधिनन्दनं विश्वामित्रम् इदमुवाच । किमिदम्—हे नाथ ! सुलक्षणौ इमौ तनयौ कस्या स्तः । किं कृत्वा—अर्भकद्वयम् अवेक्ष्य । अथाऽर्भकत्वेप्यङ्गुतत्वं दर्शयति—किम्भूतमर्भकद्वयम्—सिंहसंहननं वराङ्गरूपम् । 'वराङ्गरूपोपेतो यः सिंहसंहननो हि सः' इत्यमरः । यद्वा—सिंहस्येव संहननं शरीरं यस्य तत् । 'गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः' इत्यमरः । पुनः किम्भूतम्—आत्तकार्मुकं गृहीतचापम् । ७

एवं पृष्टोऽथ विश्वामित्रो जनकं प्रति वदति—

अयोध्याधिपतिर्वीरो राजा दशरथाभिधः ।
तस्यैतौ तनयौ भूप ! प्रसिद्धौ रामलक्ष्मणौ ॥ ८

हे भूप ! एतौ तस्य तनयौ स्तः । किम्भूतौ एतौ—रामलक्ष्मणौ इति प्रसिद्धौ प्रख्यातौ इतीति शेषः । तस्य—यः अयोध्याधिपतिः राजास्ति । किम्भूतोऽयोध्याधिपतिः—दशरथाभिधः । पुनः किम्भूतः—वीरः सांयुगीनः । 'शूरो वीरश्च विक्रान्तो जेता जिष्णुश्च जित्वरः । सांयुगीनो रणे साधुः शस्त्राजीवादयस्त्रिषु' इत्यमरः । ८

एवमुक्त्वाऽथ स्वाभिप्रायमाविष्करोति—

कुत्र माहेश्वरं चापं सर्वराजमदापहम् ।
दर्शयाशु महाराज ! राघवाय महात्मने ॥ ९

हे महाराज ! सर्वराजमदापहो माहेश्वरश्चापः कुत्राऽस्ति तं चापं राघवाय सर्वातिवर्तिने श्रीरामचन्द्राय आशु शीघ्रं दर्शयाऽऽलोकय । किम्भूताय

राघवाय—महात्मने महान्ति आत्मानि आत्मवाचकानि धृतिबुद्धियत्नस्वभावात्म-गात्राणि यस्य स महात्मा तस्मै । 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च' इत्यमरः । ९

ततो दर्शिते धनुष्यन्यामपि तल्लीलां वर्णयति—आदायेति द्वाभ्याम्—

आदाय दक्षिणे पाणौ महावीरो रघूत्तमः ।
खण्डयामास कोदण्डमिक्षुदण्डमिव द्विपः ॥ १०

महावीरोऽतिसांयुगीनो रघूत्तमः श्रीरामचन्द्रः दक्षिणे पाणौ कोदण्डं धनुरादाय खण्डयामास । कः कमिव—द्विपः हस्ती इक्षुदण्डमिव । इक्षुर्महारसो वेणुर्मिश्रितो गुरुपत्रकः' इति निघण्टुः । १०

रघुवरभुजदण्डखण्डितस्य त्रिपुररिपोर्धनुषः प्रचण्डघोषः ।
प्रसरति धरणीनभोऽन्तराले मुखरितदिग्विजयो जयोदयोऽसौ ॥ ११

त्रिपुररिपोः शिवस्य धनुषः प्रचण्डघोषः उत्कटशब्दः धरणीनभोऽन्तराले पृथिव्याकाशयोर्मध्ये प्रसरति स्म । अत्र स्मेति शेषः । किम्भूतस्य धनुषः—रघुवरभुजदण्डखण्डितस्य । किम्भूतः प्रचण्डघोषः—मुखरितः दिशि दिशि प्रकटीकृतः दिग्विजयो येन सः । ११

अथ गीतमष्टमम्

अथैतद्धनुर्भङ्गघोषश्रवणादागते परशुरामे रामलीलामपि वर्णयन्परशुरामं निरूपयति परशुराममित्यादिना गीतेन । गीतस्यास्याऽऽशावरीरागो रूपकतालः—

परशुराममवलोक्य सकोपम् ।
रघुपतिरभिजहर्ष युगबाहु-
विहितबहुबाहुजलोपम् ॥ १ ध्रुवपदम्

रघुपतिः सकोपं परशुरामम् अवलोक्य अभिजहर्ष आनन्दितवान् । किम्भूतं

परशुरामम्—बाहुभ्यां जाताः बाहुजाः तेषां लोपः बाहुजलोपः युगमितौ च तौ बाहू ताभ्यां विहितः बहुवारं बाहुजलोपो येन तम् । १

भृकुटीकुटिलमरुणवदनं रदखण्डितरदपरिधानम् ।
दधतमिव द्युमणिं शशिनं सकुजं ससितं कृतमानम् ॥ २

पुनः किम्भूतं परशुरामम्—भृकुट्यौ कुटिले यस्य तम् । पुनः किम्भूतम्—अरुणवदनम् । पुनः किम्भूतम्—रदाभ्यां दन्ताभ्यां खण्डितं दष्टं रदपरिधानम् ओष्ठौ येन तम् । 'ओष्ठाधरौ तु रदनच्छदौ दशनवाससी' इत्यमरः । किम्भूतमिव—द्युमणिं दधतमिव । किम्भूतं द्युमणिम्—सकुजं सभौमम् । अनेन रदखण्डितैकाधरार्द्धभागो द्युमणिरिवादृश्यतैको भौम इवादृश्यत इति सूचितम् । 'द्युमणिस्तरणिर्मित्रः' इत्यमरः 'अङ्गारकः कुजो भौमः' इत्यमरः ।पुनः किम्भूतमिव—ससितं सशुक्रं शशिनं चन्द्रमसं दधतमिव । अनेनैको रदः शशीवादृश्यतैकः शुक्र इवादृश्यत इति सूचितम् । पुनःकिम्भूतं परशुरामम्—कृतः मानो येन तम् । 'गर्वोऽभिमानोऽहङ्कारो मानश्चित्तसमुन्नतिः' इत्यमरः । २

रुचिरजटामुकुटद्युतिपुञ्जविभासिमनोहरभालम् ।
पाणिसरोजनिहितशरचापकुठारमतीव करालम् ॥ ३

पुनः किम्भूतम्—रुचिराः मनोहराः याः जटास्ता एव मुकुटं तस्य यो द्युतिपुञ्जस्तेन विभासी विशेषतः शोभमानो मनोहरः भालः कपालो यस्य तम् । 'शिखा चूडा केशपाशी व्रतिनस्तु सटा जटा' इत्यमरः । पुनः किम्भूतम्—शरेण-सहितश्चासौ चापः शरचापः शरचापश्च कुठारश्च शरचापकुठारौ पाणी एव सरोजे पाणिसरोजे तयोर्निहितौ न्यस्तौ शरचापकुठारौ येन तम् । 'पञ्चशाखः शयः पाणिः' इत्यमरः 'कलम्बमार्गणशराः' इत्यमरः 'धनुश्चापौ' इत्यमरः 'द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः' इत्यमरः । पुनः किम्भूतम्—अतीवकरालम् अत्यन्तभीषणम् । यद्वा—वयोविद्यातपस्तेजःपराक्रमैः अतीवकरालम् अतिसमुन्न-

तम् । 'करालो दन्तुरे तुङ्गे भीषणे चाभिधेयवत् । दन्तुरस्तून्नतरदे तथोन्नतनते त्रिषु' इति भानुजीदीक्षितः । ३

एककविंशतिवारमहाविजयस्फुटशं गजलेखम् ।
भूतिविभूषितविग्रहभागमनूपमरूपमशेषम् ॥ ४

पुनः किम्भूतम्—'स्फुट—विकशने' विशेषेण जीयन्ते शत्रवोऽस्मिन्निति विजयः संग्रामः महांश्चासौ विजयः महाविजयः महाविजये स्फुटन्त इति महाविजयस्फुटाः क्षत्रिया एककविंशतिवारं महाविजयस्फुटान् श्यति तनूकरोतीति एकक-विंशतिवारमहाविजयस्फुटशस्तम् । यद्वा—एककविंशतिवारं महाविजये स्फुटं शं कल्याणं यस्य तम् । 'श्वःश्रेयसं शिवं भद्रम्' इत्यमरः । पुनः किम्भूतम्—गजाख्या लेखा यस्य तम् । गजलेखाफलं यथा—'पुंसो यस्य करे चास्ति गजाख्या रेखिका शुभा स पुमानेकवीरः स्याद्धनी मानी भुवः पतिः' एतदेव विशिनष्टि । पुनः किम्भूतम् — भूतिभिरणिमादिभिर्विभूषिताः विग्रहभागाः समस्ताङ्ग—प्रदेशाः यस्य तम् । 'अणिमा महिमा चैव गरिमा लघिमा तथा । प्राप्तिः प्राका-म्यमीशित्वं वशित्वं चाष्टभूतयः' इत्यमरः । यद्वा—भूत्या भस्मना विभूषिता विग्रहभागाः यस्य तम् 'गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः' इत्यमरः । पुनः किम्भूतम्—अनु पश्चादुपमा यस्य तदनूपमम् अनूपमम् अनूपमेयं रूपं यस्य तम् । पुनः किम्भूतम्—न कश्चित् शिष्यतेऽनेनेत्यशेषः एकादशो रुद्रः अशेष इव भवतीत्यशेषस्तम् । अनेन क्षत्रियाणां महाकाल इवाऽदृश्यत इति सूचितम् । ४

ललितसुमेरुवलयपरिवीतमुमापतिशिष्यमुदारम् ।
चन्द्रविशदमखतन्तुसमेतमलिप्रभनिश्चलतारम् ॥ ५

पुनः किम्भूतम्—ललितः सुमेरुर्येषु तानि च वलयानि ललितसुमेरुवलयानि तानि परिवीतानि परिधृतानि येन तम् । पुनः किम्भूतम्—उमापतिशिष्यं तदेव विशिनष्टि । पुनः किम्भूतम्—उदारम् अतिवदान्यम् । 'उदारो दातृमहतोः'

इत्यमरः । पुनः किम्भूतम्—चन्द्रविशदश्चासौ मखतन्तुर्यज्ञोपवीतं तेन समेतः सम्पन्नस्तम् । पुनः किम्भूतम्—अलिप्रभे भ्रमराभे निश्चले तारे अक्षिकनीनिके यस्य तम् । ५

अस्त्रशस्त्रसम्भूतमहाव्रणवक्षसमाहवधीरम् ।
कटितटयुगलनिषङ्गधरं जलवाहकशब्दगभीरम् ॥ ६

पुनः किम्भूतम्—अस्त्रशस्त्रसम्भूताः महाव्रणाः वक्षसि यस्य तम् । 'अस्त्रं मन्त्राभिषिक्तं स्याच्छस्त्रं साधारणं स्मृतम्' इति हलायुधः । पुनः किम्भूतम्—आहवे समरे धीरः पण्डितस्तम् । 'अभ्यामर्दसमाघातसङ्ग्रामाभ्यागमाहवाः' इत्यमरः । 'धीरो मनीषी ज्ञः प्राज्ञः सङ्ख्यावान्पण्डितः कविः' इत्यमरः । पुनः किम्भूतम्—कटितटे युगलनिषङ्गं धरतीति तम् । 'युग्मं तु युगलं युगम्' इत्यमरः । 'तूणोपासङ्ग-तूणीरनिषङ्गा इषुधिर्द्वयोः' इत्यमरः । पुनः किम्भूतम्—जलवाहको मेघः तस्येव यः शब्दः सः गभीरो यस्मिंस्तम् । ६

'शिवशिवशिव' शिवमन्त्रममुं जपमानमरिक्षयहेतुम् ।
दर्भपटीमृगचर्मयुतं भृगुवशमनुत्तमकेतुम् ॥ ७

पुनः किम्भूतम्—'शिवशिवशिव'—अमुं शिवमन्त्रं जपमानम् । किम्भूतं शिवमन्त्रम्-अरिक्षयस्य रिपुविनाशस्य हेतुः कारणं तम् । यद्वा—अरीणाम् अहमादिशत्रूणां क्षयो यस्मिन्नित्यरिक्षयो मोक्षस्तस्य हेतुस्तम् । पुनः किम्भूतं परशुरामम्—दर्भैर्निर्मिता चासौ पटी दर्भपटी कुशानिर्मितवस्त्रविशेषं तच्च मृगचर्म च ताभ्यां युतस्तम् । पुनः किम्भूतम्—भृगुवंशस्य समुन्नतकेतुरिव भवतीति तम् । 'ग्रहभेदे ध्वजे केतुः' इत्यमरः । ७

श्रीजयदेवकवेरुदितं द्विजराजमहाभटरूपम् ।
पूरयतु प्रणतस्य जनस्य मनोरथमामनुरूपम् ॥ ८

श्रीजयदेवकवेः उदितं कोऽर्थः श्रीजयदेवस्येयं गीतात्मिका वाणी 'णम—प्रह्वत्वे शब्दे च' इति धात्वर्थात् प्रणतस्यैतद्गानादिशब्दकरणे प्रवृत्तस्य

जनस्य मनोरथं पूरयतु। 'ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती। व्याहार उक्तिर्लपितं भाषितं वचनं वचः' इत्यमरः। उदितमिति भाषितस्यैव पर्याय इति ज्ञेयम्। किम्भूतमुदितम्—प्रशस्तो महाभटो महाभटरूपः द्विजराजः श्रीपरशुरामः महाभटरूपो यस्मिंस्तत्। अत्र 'प्रशंसायां रूपः' इति रूपप्रत्ययः। पुनः किम्भूतम्—प्रशस्तश्चासौ मनुः मनुरूपः आ समन्तात् मनुरूपः इत्यामनुरूपम्। अनेनाऽत्र कालाहिना दष्टस्यैतदेव महामन्त्रश्चैतदेव। महौषधमिति सूचितम्। 'मनू राजविशेषे स्यादोषधीषु मनुः स्मृतः जपादौ च मनुः प्रोक्तो मन्त्रे भैषज्य-कर्मणि' इति हलायुधः। ८

इति गीतमष्टमम्।

एवं तावत्परशुरामरूपं निरूप्याथ तद्वाक्यं निरूपयति नाट्यारमिति—

नाट्यारं प्रकरोतु कार्मुकलता विन्यस्तु हस्ताम्बुजः,
किञ्चित्पाटलभासिलोचनयुगे तावन्निमेषोदयान्।
यावच्छायककोटिपाटितरिपुक्ष्मापालमौलिस्खलन्,
मल्लीमाल्यपतत्परागपटलैर्नाऽऽमोदिता मेदिनी॥ १२

मे कार्मुकलता तावत् पाटलभासिलोचनयुगे किञ्चित्सूक्ष्मं नाट्यारं प्रकरोतु नाट्ये ऋच्छतीति नाट्यारस्तं नाट्यारं नाट्यकलाकौतुकविशेष-मनुभवतु। पाटला चासौ भाः पाटलभाः सा विद्यते यस्य तत्पाटलभासि लोचन-युगं यस्य सः पाटलभासिलोचनयुगः शिवः तस्मिन् पाटलभासिलोचनयुगे शिवे कोऽर्थः शिवं निमित्तीकृत्य अत्र 'निमित्तात्कर्मयोगे सप्तमी वक्तव्या' इति द्वितीयाऽर्थे सप्तमी ज्ञातव्या। 'सीम्नि पुष्कलको हतः' इत्यत्रवत्। शिवचापभञ्जनात् शिव-निमित्तमेव युद्धम्। शिवरूपं श्वेतनेत्रमेकं श्वेतं चन्द्रमयत्वात्। नेत्रद्वयं पाटलं सूर्याग्निमयत्वात् 'श्वेतरक्तस्तु पाटलः' इत्यमरः 'युग्मं तु युगलं युगम्' इत्यमरः। यद्वा—मे लोचनयुगे नेत्रयुगसमीपे लतेव भवतीति लता कार्मुकयेव लता नर्तकी कार्मुकलता नाट्यारं नाट्यगतिविशेषं करोतु कुर्यात्। किम्भूते लोचनयुगे—

पाटला भाः यस्य तस्मिन्। अनेन राजानो राजभटास्तावद्वैरिविनाशदिदृक्षवो भवन्ति वैरिविनाशे च सति तदनु स्वस्य पुरो नृत्यमानां नर्तकीं पश्यन्तोऽतिमुद-माप्नुवन्ति। अहं तु वैरिविनाशं कार्मुकलतानर्तकीनर्तनं च सहैवालोकयन्ननुत्तम-तमां मुदमाप्नोमीति सूचितम्। मे हस्ताम्बुजः नितरामतिशयेन मेषे मेषराशौ उदयम् उच्चत्वप्राप्तिर्येषां ते निमेषोदयाः सूर्यास्तान् विन्यस्तु आवृणोतु वाणै-रिति शेषः। बहुवचनं त्वत्र रवेर्द्वादशरूपत्वाभिप्रायेण। अनेनैते रामादय एतद्वंशीया-स्ततस्तद्विनाशमसहिष्णुरेवायं मत्कार्मुकलतां शोषयिष्यन्नुदितवान्। किञ्च नाट्य-गतिर्वितानादृते सम्भवति। तत एनं तावदेव स्वविशेषवितानेनाच्छादयामीति सूचितम्। ननु कियत्कालावधीति चेत्तत्राह—यावत् शायकानां या कोटयः ताभिः पाटिताः विदीर्णाश्च ये रिपुक्ष्मापालास्तेषां ये मौलयस्तेभ्यः स्खलन्ति यानि मल्ली-माल्यानि तेभ्यः पतन्ति यानि परागपटलानि तैः मेदिनी पृथिवी नामोदिता न सौगन्ध्यवती स्यात्। 'समूहे पटलं न ना' इत्यमरः। अत्र विशेषणीभूताम्बुजशब्देन लताशब्देन किञ्चिच्छब्देन च कृतपूर्वयुद्धायेच्छया मनः सम्भावितैतद्युद्धस्य लाघवं सूचितम्। १२

श्रुत्वा रामदेवः—

रमन्ते युद्धाजिरे क्रीडन्तीति रामाः मारीचविराधेन्द्रजिद्रावणादयस्ता-न्दीव्यति बिजिगीषतीति रामदेवः श्रीरामचन्द्रः श्रुत्वा महाशौर्योपबृंहितैत-त्परशुरामवाक्यमाकर्ण्य उवाचेति शेषः। अनेनातिकठीयसीरपि परशुरामवाचो निशम्य न तद्विजिगीषुरासीत्किन्तु तमनुनेतुमेवैच्छदिति सूचितम्।

तदेवाह भृगुतिलकेति—

भृगुतिलक! नमस्ते योगिनामग्रगण्य!,
त्रिपुहरसुशिष्य! श्रीपतेः षष्ठमूर्ते!।
वितर मयि सुदृष्टिं प्रेमपूर्णां महर्षे!,
जहिहि प्रबलरोषं दोषभूतं सदैव॥ १३

भृगुः परशुरामस्य पूर्वः भृगोः तिलकः भृगुतिलकः तत्सम्बुद्धौ हे भृगुतिलक ! अनेन ब्राह्मणी तनुर्ममातिप्रेयसी तत एव भवत्पूर्वस्य भृगोश्चरणाकृतिर्मयोरसि धृता भवच्चरणरजः शिरसा वोढुमीहे भृगोरपि भवान्मम गरीयानस्तीति सूचितम् । हे योगिनां भृगुसनातनादीनां मध्ये अग्रगण्य पुरोगणनीय, हे त्रिपुरहरसुशिष्य ! श्रियः पतिः श्रीपतिस्तस्य षष्ठी चासौ मूर्तिः षष्ठमूर्तिस्तत्सम्बुद्धौ हे श्रीपतेः षष्ठमूर्ते ! मयि शोभना चासौ दृष्टिः तां वितर वितनु । कृपां कुर्वित्यर्थः । किम्भूतां सुदृष्टिम्—प्रेम पूर्णं यस्यां ताम् । हे महर्षे ! हे महामुने ! प्रबलश्चासौ रोषस्तं जहिहि मुञ्च । तत्कुतः—यतः किम्भूतं प्रबलरोषं सदैव दोषभूतं सर्वदापि त्रिदोषवत् क्लेशदम् । अनेन त्रिदोषज्वरः स्वावधावेव क्लेशकृदयं त्वत्र जन्मनि जन्मान्तरेष्वपि न विमुञ्चतीति सूचितम् । 'दोषो वातादिके दोषे' इति कोशात् । 'कोपक्रोधामर्षरोष' इत्यमरः । १३

परस्परविवादे नजातक्रोधो रघूत्तमः ।
चकर्ष सहसा भीमं भार्गवीयं शरासनम् ।। १४

परस्परविवादे अन्योन्यप्रवादे न जातः क्रोधो यस्य सः नजातक्रोधः । अत्र नाकादित्वान्नञोऽकारादेशाभावः । रघूत्तमः : श्रीरामः । भार्गवस्येदं भार्गवीयं शरासनं सहसा चकर्ष झटित्याकृष्टवान् । अत्र सहसेति पदेन मुनिना सह संग्रामोऽस्माकमयशस्यस्ततोऽस्मद्भाग्यादेवैतन्मुखान्निःसृतमस्मदीयं धनुराकर्षेति हर्षातिशयत्वं सूचितम् । किम्भूतं शरासनम्—भीमं स्वस्य दर्शनेनैव केतूदयमिव शत्रूणामतिभयानकम् । १४

अथ गीतं नवमम्

अथ धनुराकर्षणादेवागतज्ञानो मुनिः स्तौति वसन्तरागेण रूपकतालेन जय रामेति गीतेन—

जय रामचन्द्र ! कमलाविहार !।
जय कोशलेश ! करुणावतार !।। १

हे रामचन्द्र ! हे कमलाविहार ! जय हे कोशलेश ! हे करुणावतार ! जय स्वकीयोत्कर्षतया साक्षाद् भव । अत्र वीप्सायामपि द्विर्वचनाभावोऽतिमोदातिशयद्योतनाय । १

रघुवंशकमलकाननदिनेश !।
कन्दर्पकोटिकमनीयवेश !।। २

पुनः किम्भूत—रघुवंश एव कमलकाननं पद्मवनं तद्विकासनाय दिनेश इव तत्सम्बुद्धौ । पुनः किम्भूत—कंदर्पात्कामात्कोटिगुणं कमनीयः मनोज्ञः वेशः शरीरावेशो यस्य तत्सम्बुद्धौ । २

अथ कमनीयत्वेऽपि अद्भुतत्वं दर्शयति—

कालाऽग्निसदृशकोपातिरेक ! ।
गन्धर्वगीतपूरितविवेक ! ।। ३

पुनः किम्भूत—कालाऽग्निना प्रलयानलेन सदृशः कोपातिरेकः क्रोधातिशयो यस्य तत्सम्बुद्धौ । अथ कोपातिरेकत्वेऽप्यद्भुतत्वमस्तीत्याह—पुनः किम्भूत—गन्धर्वगीतः पूरितः पूर्णः विवेको विशिष्टज्ञानं यस्य तत्सम्बुद्धौ । अस्यायमर्थः—यः कश्चित्कोपवान् भवति तस्मिन्नीषदपि ज्ञातृत्वं न सम्भवति त्वयि महती ज्ञातृतास्तीति चित्रमिति । ३

रजनीचरप्रकरविपिनदाव ! ।
वेदान्तवेदगणभणितभाव ! ।। ४

पुनः किम्भूत—रजनीचराः निशाचराः तेषां ये प्रकराः समूहाः त एव विपिनानि वनानि तेषां दहनाय दाव इव वनाग्निरिव भवतीति तत्सम्बुद्धौ । पुनः किम्भूत—वेदान्तवेदगणैः भणितः व्याख्यातः भावो भावना त्रैकालिकसत्यत्वं वा यस्य तत्सम्बुद्धौ । अनेन वेदान्ताः वेदगणाश्च स्वस्वरूपाण्यधिष्ठाय भगवन्तं त्वामनुवर्णयन्तोऽद्यापि न पारं गच्छन्तीति सूचितम् । ४

वागीश ! सर्वविद्याविचार ! ।
ब्रह्मादिवन्द्य ! हृतभूमिभार ! ।। ५

पुनः किम्भूत—वागीशस्येव सर्वविद्यासु विचारस्सञ्चारो यस्य तत्सम्बुद्धौ । यद्वा—हे वागीश ! अनेन ब्रह्माऽपि त्वमेवेति सूचितम् । सर्वस्वरूपा चासौ विद्या सर्वविद्या महामाया तस्याः विचारः सञ्चारो यस्मिंस्तत्सम्बुद्धौ । अनेन यं विराडित्याहुः स त्वमेवेति सूचितम् । पुनः किम्भूत—ब्रह्मादिभिर्वन्द्यते इति ब्रह्मादिवन्द्यः तत्सम्बुद्धौ । अनेन ब्रह्मा मत्सूनुस्तत्सूनुर्भृगुस्त्वद्वंशीयोऽयमिति मत्वा मत्कृतप्रवादरूपापराधं क्षमस्वेति सूचितम् । पुनः किम्भूत— हृतः भूमिभारो येन तत्सम्बुद्धौ । ५

मदमोहकामपन्नगखगेश ! ।
शरदिन्दुनिभाननकुटिलकेश ! ।। ६

पुनः किम्भूत—मदमोहकामा एव पन्नगाः महासर्पास्तेषां ग्रसनाय खगेश इव भवतीति तत्सम्बुद्धौ । पुनः किम्भूत—शरदि वर्तमानश्चासौ इन्दुः तत्सदृशम् आननं यस्य तत्सम्बुद्धौ । पुनः किम्भूत—कुटिलाः केशाः यस्य तत्सम्बुद्धौ । ६

तडिदाभवसन ! रमणीयहास ! ।
कुन्दाभदशन ! मायाविलास ! ।। ७

पुनः किम्भूत—तडिदाभानि वसनानि यस्य तत्सम्बुद्धौ । पुनः किम्भूत—रमणीयः हासो यस्य तत्सम्बुद्धौ । पुनः किम्भूत—कुन्दाभाः कुन्दकुड्मलप्रभाः दशना यस्य तत्सम्बुद्धौ । पुनः किम्भूत—मायया विलासो यस्य तत्सम्बुद्धौ ।७

अथाकर्णमाकृष्टधनुषं श्रीमद्रामचन्द्रं विलोक्याह—

जयदेवविनयमतिशयमवेहि ।
निजचरणकमलमधुमेऽव देहि ।। ८

हे ए ! हे विष्णो ! अव मां रक्ष । निजचरणकमलयोः यो मधु मकरन्दस्तत् देहि ददस्व । अनेन भवदीयभक्तचरणारविन्दमकरन्दास्वादनार्थैहिकां मम गतिं रक्ष नेतरामित्यनुक्तमपि सूचितम् । 'अः शिवे केशवे वायौ' इत्यक्षरनाममालिकायाम् । अ एव इः इति विग्रहे 'स्वार्थेऽपि' इतीञ्प्रत्यये सति तदनु 'यस्य लोपः' इत्यकारलोपे सति 'इः' इति रूपं भवति तत्सबुद्धौ हे ए ! इति साधुः । अथ स्वस्य पुरो वर्तमानमहरहः पिपठिषन्तं स्वशिष्यवर्गमवलोकयन्नाह—विनीयते स्तव्यो विशिष्टतां नीयतेऽनेन विनयः स्तुतिः जयदेवेन निर्मितः विनयो यस्मिन् गीते तत् जयदेवविनयम् अतिशयम् अवेहि स्वर्गापवर्गसाधनोत्कृष्टतरं जानीहि । ८

इति गीतं नवमम् ।

तदनुक्तधनुःसंहारं श्रीरामं प्रणमति वन्दे शारदेत्यादिना—

वन्दे शारदपूर्णचन्द्रवदनं वन्दे कृपाम्भोनिधिं,
वन्दे शम्भुपिनाकखण्डनकरं वन्दे स्वभक्तप्रियम् ।
वन्दे लक्ष्मणसंयुतं रघुवरं भूपालचूडामणिं,
वन्दे ब्रह्म परात्परं गुणमयं श्रेयस्करं शाश्वतम् ।।१५

हे भगवन् ! अहं त्वां वन्दे प्रणमामि । अनेन मुनिः स्वाश्रमं प्रति अजिगमिषदिति सूचितम् । यतः सर्वोऽपि यत्सकाशाज्जिगमिषति तमवश्यमेव नमतीति हेतोः । किम्भूतं त्वाम्—शारदपूर्णचन्द्रवदनं शारदः पूर्णश्चासौ चन्द्रस्तद्वद्वदनं यस्य तम् हे भगवन् ! कृपाम्भोनिधिं दयासिंधुं त्वामहं वन्दे । हे भगवन् ! अथ शम्भुपिनाकभञ्जनकरं त्वामहं वन्दे । अनेन धनुर्भञ्जनद्वारा कृपालुना भवता मत्कोपातिरेकता निराकृतेति प्रेमातिशयत्वं सूचितम् । पुनस्तदेव—स्वभक्ताः प्रियाः यस्य तम् एवं विधं त्वामहं वन्दे । अथ कियन्ति पदानि गत्वा लक्ष्मणं प्रति कृतानेकविवादाननुस्मृत्य पुनरागत्याह—हे भगवन् ! लक्ष्मणसंयुतं त्वामहं वन्दे । किम्भूतं त्वाम्—रघुवरं रघूणां मध्ये वरस्तम् । यद्वा—रघवो वराः येन तम् । यद्वा—रङ्

(लङ्) घन्ते रागादीनतिक्रम्य त्वामनुवर्तन्त इति रघवस्त्वद्भक्तास्ते वराः यस्य तम् । पुनः किम्भूतम्—भूर्लोकः आदिः कर्मभूमित्वात्प्रधानो येषां ते भ्वादयः तेषां ये पालाः भूपालास्तेषां चूडामणिस्तं भूपालचूडामणिं लोकपालशिरोभूषणम् । पुनस्तदेव विवृणोति—हे भगवन् ! गुणानां प्राचुर्यं यस्मिंस्तं गुणमयम् अनन्तगुणम् एवम्भूतं ब्रह्म सर्वव्यापिनमीश्वरं त्वामहं वन्दे । किम्भूतं त्वाम्—परात्परम् परं निर्गुणं तस्मात्परम् उत्कृष्टम् । ततोऽप्यतिविलक्षणम् । अस्याऽयमर्थः—निर्गुणं तत्त्वे स्वरूपं कथंचित्केचिद्विद्वांसो मुनयः सनकादयो जानन्ति । सगुणोऽयं भगवान्यथाऽसि तथा तैरपि ज्ञातुमशक्योऽसि । पुनः किम्भूतम्—श्रेयः कल्याणं करोतीति तम् । पुनः किम्भूतम्—शाश्वतं त्रिष्वपि कालेषु वर्तमानम् । अत्र पुनः पुनः क्रियापदापादनेन जिगमिषुः परशुरामो रामाभिवादनं कृत्वा कियत्कियद् दूरात्पुनःपुनरागत्यागत्यानम्यानम्य कथंचिन्निववृते इति स्नेहवैकल्यं सूचितम् । १५

तस्मिन्गते परशुराममुनावरण्यमा-
नीय पङ्क्तिरथमात्मपुरोहितेन ।
पूजाञ्चकार महतीं विधिना विधिज्ञः,
पप्रच्छ शारदशिवं जनकाऽधिराजः ॥१६

•

इति श्रीमद्रामगीतगोविन्दे महाकाव्ये
श्रीजयदेवकृतौ विजितपरशुरामो
नाम द्वितीयः सर्गः ॥ २

•

तस्मिन्परशुराममुनौ अरण्यं वनं गते सति जनकाधिराजः आत्मपुरोहितेन सतानन्देन पङ्क्तिरथं दशरथम् आनीय विधिना शास्त्रोक्तविधानेन महतीं पूजां चकार । किम्भूतो जनकाऽधिराजः विधिज्ञः शास्त्रविधानवित् । पूजनानन्तरम् । शारदा सरस्वती शिवा कल्याणरूपा यस्मिन्कर्मणि तत् शारदशिवं स्निग्धवचनं यथा स्यात्तथा पप्रच्छ कुशलं पृष्टवान् । १६

इति श्रीमद्रामगीतगोविन्दार्थविवर्णने द्वितीयः सर्गः । २

•
•
•

तृतीयसर्गः

अथ श्रीजयदेवः श्रीमद्भगवतो रामचन्द्रस्य विवाहोत्सवं वर्णयति। दर्शिता-ध्वेत्यादिभिः—

दर्शिताऽध्वा विनीतेन सतानन्दपुरोधसा।
ययौ जनकराजस्य मण्डपं मणिमण्डितम्॥ १

सतानन्दपुरोधसा दर्शितः अध्वा मार्गो यस्य सः दर्शिताध्वा श्रीरामचन्द्रः जनकराजस्य मण्डपं ययौ। किम्भूतेन सतानन्दपुरोधसा-विनीतेन विधिविचक्षणेन। किम्भूतं मण्डपम्—मणिमण्डितं नानामणिविभूषितम्। अस्यायमर्थः—नानामांगलिक-वस्तूपपन्नारातिकपात्रादिपाणिपुंभिः सह श्रीसतानन्दो द्वारदेशागतस्य तिलकं कृत्वा मण्डपस्थलमानीयाधिष्ठापयामास। १

अपरं किमिति चेत्तत्राह—

भृगुसनातननारदपर्वताऽ-
त्रिशुकदत्तमरीचयः।
पुलहदेवललोमशकुम्भजाः,
प्रणयपूर्वकमाहुरहो खिलाः॥ २

भृगुश्च सनातनश्च नारदश्च पर्वतश्च अत्रिश्च शुकश्च शौनकश्च दत्तश्च मरीचिश्च ते तथा। पुलहश्च देवलश्च लोमशश्च कुम्भजश्च ते तथा। प्रणय-पूर्वकं यथा स्यात्तथा खिला आहुः ऋचः प्रोचुः—'खिलं खण्डे ऋचि प्रोक्तं ब्रह्मनिर्वाणकर्मसु' इति विश्वः। २

सतानन्दवसिष्ठाभ्यामाज्ञप्तो रघुनन्दनः।
तस्थौ सिंहासनेऽदिव्ये सीतया सह मञ्जुले॥ ३

रघुष्ववतीर्य लोकानानन्दयतीति रघुनन्दनः श्रीरामचन्द्रः सीतया जानक्या सह सिंहासने तस्थौ। किम्भूते सिंहासने—अदिव्ये न अन्यत् दिव्यं यस्मात् तत् अदिव्यं तस्मिन् अदिव्ये अनन्योपमे। पुनः किम्भूते—मञ्जुले मनोहरे। किम्भूतो रघुनन्दनः—सतानन्दवसिष्ठाभ्यामाज्ञप्तः दत्तादेशः। ३

अथ गीतं दशमम्

तत्र सदेवनिकरः पुरोहितः—

तत्र तदा काले देवनिकरैः सह वर्तमानः सदेवनिकरः पुरोहितः सतानन्दः जगाद। ययेष्टया जनतया पुरः पुरस्ताद् भाविवृत्तं हितमभीष्टं यस्य स पुरोहितः इति व्युत्पत्त्या यथार्थोऽस्म्यहमिति जहर्षेत्यर्थः।

तदेव विवृणोति रामकरीरागेण श्रीरामरूपमित्यादिना गीतेन। गीतस्याऽस्य रूपको नाम तालः—

श्रीरामरूपमनूपमं पश्यामि तापहरम्।
जलदेन्द्रनीलमणिप्रभं शरदिन्दुवक्त्रधरम्॥ १ ध्रुवपदम्

अहं श्रीरामस्य रूपं श्रीरामरूपं पश्याम्यवलोकयामि। किम्भूतं श्रीरामरूपम्—तापहरं तापत्रयापहम्। पुनः किम्भूतम्—अनूपमम् अनुगता उप समीपे मा सीता यस्येति तत्। यद्वा—अनुगता पश्चाद् गता विमुखा उपमा यस्मिंस्तत्। अनेन यथाऽस्ति तथा कथंचित्केनचित्प्रकारेणापि न वर्ण्यते। पुनः किम्भूतम्—जलदश्च इन्द्रनीलमणिश्च तौ जलदेन्द्रनीलमणी तयोरिव प्रभा छविर्यस्य तत्। अत्यानन्दजन-कत्वात् शरदिन्दुवच्च तत् वक्त्रं शरदिन्दुवक्त्रं तद्धरतीति तत्। १

कनकासने मणिमण्डपे सपरिच्छदेऽधिगतम्।
जनकाऽधिराजसुतासमेतमशेषयोगिमतम्॥ २

पुनः किम्भूतं श्रीरामरूपम्—मणिनिर्मितश्चासौ मण्डपः तस्मिन्मणिमण्डपे

मणिमयविवाहयूपस्थले कनकनिर्मितं स्वर्णघटितं च तदासनं कनकासनं तस्मिन् अधिगतम् अधिष्ठितम् । किम्भूते कनकासने–सपरिच्छदे सास्तरणोपधाने । पुनः किम्भूतं श्रीरामरूपम्–जनकाधिराजसुतासमेतम् । पुनः किम्भूतम्–अशेषाश्च ये योगिनो मुनयस्तेषां मतम् इष्टम् । अनेनैतदेव योगिनो ध्यायन्ति चैतद्ध्यानादेव सर्वसिद्ध्यास्पदत्वं लभन्त इति सूचितम् । २

चपलाविभूषितसजलजलधरमिव मनोहरणम् ।
किञ्जल्कपीतदुकूलसङ्कुलमिन्दिरारमणम् ॥ ३

पुनः किम्भूतम्—मनः हरतीति मनोहरणम्, मनः कान्तं मनोवशीकरणम् । कमिव चपलाविभूषितसजलधरमिव चपलाविभूषितः सजलः प्रावृट्कालिकश्चासौ जलधरस्तमिव । अत्र पूर्णोपमाऽङ्कारः । 'तडित्सौदामनीविद्युच्चञ्चलाचपला अपि' इत्यमरः । पुनः किम्भूतम्—किञ्जल्कवत्पीतं च तत् दुकूलं तेन संकुलं सम्पन्नम् । 'किञ्जल्कः केसरो स्त्रियाम्' इत्यमरः । दुकूलमुत्तरीयम् । पुनः किम्भूतम्—इन्दिरा रमते यस्मिंस्तदिन्दिरारमणं रमाक्रीडास्पदम् । 'इन्दिरा लोकमाता मा क्षीरोदतनया रमा' इत्यमरः । ३

केयूरकुण्डलमुकुटकंकणमुद्रिकारुचिरम् ।
मुक्ताभरदनमङ्गसुन्दरमंगुलीरुचिरम् ॥ ४

पुनः किम्भूतम्—केयूरौ च कुण्डले च मुकुटं च कंकणे च मुद्रिकाश्च ताः केयूरकुण्डलमुकुटकंकणमुद्रिकाः ताः रुचिराः अधिष्ठानातिशयत्वादतिमनोहरा यस्मिंस्तत् । केयूरो बाह्वाभरणम् । स्पष्टमन्यत् । पुनः किम्भूतम्—मुक्ताभाः मौक्तिकप्रभाः रदनाः दन्ता यस्य तत् । पुनः किम्भूतम्—अङ्गसुन्दरं कन्दर्पकमनीयम् । पुनः किम्भूतम्—अङ्गुल्यो रुचिराः यस्मिंस्तत् । ४

विद्याविचारणदक्षमच्छमपक्षपक्षकरम् ।
कल्याणभाजनमीशवन्दितमीतिभीतिशरम् ॥ ५

पुनः किम्भूतम्—विद्याविचारणदक्षम् । पुनः किम्भूतम्—अच्छं स्वच्छं महदादिचतुर्विंशतिविकारातिगं पद्मपत्रवन्निर्लेपमित्यर्थः । पुनः किम्भूतम् न कश्चन पक्षो येषां ते अपक्षाः आत्मारामः । यद्वा–अपक्षाः पक्षशून्याः तेषां पक्षकरं तद्विपक्षोन्मूलम् । पुनः किम्भूतम्–कल्याणभाजनं कुशलपात्रम् । पुनः किम्भूतम्—ईशवन्दितम् ब्रह्मेन्द्ररुद्रादिनुतम् । पुनः किम्भूतम्–ईतिभीतिशरम् 'शॄ—हिंसायाम्' ईतिभीती शृणाति निहन्तीति तत् । 'अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः, स्वचक्रं परचक्रं च सप्तैता ईतयः स्मृताः ।' 'भीतिर्भीः साध्वसं भयम्' इत्यमरः । ५

आजानुबाहुमुदारविक्रममर्ककोटिरुचम् ।
निःशेषलक्षणलक्षणीयमपास्तरोगशुचम् ॥ ६

पुनः किम्भूतम्—आजानुबाहुम् । पुनः किम्भूतम्—उदारविक्रमम् । पुनः किम्भूतम्—अर्कात्कोटिगुणा रुक् कान्तिर्यस्य तत् । पुनः किम्भूतम्—निःशेषानि च तानि लक्षणानि तैः लक्षणीयम् । 'विश्वसर्गविसर्गादिनवलक्षणलक्षितम् ।' अत्रैव सर्वं स्थावरं जङ्गमं दृश्यत इत्यर्थः । अपास्तौ दूरस्थौ रोगशुचौ यस्मात्तत् । ६

मन्दारमल्लीकुन्दतुलसीदामसंवलितम् ।
श्रीवत्सचिह्नितवक्षसं स्वर्णोपवीतचितम् ॥ ७

पुनः किम्भूतम्—मन्दारमल्लीकुन्दतुलसीदामभिः संवलितं परिवीतं संवृतमित्यर्थः । मन्दारः कल्पद्रुमः । पुनः किम्भूतम्—वक्ष एव वक्षसम्, श्रीवत्सचिह्नितं वक्षसं यस्य तत् । पुनः किम्भूतम्—स्वर्णोपवीतचितं स्वर्णनिर्मितयज्ञसूत्रोपशोभितम् । ७

जयदेवभाषितमष्टपदमंहोनिराशपरम् ।
श्रेयो दिशत्वखिलं जनाय निजाय लोकवरम् ॥ ८

जयदेवभाषितमिदमष्टपदं निजाय स्वश्रवणपठनगायनपराय जनाय अखिलं समग्रं श्रेयः दिशतु ददातु। किम्भूतमष्टपदम्—अंहोनिराशे दुरितदूरीकरणे परं प्रवीणम्। पुनः किम्भूतम्—लोकवरं लोकेच्छापिधानम्। ८

इति गीतं दशमम्।

जनकः वसिष्ठं प्रति—

जनकः वसिष्ठं मुनिं प्रत्याह। अत्राहेति शेषः किमिति चेत्तत्राह—

कुलपतिर्जगतामुपकारकः श्रुतिविदां प्रथमो मुनिपुङ्गवः।
विधिसुतस्त्वमसि प्रियकांक्षया कथय यत्प्रकरोमि तदेव हि॥ ४

हे भगवन्! हि यस्मात्कारणात् अस्माकं कुलपतिः त्वमसि निमेरग्रेऽस्माकं पुरोधास्त्वमेवासीरित्यर्थः। अतः प्रियकांक्षया त्वमेव यत् कथय तदहं करोमि कुर्याम्। कथम्भूतस्त्वम्—जगताम् उपकारकः। पुनः कथम्भूतः—श्रुतिविदां प्रथमः मुख्यः। पुनः कथम्भूतः—मुनिपुङ्गवः मुनिश्रेष्ठः। पुनः कथम्भूतः—विधिसुतो ब्रह्मतनयः। ४

वसिष्ठः—

अत्रोवाचेति शेषः।

राजर्षे! सर्वतत्त्वज्ञ! किं नियोज्यं मया त्वयि।
प्रक्षालय पदाम्भोजं रामस्य परमात्मनः॥५

हे राजर्षे! हे सर्वतत्त्वज्ञ! हे सर्वसिद्धान्तवित् मया त्वयि नियोज्यं किमिति किमपि नेत्यर्थः। रामस्य पदाम्भोजं प्रक्षालय। किम्भूतस्य परमात्मनः। ५

अथ गीतमेकादशम्

अथ श्रीमद्रामचन्द्रचरणारविन्दानुभावं वर्णयति। देशवराडीरागेण अष्टतालितालेन सख इत्यादिना गीतेन—

सखे! सानुरागं भजतु रघुवीरपदमेकम्।
सर्वसौभाग्यसम्पत्तिसन्दोहकरमिन्दु-
शतकोटिरुचिसेकम्॥ १ ध्रुवपदम्

हे सखे! सानुरागं यथा स्यात्तथा भवान् रघुवीरपदं भजतु। किम्भूतं रघुवीरपदम्—एकमद्वितीयम्। चतुर्वर्गदः कल्पद्रुम एतदेव नान्यदत एकतानतयैतस्यैव भजनं कुरु नान्यस्येति भावः। तदेव विवृणोति—किम्भूतं रघुवीरपदम्—सर्वसौभाग्यसम्पत्तीनां सन्दोहकरम् अनन्तसम्पद्व्यूहप्रदम्। पुनः किम्भूतम्—इन्दवश्च ते शतकोटयः इन्दुशतकोटयः इन्दुशतकोटीनामिव रुचिसेकः दीप्तिप्रकाशो यस्मिंस्तत्। १

केतुदम्भोलिरेखाङ्कुशच्छत्रवरचिह्नमम्भोजहारम्।
ब्रह्मवागीशसनकादिमुनिसेवितं वेदवेदान्तमतसारम्॥ २

पुनः कथम्भूतम्—केतुश्च दम्भोलिरेखा च अङ्कुशश्च छत्रं च तेषां वराण्युत्कृष्टानि चिह्नानि यस्मिंस्तत्। केतुः पताका। 'दम्भोलिरशनिर्द्वयोः' इत्यमरः। पुनः किम्भूतम्—अम्भोजरेखा हारा मनोहरा यस्मिंस्तत्। 'हृञ् हरणे' 'ज्वलादेर्णः' इति णप्रत्यये कृते हरति मनः स्ववशीकरोतीति हारा। पुनः किम्भूतम्—ब्रह्मवागीशसनकादिमुनिसेवितम्। वागीशो बृहस्पतिः। पुनः किम्भूतम्—वेदश्च वेदान्तश्च तौ तयोः मते सारं सारांशभूतम्। २

नम्रदिक्पालगणमौलिमणिमालिकाकान्तिविस्तरणमतिशोभम्।
सिद्धविघ्नेशयज्ञेशकीनाशवसुतुषितगन्धर्वकृतलोभम्॥ ३

पुनः किम्भूतं रघुवीरपदम्—नम्राश्च ये दिक्पालाः नम्रदिक्पालाः तेषां ये गणाः समूहाः नम्रदिक्पालगणाः तेषां ये मौलयः मुकुटानि तेषु गुम्फिता या मणिमालिकाः नम्रदिक्पालगणमौलिमणिमालिकाः तासां कान्तिविस्तरणं यस्मिंस्तत्। पुनः किम्भूतम्—अतिशयेन शोभा यस्य तत्। पुनः किम्भूतम्—सिद्धाश्च विघ्नेशश्च यज्ञेशश्च कीनाशश्च वसवश्च तुषिताश्च गन्धर्वाश्च ते तैः कृतः लोभो यस्मि-

स्तत् । विघ्नेशो गणेशः । यक्षेशः कुबेरः । 'सूर्यसूनुर्यमो धर्मः कीनाशः सर्वभूतहृत्' इति कोशात्' 'आदित्या आदितेयाश्च तुषिता भास्वरानिलाः, अमृतान्धसो यज्ञभुजः कामदा लेखकाः शुभाः ।' इति कोशात् । ३

पूरितानन्दकामारिशिरसि स्फुरद्विमलगंगौघजलसिक्तम् ।
शापवशगौतमीपापपरिणामहरमरुणमुद्योतद्युतिरक्तम् ॥ ४

पुनः किम्भूतम्--पूरितानन्दकामारिशिरसि स्फुरन्ती विमला चासौ गङ्गा तस्याः यः ओघः जलप्रवाहः तस्य यज्जलं तेन सिक्तम् । यद्वा–'षिच–क्षरणे' इति धात्वर्थानुसारेण पूरितानन्दकामारिशिरसि स्फुरद्विमलगङ्गौघजलं सिक्तं प्रस्तुतं यस्मात्तत् पुनः किम्भूतम्—शापवशा भर्तृदत्तशापाभिभूता चासौ गौतमी अहल्या तस्याः पापपरिणामहरं पापविपाकघ्नम् । पुनः किम्भूतम्–अरुणम् । 'अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः' इत्यमरः । अरुणत्वे हेतुमाह—उत्कर्षेण द्योतन्ते इति उदद्योताः नखाः तेषां या द्युतिर्दीप्तिः तया रक्तम् । यद्वा–उदद्योत द्युतिर्यस्य तत् । किम्भूतम्—रक्तम् अलक्तादिना रञ्जितम् । 'रक्तं नील्यादिरागि च' इत्यमरः ।४

अञ्जनीनन्दनप्रेमकासारसरसीरुहं योगिगणयत्नम् ।
इन्दिरापाणिपाथोजवरलालितं सद्वृत्तपावनं निपुणरत्नम् ॥ ५

पुनः किम्भूतम्—प्रेमैव जलं यस्मिन् सः प्रेमजलः प्रेमजलश्चासौ कासारः प्रेमकासारः अञ्जनीनन्दनश्चासौ प्रेमकासारः तस्मिन् सरसीरुहमिव भवतीति तत् । 'पद्माकरस्तडागोऽस्त्री कासारः सरसीसरः' इत्यमरः। पुनः किम्भूतम्--योगिगणाः कृतयत्नाः प्राणायामादिपराः यस्मै तत् । पुनः किम्भूतम्—इन्दिरा पाणिपाथोजवराभ्यां लक्ष्मीकरकमलवराभ्यां लालितं कृतलालनम् । पुनः किम्भूतम्—सत् समीचीनं च तत् वृत्तं सद्वृत्तं सद्वृत्तेन पावनं पवित्रीकरणं यस्य तत् । वृत्तान्तमात्रेणैव जगत्पवित्रीकरणे समर्थम् । निपुणानां रत्नमिव भवतीति तत् । ५

विपुलविस्तारसंसारसागरतरणशरणशुभकल्पदृढनावम् ।
काममदमोहलोभादिकाननमहाविधविषमतमदावम् ॥ ६

पुनः किम्भूतम्—विपुलविस्तारसंसारसागरतरणाय शरणं रक्षाकर्त्री शुभकल्पा शोभनरचनाविशिष्टा दृढा सुपुष्टा नौरिव भवतीति तत् । अत्र 'टाडकाः' इति अप्रत्यये कृते तदनु आवादेशे च कृते प्रयोगसिद्धिर्भवतीति ज्ञेयम् । 'कल्पं दृढे समर्थे च रचनायां कल्पमुच्यते, कल्पं लये तथा लोमनीलकर्मणि भास्वरे ।' इति हलायुधः । 'शरणं गृहरक्षित्रोः' इत्यमरः । काममदमोहलोभादीनां यत्काननं तद्दाहाय महाविधोऽनेकविधः विषमतमोऽतिविषमो दाव इव भवतीति तत् । 'वने च वनवह्नौ च दवदावौ' इति कोशात् ।६

दर्शनादेव लोकार्तिशोकापहं राक्षसाऽभिभवमभिरामम् ।
कामतरुकाममणिकामधुक्कोटिगुणदानकरपरमविश्रामम् ॥ ७

पुनः किम्भूतम्—दर्शनादेव लोकार्तिशोकापहं जगदाधिव्याधिनाशकम् । पुनः किम्भूतम्—राक्षसानां रावणादीनां यद्वा—राक्षसा इव भवन्तीति राक्षसाः रागादयः तेषाम् अभिभवो यस्मात्तत् । तदेव विशिनष्टि विशेषणद्वयेन पुनः किम्भूतम्- अभि न भीर्भयं यस्मिंस्तत् । पुनः किभूतम्—रमन्ते योगिनोऽस्मिन्निति रामं योगिनां नियतस्थानम् । पुनः किम्भूतम्—अविश्रामं विश्रामरहितं यथा स्यात्तथा कामतरुकाममणिकामधुग्भ्यः कोटिगुणं दानकर्तॄणां श्रेष्ठम् । कामतरुः कल्पद्रुमः । काममणिश्चिन्तामणिः । कामदा 'कामधेनुः स्यात्कामदुग्धा च कामधुक्' इति कोशात् । ७

जयति गम्भीरजयदेवकविभारती पुण्यदा शमितपरितापा ।
राजराजेन्द्ररघुवीरचरणाम्बुजस्मरणशुभकरणगतपापा ॥ ७

इयं गम्भीरजयदेवकविभारती जयति । किम्भूता--पुण्यदा । पुनः किम्भूता--शमितपरितापा दैहिकादितापापहा । पुनः किम्भूता—राजराजेन्द्र

रघुवीरचरणाम्बुजस्मरणमेव शुभकरणं कल्याणकरणं गतपापं पापापहं यस्यां सा । ८

इति गीतमेकादशम् ।

श्रुत्वा महर्षेर्वचनं मनोहरं प्रक्षाल्य पादौ विधिना महीपतिः ।
चकार वैवाहिककर्म शोभनं श्रियोऽनुरूपं स्वकुलोचितं मुदा ।। ६

महीपतिः महर्षेः वचनं श्रुत्वा पादौ प्रक्षाल्य श्रियोऽनुरूपं विभूतिसदृशं यथा स्यात्तथा । स्वकुलोचितं यथा स्यात्तथा । मुदा आनन्देन । विधिना शास्त्रोक्तविधानेन । वैवाहिककर्म चकार कन्यासम्प्रदानं चकार । किम्भूतं वैवाहिककर्म—शोभनं यथेष्टसम्पादनेन स्वर्गापवर्गाद्यात्मगुणैर्विरोचमानम् । किम्भूतं महर्षेर्वचनम्—मनोहरं मनोज्ञम् । ६

लब्ध्वा धनानि सुरभीर्महिषीस्तुरंगान्,
दन्तावलांश्च शिविका वसनानि भूयः ।
दासीश्च दासनिवहान्मनुवंशवीरा,
याता नरेन्द्रतनयाः पुरमात्तदाराः ।। ७

नरेन्द्रस्य तनयाः नरेन्द्रतनयाः रामादयः धनानि स्वर्णमुद्रादिसंपदः । च पुनः सुरभीः । च पुनः महिषीः । च पुनः तुरंगान् । च पुनः दन्तावलान् । च पुनः शिविकाः । पुनः वसनानि । पुनः दासीः । च पुनः दासनिवहान् सेवकसमूहान् लब्ध्वा भूयः पुरम् अयोध्यां याताः प्राप्ता बभूवुः । नरेन्द्रतनयाः इत्यत्र बहुवचनारोपणेन रामेण सहान्येषामपि विवाहोत्सवः निरूपितः । 'दन्ती दन्तावलो हस्ती' इत्यमरः । किम्भूता नरेन्द्रतनयाः—मनुवंशवीराः । ७

स्फाटिकं विविधतोरणस्रजं जातरूपकलशं नभोलिहम् ।
सौधमुन्नतपताकमादरादाविवेश रघुवंशवर्द्धनः ।। ८

तत्समये रघुवंशवर्द्धनः श्रीरामचन्द्रः । सौधं धवलगृहम्, आदरात् आविवेश

प्रविष्टवान् । अथेति शेषः । किम्भूतं सौधम्—स्फाटिकं स्फटिकमणिनिर्मितम् । पुनः किम्भूतम्—तोरणे बहिर्द्वारि निबद्धा स्रक् तोरणस्रक् विशिष्टा विधा प्रकारो यस्याः सा विविधा विशिष्टप्रकारा तोरणस्रक् यस्य तम् । यद्वा—विशिष्टा विधा वधूप्रवेशविधिर्यस्मिन्सः विविधः विविधश्चासौ तोरणः तस्मिन्स्रक् यस्य तम् । 'तोरणोऽस्त्री बहिर्द्वारम्' इत्यमरः । 'विधा विधौ प्रकारे च' इत्यमरः । पुनः किम्भूतम्—जातरूपस्य कलशो यस्मिस्तम् । 'जातरूपं सुवर्णं च' इत्यमरः । पुनः किम्भूतम्—नभोलिहमुच्चैस्तरम् । पुनः किम्भूतम्—उन्नता उच्चैस्तरा पताका यस्य तम् । 'सौधोऽस्त्री धनिनां वासः' इत्यमरः । ८

अथ गीतं द्वादशम्

अथ सरयूतीरे विहरन्तं रामचन्द्रं प्रति नागरिकोक्तिर्वर्ण्यते । गुर्जरीरागेण रूपकतालेन विहरतीत्यादिना गीतेन—

विहरति ~~विरहति~~ हरिरिह सरयूकूले ।
पद्मरागचामीकरमरकत-
बद्धविविधतरुकूले ।। १ ध्रुवपदम्

इहाऽस्मिन् सरयूकूले हरति दुःखमिति हरिः श्रीरामचन्द्रः विहरति । किम्भूते सरयूकूले—पद्मरागचामीकरमरकतबद्धानि विविधानि बहुविधानि तरुकूलानि बृक्षतटानि यस्मिंस्तस्मिन् । विविधः स्याद्बहुविधौ नानारूपः पृथग्विधः' इत्यमरः । पद्मरागोऽरुणमणिः । मरकतः श्यामः मणिः । १

सादरमज्जदमितयुवतीकुचकुङ्कुमपिङ्गलनीरे ।
शमदमादिसाधनविवेकवशमुनिजनसंकुलतीरे ।। २

पुनः किम्भूते—सादराः मज्जन्त्यः अमिताः असंख्याताश्च याः युवतयः तासां ये कुचाः तेषां यत्कुङ्कुमं तेन पिङ्गलं नीरं यस्मिन् तस्मिन् । पुनः

किम्भूते—मनोनैश्चल्यं शमः, बाह्येन्द्रियनैश्चल्यं दमः, तदादीनि च तानि साधनानि तैः सहितो यो विवेको ज्ञानं सः वशे सधीनत्वे येषां ते । यद्वा—शमदमादिसाधनविवेकेन वशः कान्तिर्येषां ते शमदमादिसाधनविवेकवशाः ते च ये मुनिजनाः तैः संकुलं सङ्कीर्णं तीरं जलाभ्यर्णभूमिर्यस्मिंस्तस्मिन् । 'वशः कान्तौ' इत्यमरः । 'पार—तीरकर्मसमाप्तौ' चुरादिः अदन्तश्च । तीरयति तरयति तरणकर्मसमाप्तिं करोतीति विग्रहे 'पचादेरः' इत्यप्रत्यये तीरमिति साधुः । २

विलिखितमकरनिशाकरदिनकरचञ्चलविशदपताके ।
दिव्याऽसनविशेषपूरितदूरीकृतदुरितविपाके ॥ ३

पुनः किम्भूते—विलिखितमकरनिशाकरदिनकराः चञ्चलाः विशदाः पताकाः यस्मिन् तस्मिन् । मकरो मत्स्यविशेषः । दूरीकृतः दुरितविपाकः पापपरिणामो येन तत् दिव्यासनविशेषैः पूरितं च तत् दूरीकृतदुरितविपाकं तत् तस्मिन् । यद्वा—गमनमात्रेणैव दूरीकृतः दूरीभूतः दुरितविपाको येषां ते दूरीकृतदुरितविपाकाः दिवि भवानि दिव्यानि च तानि आसनानि विमानानि तेषु विशेषेण पूरिताः पूर्णीकृताः दूरीकृतदुरितविपाकाः येन तस्मिन् । ३

एतावता तत्र गतानां मनुष्याणां मुक्तिर्भवतीत्युक्त्वाऽथ तत्रत्याः पक्षिणोऽपि जीवन्मुक्ता इति वदति । सारसेत्यादिना—

सारसजलकोयष्टिमरालकचक्रविजृम्भितनादे ।
पङ्केरुहकेदारविबोधनपरिमलशमितविषादे ॥ ४

पुनः किम्भूते—सारसजलकोयष्टिमरालकचक्राणां विजृम्भितः नादोऽव्यक्तः यस्मिन् तस्मिन् । अनेन विमानान्यारुह्य गच्छतो मनुष्यान् वीक्ष्य यूयं यात यात वयं त्वत्रैव तिष्ठेम नागच्छेम नागच्छेमेति वदन्तीति सूचितम् । जलकोयष्टिः टिट्टिभः । मरालो हंसः । चक्रः चक्रवाकः । पङ्केरुहकेदारान् विबोधयतिविज्ञापयतीति पङ्केरुहकेदारविबोधनः एवंविधो यः परिमलः जनमनोहरो गन्धः तेन

शमितः शान्तः विषादः श्रमो यस्मिन् येन वा तस्मिन् । 'विमर्दोत्थे परिमलो गन्धे जनमनोहरे' इत्यमरः । ४

याताायाततुरङ्गमतङ्गजकरभमनुजरथयाने ।
दिशि दिशि निजविश्रामकामबहुविरचितरुचिरविताने ॥ ५

पुनः किम्भूते—यातायातानि तुरङ्गमतङ्गजकरभमनुजरथयानानि यस्मिन् तस्मिन् । 'मतङ्गजो गजो नागः' इत्यमरः । करेण भातीति करभः करिशावकः । मनुजो मनुष्यः । यानं शिबिकादिकम् । पुनः किम्भूते—दिशि दिशि निजविश्रामाय कामं यथेष्टं बहून्यसङ्ख्यातानि विरचितानि निर्मितानि रुचिराणि मनोज्ञानि वितानानि पटमण्डपानि यस्मिन् । ५

राजदनेकलवङ्गलतालवलीमुनिपादपचूते ।
भ्राजिततुरगतरङ्गविकाशलसत्तुलसीदलपूते ॥ ६

पुनः किम्भूते—राजन्तः अनेके लवङ्गलतालवलीमुनिपादपचूताः यस्मिन् तस्मिन् । लवली लताजातिविशेषः । मुनिपादपः अगस्त्यः । चूतः आम्रः । पुनः किम्भूते—भ्राजितः शोभितस्तुरग इव अश्व इव यस्तरङ्गविकाशस्तस्मिन् लसच्च यत्तुलसीदलं तेन पूते । ६

देवगृहैरभितः स्फुरति प्रणवादिकमन्त्रविचारे ।
ध्यानपरायणसिद्धसमूहनिराकृतविषयविकारे ॥ ७

पुनः किम्भूते—अभितः सर्वतः देवगृहैः देवालयैः स्फुरति । पुनः किम्भूते । प्रणवादिकाश्च ये मन्त्राः तेषां विचारो यस्मिन् । पुनः किम्भूते—ध्यानपरायणाश्च ये सिद्धास्तेषां ये समूहाः समुदायास्तैर्निराकृतः निस्सारितः विषयादिकः विकारो यस्मात् तस्मिन् । अयं भावः—हे नागरिकाः ! सरयूतटे एवं विधाः सिद्धाः सन्ति येषां पवनस्पर्शदर्शनादिभिर्महापातकिनोऽपि शुद्धाः भवन्ति ततः सर्वे एव यूयं वयं च तत्रैव वसेमेति । ७

श्रीजयदेवकवेरुदितं सरयूसरिदुज्ज्वलगानम् ।
सर्वसतामनिशं भवतु प्रियदं सुखमोदनिधानम् ।। ८

श्रीजयदेवकवेः उदितं वचनं सर्वसताम् अनिशं सदैव यथा स्यात्तथा प्रियदं भवतु । किम्भूतम्—सुखमोदनिधानम् । पुनः किम्भूतम्—सरयूसरिदुज्ज्वलगानम् । 'व्याहार उक्तिर्लपितं भाषितं वचनं वचः' इत्यमरः । उदितमिति भाषितस्य पर्यायः । ८

इति गीतं द्वादशम् ।

आखेटैरिपुमोक्षणैरविरतं विद्याविचारोत्सवैः,
शीलैर्यज्ञजपैर्मनोरमरुचा कीर्त्या च शुश्रूषया ।
चित्रैर्वाद्यकलाभिरश्वशिविकाहस्त्यावरोहैर्बलैः,
रामः सत्यपराक्रमैरनुदिनं प्रीत्या सिषेवे नृपम् ।। ९

तदनु रामः अनुदिनं प्रतिदिनं नृपं पितरं दशरथं सिषेवे सेवितवान् स्ववशी चकारेत्यर्थः । कैः—आखेटैः मृगयाभिः । च पुनः रिपुमोक्षणैः शत्रुभ्यः राज्यादेः मोक्षणानि तैः । यद्वा—स्ववशमानीय तेषामेव विमोक्षणैः । च पुनः विद्याविचारोत्सवैः । च पुनः शीलैः स्वभावैः । च पुनः यज्ञजपैः । च पुनः मनोरमरुचा मनोरमया कान्त्या । च पुनः कीर्त्या यशसा । च पुनः शुश्रूषया परिचर्यया । च पुनः वाद्यकलाभिः वाद्यविभेदैः । च पुनः अश्वशिविकाहस्त्यावरोहैः । च पुनः बलैः सैन्यैः । च पुनः सत्यपराक्रमैः । किम्भूतैरेतैः सर्वैः—चित्रैः आश्चर्यरूपैः । ९

एकस्मिन्समये राजा गृहीत्वा दर्पणं करे ।
पश्यन्निजाननं शौक्ल्यं कर्णमूले ददर्श ह ।। १०

एकस्मिन्समये राजा दशरथः करे दर्पणं गृहीत्वा निजाननं पश्यन् कर्णमूले शौक्ल्यं केशशुक्लत्वं ददर्श । १०

प्रत्युवाच कुलाचार्यं वसिष्ठं मुनिपुङ्गवम् ।
राघवाय पुरो राज्यं देहि मह्यं तपोवनम् ।। ११

च पुनः कुलाचार्यं मुनिपुङ्गवं मुनिश्रेष्ठं वसिष्ठं प्रति इत्युवाच । इति किम्-हे गुरो ! राघवाय श्रीमद्रामचन्द्राय पुरो राज्यम् अयोध्याधिपत्यं देहि । च पुनः मह्यं तपोवनं देहि चेति शेषः । इति । ११

अथ गीतं त्रयोदशम्

श्रुत्वा कैकेयी—

कैकेयी नृपमध्यमपत्नी श्रुत्वा नृपवचनं श्रवणं कृत्वा उवाच । अत्रोवाचेति शेषः ।

तद्वचनं चाथ गुर्जरीरागेण यतितालेन श्रृणु ममेत्यादिना गीतेनाह—

शृणु मम वचनमिदं नृपभूषण !
सत्यसिन्धुविद्याहतदूषण !
देहि वरं नाथ!जहि न धर्मपथम् ।। १ ध्रुवपदम्

हे नृपभूषण ! ममेदं वचनं शृणु । हे नाथ ! वरं देहि वरदानं कुरु । च पुनः धर्मपथं न जहि धर्ममार्गविनाशं मा कुरु । तत्कुतः—यतः किम्भूत—सत्यमेव सिन्धुः सर्वलाभत्वाद्रत्नाकरो यस्यामेवं विधा या विद्या सा हतदूषणा अनभ्यासादिदोषशून्या यस्मिंस्तत्सम्बुद्धौ हे सत्यसिन्धुविद्याहतदूषण ! अनेन यः कश्चिदेवं विधोऽस्ति स कदाचिदपि धर्ममार्गं न जहातीति सूचितम् । अत्र चेति शेषः । १

अथ ब्रूहि किं कथयसीति ब्रुवन्तं राजानमाह कैकेयी—

देवासुररणमध्य ! सलीलम् ।
भङ्गमगमदुत्तमरथकीलम् ।। २

देवाः असुराश्च रणे मध्याः अनुत्कृष्टाः यस्मात्तत्सम्बुद्धौ हे देवासुररणमध्य ! यदा उत्तमरथकीलं भङ्गम् अगमत् भग्नीबभूव यदेति शेषः । २

निजकरमर्प्य तत्र धृतशायक ! ।
दत्तं विजययशस्त्वयि नायक ! ।। ३

तदा हे धृतशायक ! तत्र रथकीले निजकरम् अर्प्य हे नायक ! त्वयि वर्तमानं यशः मया दत्तं रक्षितम् आसीत् 'देङ्--पालने' अदायीति दत्तम् । अनेनैवं न कृतं चेत्तर्हि दशरथादन्यः सदा विजयवान्नास्तीति भूतले यत्तव यशोऽस्ति तदद्य दुर्घटं भवेदिति सूचितम् । ३

समयमवाप्य वदति विज्ञानी ।
तस्मादिहि न निनिन्दितवानी ।। ४

हे राजन् ! तस्मात्कारणात्समयं पूर्वकृतं सिद्धान्तम् इहि प्राप्नुहि । ननु कदा मया समयः कृत इति चेत्तत्राह—ई इति खेदे निनिन्दितवान् न नितरां निन्दितकर्मप्रवृत्तौ मा भव । विज्ञानी समयम् अवाप्य वदति । इण्--धातोरिहीति रूपम् । 'समयाः शपथाचारकालसिद्धान्तनिश्चयाः' इति कोशात् । समीयते निश्चीयते जनैरिति समयः । ४

कुरु भरतं कोशलपुरनाथम् ।
रघुपतिरेतु विपिनमुनिगाथम् ।। ५

अतो हे राजन् ! भरतं कोशलपुरनाथं कुरु । रघुपतिः विपिने वसन्तो ये मुनयः तेषां गाथा यत्र सः विपिनमुनिगाथो वन्यमुनिमार्गस्तम् एतु प्राप्नोतु । ५

न तु तव धर्महानि न हि पापम् ।
तामुपनयति सहितमहितापम् ।। ६

तु पक्षान्तरे । अनेवंकृते तवाभिलषितपक्षे तव धर्महानि पापं न स्यादिति न, किन्तु स्यादेव । धर्मस्य हानिर्यस्मिन् तद्धर्महानि । तत्कुतः--हि यस्मात्कारणात्

सहितः युगपत्प्राप्तः महितापो यस्मिंस्तत् सहितमहितापम् एवं विधं यत्कर्म तदेव ताम् उपनयति धर्महानिं करोति । अनेन प्रतिश्रुतस्यादातुस्तत्सहितमाहात्म्य-सन्तापापत्तित्वद्रामाभिषेके महती धर्महानिर्दृश्यतेऽतस्तन्निवृत्तो भवेति सूचितम् । 'तु पादपूरणे भेदे समुच्चयेऽवधारणे, पक्षान्तरे नियोगे च प्रशंसायां विनिग्रहे ।' इति मेदनी । ६

एवमुक्त्वा पुनः किमकरोदित्यपेक्ष्याऽऽहाऽऽकलय्येति—

आकलय्य भूपतिरिपुकल्पम् ।
मनसि चकार जीवसंकल्पम् ।। ७

भूपतये रिपोः इव कल्पं रचना यस्मिन्कर्मणि तत् भूपतिरिपुकल्पम् एवं यथास्यात्तथा आकलय्याभाष्य मनसि जीवसङ्कल्पं चकार । यावदेवाह जीवेयं तावदेतदेवमेव भविष्यति नान्यथेति मनश्चक्रे । 'कल्पं दृढे समर्थे च रचनायां कल्पमुच्यते, कल्पं लये तथा रोमनीलकर्मणि भास्वरे ।' इति हलायुधः । ७

श्रीजयदेवकरचितरहस्यम् ।
साधुजनस्य तनोतु यशस्यम् ।। ८

श्रीजयदेवकेन रचितं रहस्यं पदगोप्यत्वं यस्मिन् तदेवंभूतमेतद्गीतम् । विद्यायां सिद्धः साधुः स चासौ जनः साधुजनः तस्य अग्रे यशस्यं तनोतु यशसे हितकृद् भवतु । अत्र 'अग्रे' इति शेषः । ८

इति गीतं त्रयोदशम् ।

श्रुत्वा नृपो दशरथो वचनं महिष्या,
भिन्नो बभूव हृदये करुणावतारः ।
रामं महेन्द्रमणिसुन्दरदेहकान्ति-
माहूय काननगमाय समादिदेश ।। १२

नृपः दशरथः महिष्याः कैकेय्याः वचनं श्रुत्वा हृदये यदा भिन्नो विद्धो बभूव तदा राममाहूय काननगमाय समादिदेश । अनेन दस्युजनेन हृदि विद्धः मार्गगः पान्थो यथा तच्चिकीर्षितं करोति एवमेव राजमार्गगतेन दशरथेन कैकेय्याश्चिकीर्षितं कृतं न स्वत इति सूचितम् । किं चात्र गमाय इति पदेन वने संदेशमिव कथयित्वा पुनस्तूर्णमेवागच्छेत्तत्रैव न वसेदिति सूचितम् । किम्भूतो नृपः— करुणायाः अवतारः करुणावतारः । किम्भूतं रामम् — महांश्चासौ इन्द्रमणिस्तस्येव सुन्दरा मनोहरा देहकान्तिर्यस्य तम् । १२

वैदेहीसहजानुजो रघुवरो धृत्वा जटा वल्कलं,
नत्वा भूपतिमादरादनु ययौ तच्छृङ्गवेरं पुरम् ।
नानापुष्पफलैर्निषादपतिना सम्मानितश्चिन्मयो,
भारद्वाजमवेक्ष्य रम्यविधिनाऽपश्यत्प्रयागं पुनः ।। १३

वैदेही च सहजश्च वैदेहीसहजौ तावेवानुजीविनौ यस्यैवंविधो रघुवरो रामः जटाः धृत्वा, तदनु—वल्कलं धृत्वा, तदनु—आदरात् भूपतिं नत्वा शृङ्गवेरपुरं ययौ । तदनु—निषादपतिना नानापुष्पफलैः रम्यविधिना सम्मानितः सम्पूजितः । तदनु—भारद्वाजम् अवेक्ष्य तस्य दर्शनं कृत्वा पुनः प्रयागम् अपश्यत् । किम्भूतः—चिन्मयः चित्स्वरूपः । 'जीव—प्राणधारणे' अनु स्वामिनः पश्चाज्जीवतः इति विग्रहे 'नाम्नि च' इति डप्रत्यये कृते अनुजाविति साधुः । तदिति अव्ययम् । अत्र तत् अनु इति पदद्वयस्य सर्वत्रान्वयोऽस्ति । १३

अथ गीतं चतुर्दशम्

अथ लक्ष्मणो रामं प्रति प्रयागानुभावमवर्णयत्तमेव गुर्जरीरागेण प्रतिमण्ठतालेन पश्य पश्येत्यादिना गीतिनाह—

पश्य पश्य रघुवीर ! प्रयागम् ।
मज्जदखिलमुनिगणमतिरागम्,
सीतया सह सन्ततमेतम् ।। १ ध्रुवपदम्

हे रघुवीर ! सीतया सह सन्ततं सविस्तरमेतं प्रयागम् अतिरागं यथाऽस्यात्तथा पश्य पश्य । किम्भूतम्—मज्जन्तः न खिलाः अखिलाः पूर्णाः निरभिलाषुकाः मुनिगणाः यत्र तम् । १

नीलपीतसितचित्रपताकम् ।
सुखसमूहशिथिलीकृतनाकम् ।।२

पुनः किम्भूतम्—नीलपीतसितचित्राः पताकाः यस्मिस्तम् । पुनः किम्भूतम्—सुखसमूहेन शिथिलीकृतः निरभिमानीकृतः नाकः स्वर्गो येन तम् ।२

सिंहासनपरिपूरितकूलम् ।
ज्ञानयोगजपसाधनमूलम् ।।३

पुनः किम्भूतम्—सिंहासनैः परिपूरितं कूलं नद्योस्तटं यत्र तम् । पुनः किम्भूतम्—ज्ञानयोगजपादीनि च यानि साधनानि मुक्त्युद्धर्तॄणि तेषां मूलम् ।३

वाणीजह्नुतरणिजासङ्गम् ।
निमिषादेति कलुषमतिभङ्गम् ।।४

पुनः किम्भूतम्—यत्र निमिषात्पलमात्रादेव कालात्कलुषं कल्मषम् अतिभङ्गम् एति । अत्र 'ऋतआदियोगे पञ्चमी' इति सूत्रेण कालावधौ पञ्चमी कृता आमुक्तेः संसार इत्यत्र यथा । पुनः किम्भूतम्—जह्नुश्च तरणिश्च तौ ताभ्यां जायेते जह्नुतरणिजे वाणी च जह्नुतरणिजे च तासां सङ्गो यत्र तम् ।।४

उपवनवनभूषितमहिदेशम् ।
सकलकलाकल्पितशुभवेशम् ।।५

पुनः किम्भूतन्—उपवनैरारामैः वनैः काननैः भूषितः महिदेशो यस्य तम् । अत एव पुनः किम्भूतन्—सकलकलाभिः समग्ररचनाविशेषैः कल्पितः शुभः शोभनः वेशो यस्य स इव भवतीति तम् । विश्यत इति वेशो वेषः । ५

मनुजाकारसुरासुरनागम् ।
विहितनृपतितापसवरयागम् ।।६

पुनः किम्भूतम्—मनुजाकाराः मनुष्यरूपेणागच्छन्तः सुराः असुरा नागाश्च यत्र तम् । विहिताः नृपतिभिस्तापसवरैश्च यागाः यत्र तम् । ६

मुक्तिचतुर्विधसुलभमनूपम् ।
राजमाननानामणियूपम् ।।७

पुनः किम्भूतम्—मुक्तिर्या चतुर्विधा सा सुलभा यत्र तम् । अत एव पुनः किम्भूतम्—अनूपमनूपमम् । पुनः किम्भूतम्—राजमानाः देदीप्यमानाः नानामणियूपाः यत्र तम् । यूपो यज्ञस्तम्भः ।७

श्रीजयदेवभणितमिति गीतम् ।
सुखयतु रामचरणमुपनीतम् ।।८

श्रीजयदेवेन भणितम् इत्येतद्गीतं रामचरणमुपनीतमुपाश्रितं जनं सुखयतु सुखिनं करोतु ।८

इति गीतं चतुर्दशम् ।

एतद्गुणविशिष्टं प्रयागमालोक्य पुनः किमकुरुतामित्यपेक्ष्याह—

पाणौ बाणशरासनौ कटितटे तूणीरचर्माम्बरौ,
पूर्णेन्दुप्रतिमाननौ च शिरसि स्फूर्जज्जटामण्डलौ ।
इन्द्वर्कायुततेजसौ जलधरश्यामौ सतां वल्लभौ,
पृच्छन्तौ सुखवासिनिर्जनपथं प्रीत्या मनोहारिणौ ।।१४

•

इति श्रीमद्रामगीतगोविन्दे महाकाव्ये
जयदेवकृतौ जगन्निवासो
नाम तृतीयः सर्गः ।। ३

•

सतां सज्जनानां वल्लभौ प्रियौ रामलक्ष्मणौ सुखस्य सुखदुःखात्यस्य वासः सुखवासः स विद्यते येषां तेषां यन्निर्जनं तस्य यः पन्थाः सुखवासिनिर्जनपथः तं प्रीत्या पृच्छन्तौ आस्ताम् । निर्गताः जनाः मनुष्याः यस्मात्तत् निर्जनं वनम् । सुखदुःखात्ययवतां जनत्वं नास्ति जायत इति जनः इति व्युत्पत्तेः । 'श्रीर्गुणा नैरपेक्ष्याद्याः सुखं दुःखसुखात्ययः । दुःखं कामसुखापेक्षा पण्डितो बन्धमोक्षवित् ।' इति स्मृतेः । किम्भूतौ—पाणौ बाणशरासनौ । पुनः किम्भूतौ—कटितटे तूणीरचर्माम्बरौ । पुनः किम्भूतौ—पूर्णेन्दुप्रतिमाननौ । पुनः किम्भूतौ—स्फूर्जज्जटामण्डलौ । पुनः किम्भूतौ—इन्द्वर्काभ्याम् अयुतगुणं तेजो ययोस्तौ । पुनः किम्भूतौ—जलधरश्यामौ । गौरस्याऽपि सौमित्रेः श्यामतानिरूपणेनातितन्मयत्वं दर्शितम् । भागवते यथा—'यत्र यत्र मनो देही धारयेत्सकलं धिया । स्नेहाद्द्वेषाद्भयाद्वापि याति तत्तत्सरूपताम् ।' इति । किंच—दुःखावस्थात्वमपि सूचितम् । दुःखितोपि श्यामो भवति । पुनः किम्भूतौ—मनोहारिणौ ।१४

इति श्रीमद्रामगीतगोविन्दार्थविवरणे तृतीयः सर्गः । ३

•
•
•

चतुर्थसर्गः

नानामुन्याश्रमं मार्गे पूतं कृत्वा पदक्रमैः ।
ददर्श चित्रकूटाद्रिं चित्रकूटाभिमण्डितम् ॥ १

नानाविधाश्च ये मुनयस्तेषां य आश्रमस्तम् । अत्र जातावेकवचनम् । पदक्रमैः पादक्रमणैः पूतं पवित्रं कृत्वा चित्रकूटाद्रिं ददर्श । किम्भूतम्—चित्राणि च तानि कूटानि शिखराणि तैरभि समन्तान्मण्डितामाभूषितम् । १

अथ गीतं पञ्चदशम्

अथ रामो जानकीं प्रत्याह । तदेवाशावरीरागेण रूपकतालेन चित्रकूटमित्यादिना गीतेन विवृणोति जयदेवः—

चित्रकूटमवलोकय सीते ! ।
उन्नतशिखरलिखित-
घनमण्डलमङ्गलकरणविनीते !॥ १ ध्रुवपदम्

हे सीते ! चित्रकूटम् अवलोकय पश्य । किम्भूते सीते—उन्नतानि च तानि शिखराणि तेषु लिखिता इव ये घनमण्डला मेघमण्डलाः तेषां मङ्गलकरणे कल्याणकरणे विनीता दक्षा तत्सम्बुद्धौ हे उन्नतशिखरलिखितघमण्डलमङ्गलकरण विनीते । अनेन भवत्या एव दर्शनायामी मेघाः शिखरेष्वारूढा अत एतान् मुस्वदृष्टिपातेन कृतार्थान्कुरु इति सूचितम् । 'श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्' इत्यमरः । १

मन्दाकिनोप्रवाहविलङ्घनचञ्चलपक्षमरालम् ।
विकसितकुन्दलवङ्गलतालवलीसरसीरुहमालम् ॥ २

किम्भूतं चित्रकूटम्—मन्दाकिन्या यः प्रवाहस्तस्य यद्विलङ्घनम् अतिक्रमण तेन चञ्चलाः पक्षाः येषामेवंविधाः मरालाः हंसा यत्र तम् । पुनः किम्भूतम्—विकसिताः प्रफुल्लाः कुन्दलवङ्गलतालवलीसरसीरुहाणां मालाः पंक्तयो यत्र तम् । लवली लताविशेषः । २

चम्पकभूर्जकदम्बतमालमुनिद्रुमभूषितभागम् ।
वैरविहीनमतङ्गजसिंहमयूरमहाविषनागम् ॥ ३

पुनः किम्भूतम्—चम्पकभूर्जकदम्बतमालमुनिद्रुमैर्भूषिताः भागाः प्रदेशाः यस्य तम् । भूर्जो भूर्जपत्राख्यः । मुनिद्रुमः अगस्त्यः । पुनः किम्भूतम्—वैरविहीनाः विगतवैराः मतङ्गजसिंहमयूरमहाविषनागाः यत्र तम् । ३

स्फटिकपद्मरागेन्द्रनीलमणिहीरकगैरिकशोभम् ।
शीतलधीरसुगन्धसमीरणमृषिजनमानसलोभम् ॥ ४

पुनः किम्भूतम्—स्फटिकपद्मरागेन्द्रनीलमणिहीरकगैरिकाणां शोभा यत्र तम् । पुनः किम्भूतम्—शीतलः धीरो मन्दः सुगन्धः समीरणः पवनो यत्र तम् । पुनः किम्भूतम्—ऋषिजनमानसस्य लोभो यत्र तम् । ४

गवयशरभहरिणीहरिणादनकपिकुलविपुलविहारम् ।
इन्धनदलफलकुसुमदर्भजलहेतुकमुनिसञ्चारम् ॥ ५

पुनः किम्भूतम्—गवयशरभहरिणीहरिणादनकपीनां यानि कुलानि तेषां विपुलो विहारो यत्र तम् । 'गुङ्—शब्दे' गवते इति गवः गवं यातीति गवयः पशुविशेषः । 'शरभस्तु पशोर्भेदे करभे वा' इति मेदिनी । हरिणी मृगी । हरिणादनो व्याघ्रः । 'शार्दूलद्वीपिनौ व्याघ्रे तरक्षुस्तु मृगादनः' इत्यमरः । 'कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः' इत्यमरः । पुनः किम्भूतम्—इन्धनानि च दलानि तुलसीबिल्वपत्रादीनि च फलानि च कुसुमानि च दर्भाश्च जलानि च हेतवो यस्य सः इन्धनदलफलकुसुमदर्भजलहेतुकः सः मुनिसञ्चारो यत्र तम् । ५

शुकहारीतचकोरशारिकाखञ्जनकोकविरावम् ।
निर्झरझरणसलिलशीकरभरविगतविषमतरुदावम् ।। ६

पुनः किम्भूतम्—शुकहारीतचकोरशारिकाखञ्जनकोकानां विरावो यत्र तम् । 'शुको व्याससुते कीरे रावणस्य च मन्त्रिणि' इति हैमः । चकोरशारिके प्रसिद्धे । 'खञ्जरीटस्तु खञ्जनः' इत्यमरः । 'कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः' इत्यमरः । 'आरवारावसंराववविरावाः' इत्यमरः । पुनः किम्भूतम्—निर्झराणां प्रस्रवणानां यानि झरणानि तेषां यानि सलिलानि तेषां ये शीकराः कणाः तेषां ये भराः समूहास्तैर्विगतो निवृत्तः विषमस्तीव्रस्तरुदावो वृक्षाग्निर्यस्मात्तम् । 'दवदावौ वनारण्यवह्नी' इत्यमरः । ६

गुहानिवासकिरातहूणखसविरचितविटपवितानम् ।
वनदेवीससतालसुसुररसश्रुतिकृतमङ्गलगानम् ।। ७

पुनः किम्भूतम्—गुहासु निवासो येषां ते च ये किरातहूणखसास्तैर्विरचितानि सञ्चारितानि विटपवितानानि वृक्षशाखाविस्ताराः यत्र तम् । किरातादयो निषादजातीयाः । 'क्रतुविस्तारयोरस्त्री वितानं त्रिषु तुच्छके' इत्यमरः । पुनः किम्भूतम् अस्य विष्णोरपत्यम् इः कामः । 'षो ऽन्तकर्मणि' वनदेवीनाम् इं कामं स्यति समापयति पूरयतीति तत् । अत्र 'नाम्नि च' इति डप्रत्ययः । तालेन सह वर्त्तमानं सतालम् । शोभनाश्च ते सुराः ब्रह्मेन्द्ररुद्रादयः सुसुरास्तेषां रसः श्रवणरुचिर्यत्र तत् सुसुररसम् । श्रुतौ कृतिनः कुशलाः श्रुतिकृताः मुनयः । अत्र 'टाडकाः' इति डप्रत्ययः । मङ्गलानां मङ्गलविधायकऋचां गानं मङ्गलगानं श्रुतिकृतानां मङ्गलगानं श्रुतिकृतमङ्गलगानम् । वनदेवीसं सतालं सुसुररसं श्रुतिकृतमंगलगानं यत्र तम् । यद्वा—'वनदेवीसं सतालं सुसुररसं श्रुतिभिर्वेदैः कृते मङ्गलगानं यत्र तम् । कदाचन ससीतो राम इहागमिष्यतीति ज्ञात्वाऽग्रत एवाभ्येत्य मुनिव्याजाः श्रुतयो मदागमनकाले 'स्वस्तिनः' इति । 'भद्रङ्कर्णेभिः' इत्यादि च मांगलिकमृग्गानं कुर्वन्तीति सूचितम् । ७

श्रीजयदेवमहाकविनिर्मितमद्भुतभूधरगीतम् ।
हरतु मलं सकलं पठतामनिशं प्रकरोतु विनीतम् ।। ८

श्रीजयदेवमहाकविनिर्मितम् अद्भुतभूधरगीतं पठतां सकलं मलं हरतु च । पुनः अनिशं प्रकरोतु । किम्भूतमनिशम्—विनीतम् 'ई—गतौ' नि अतिशयेन ईयते गम्यते इति नीतिः विचित्रा नीतिर्गतिर्यस्मिन्निति तत् विनीतम् । न अन्यत् नितरां शं यस्मादिति अनिशो मोक्षस्तम् । ८

इति गीतं पञ्चदशम् ।

एकदा रघुपतिर्महागिरौ सीतया सह शिलातलेऽमले ।
निद्रितोऽभवदुदारविक्रमः शक्रसूनुरगमत्खगाकृतिः ।। २

एकदा रघुपतिः महागिरौ चित्रकूटे अमले शिलातले सीतया सह यदा निद्रितोऽभवत् तदा शक्रसूनुरगमत् । किम्भूतः शक्रसूनुः—खगस्येवाकृतिर्यस्य सः । २

विददार पदाङ्गुष्ठमैन्द्रिः काकपरीक्षया ।
ईषिकास्त्रेण रामोऽक्षि काणं चक्रे दुरात्मनः ।। ३

इन्द्रस्यापत्यम् ऐन्द्रिः शक्रसूनुः सीतायाः पदाङ्गुष्ठं विददार । अत्र सीताया इति शेषः । अत एव रामः, दुष्टः आत्मा मनो यस्य तस्यैवंविधस्यैन्द्रेः 'ईक्ष-दर्शने' । परीक्ष्यतेऽनयेति परीक्षा काकस्य परीक्षा काकपरीक्षा, तया काकपरीक्षया काकोऽयमिति बुद्ध्या ईषिकास्त्रेण अक्षि नेत्रं काणं चक्रे । अनेन श्रीमद्रामचन्द्रेऽतिदयावत्त्वं सूचितम् । ३

शरभङ्गसुतीक्ष्णयोगिनौ कृपया वीक्ष्य रघूत्तमः पुनः ।
घटयोनिमुनेरनुज्ञया कृतवान्दण्डककानने स्थितिम् ।। ४

रघूत्तमः श्रीरामः । घटो योनिरुत्पत्तिस्थानं यस्येति घटयोनिरगस्त्यः स चासौ मुनिस्तस्यानुज्ञया दण्डककानने दण्डकनाम्नि वने स्थितिं कृतवान् निवासं चकार । किं कृत्वा—कृपया शरभङ्गसुतीक्ष्णयोगिनौ वीक्ष्य । ४

अथ गीतं षोडशम् ।

अथ श्रीमद्रामचन्द्रस्य निवासप्रभावेण दण्डकस्य शोभातिशयत्वं निरूप्यते दण्डकवनमित्यादिना गीतेन — गीतस्याशाऽवरीरागो रूपकताल:—

दण्डकवनमतिचारु चकाशे ।
शारदेन्दुनिर्मलरुचिरघुपति-
यशसि जगति सविकाशे ।। १ ध्रुवपदम्

दण्डकवनं चकाशे शुशुभे। किम्भूतम्—अतिचारु। 'काशृ—दीप्तौ'। कस्मिन्सति जगति रघुपतियशसि सविकाशे सति। किम्भूते शारदश्चासौ इन्दुः तस्येव निर्मला रुक् यस्य तस्मिन्। १

निर्भयकुम्भजादिनानामुनिजनकृतसाधनयोगम् ।
विगतवैरमृगदस्युखगाऽऽदिबलाहकदाववियोगम् २ ।।

किम्भूतं दण्डकवनम्—कृतः सिद्धः साधनैः नियसंयमादिभिः सह योगो येषां ते कृतसाधनयोगाः निर्भयाश्च ये कुम्भजादिनानामुनिजनास्ते कृतसाधनयोगाः यस्मिस्तत्। पुनः किम्भूतम्-विगतवैराः मृगदस्युखगाऽऽदयो यस्मिस्तत्। दस्युश्चौरः। अनेन श्रीमद्रामचन्द्रनिवासप्रभावातिशयत्वं सूचितम्। पुनः किम्भूतम्—बलाहकेन दावस्य दावाग्नेर्वियोगः अयोगो यस्मिस्तत्। अनेन मेघः श्रीरामचन्द्रं तत्र निवसन्तं दृष्ट्वायं रावणं हनिष्यति मां तत्परिचर्यातो विमोचयिष्यतीत्याशयेनास्य नित्यदा परिचर्या करोति स्मेति सूचितम्। 'अभ्रं मेघो वारिवाहस्तनयित्नुर्बलाहकः' इत्यमरः। २

गोदातरलतरङ्गविचित्रितरुचिरकूलकृतशालम्।
विहितनिवासविदेहसुतारघुनाथसुमित्राबालम्।। ३

पुनः किम्भूतम्—गोदायाः गोदावर्याः तरलाश्चञ्चलाश्च येतरङ्गास्तैर्विचित्रितं

रुचिरं च यत्कूलं तत्र कृताः मुनिभिर्निर्मिताः शालाः पर्णगेहाः यस्मिस्तत्। पुनः किम्भूतम्—विहितनिवासाः विदेहसुतारघुनाथसुमित्राबालाः यस्मिस्तत्। ३

खण्डितकामसमाकुलशूर्पणखाश्रुतिकरणविनासम् ।
खरदूषणरजनीचरसहितसहस्रचतुर्दशनाशम् ।। ४

पुनः किम्भूतम्—श्रूयत इति श्रुतिः श्रवणं सा क्रियते याभ्यां तौ श्रुतिकरणौ विशिष्टा चासौ नासा विनासा खण्डिता छिन्ना कामसमाकुलशूर्पणखायाः। श्रुतिकरणाभ्यां सह विनासा सुमहती नासिका यस्मिस्तत्। खरदूषणरजनीचराभ्यां सहिताश्च ये सहस्रचतुर्दश तेषां नाशो यस्मिस्तत्। ४

रावणशासनकनकहरिणमारीचनिपातनिधानम् ।
सीताहरणविलापनगृध्रविलोकनसंगतिदानम् ।। ५

पुनः किम्भूतम्—नितरां पातः शरीरनिपातो यस्मिन् सः निपातो मृत्युर्मोक्षो वा तस्य यन्निधानं निपातनिधाम्। रावणशासनेन कनकहरिणो यो मारीचस्तस्य निपातनिधानं मृत्युभाण्डं मुक्तिभाण्डं वा। पुनः किम्भूतम्—सीतायाः हरणे विलापने गृध्रस्य जटायोः विलोकनसंगतिदाने च यस्मिस्तत्। ५

योजनबाहुकवन्धमहासुरमारणपावकसंगम् ।
नवधाभक्तिविवेकविचारणशवरीसंसृतिभंगम् ।। ६

पुनः किम्भूतम्—योजनबाहुकबन्धादयश्च ये महासुरास्तेषां मारणं पावयन्तीति पावका देवास्तेषां संगः समागमो यस्मितत्। पुनः किम्भूतम्—नवधा या भक्तिस्तत्सहितो यो विवेको ज्ञानं तस्य विचारणं यस्यामेवंविधा या शबरी तस्याः संसृतिभंगो यस्मिस्तत्। नवधा भक्तिर्यथा—'श्रवणं दर्शनं विष्णोः स्मरणं पादसेवनम्। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्। इति पुंसार्पिता विष्णोर्भक्तिश्चेन्नवलक्षणा। क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्।' इति।

नारदमुनिदर्शनविधिसन्तततरुचिरकलध्वनिगीतम् ।
पम्पानिकटसमीरतनयसंवादविशेषमभीतम् ॥ ७

पुनः किम्भूतम्—नारदमुनिदर्शनविधौ सन्ततताः रुचिराः मनोज्ञाः याः कलास्ताभिः सहितो ध्वनिः प्रतिस्वनो यस्य एवम्भूतं गीतं यस्मिंस्तत् । पुनः किम्भूतम्—पम्पानिकटे समीरतनयेन सह यः संवादः सः विशेषः ज्ञानोपदेशादिना विशिष्टो यस्मिंस्तत् । पुनः किम्भूतम्—न काचिद्भीतिर्यस्मिंस्तत् । अत्र 'टाडकाः' इति डः । ७

श्रीजयदेवकवेरुदितं दण्डकवनचरितमनूपम् ।
यच्छतु मुक्तिपदं विमदं सुचिरं रुचिरं शुभरूपम् ॥ ८

श्रीजयदेवकवेः उदितं वचनं दण्डकवनचरितं शुभरूपं यच्छतु ददातु । शोभतेऽसौ शुभः श्रीरामस्तस्य रूपं शुभरूपम् । किम्भूतम्—मुक्तिपदं मुक्तेर्धाम । पुनः किम्भूतम्—विमदं मदरहितम् । पुनः किम्भूतम्—सुचिरं बहुकालीनमनाद्यन्तमित्यर्थः । पुनः किम्भूतम्—रुचिरं मनोज्ञं तद्यथाऽस्ति तथा न किञ्चिदस्तीति भावः । पुनः किम्भूतम्—अनूपम् अनुगता पश्चाद्गता न पुरोभवित्री उपा उपमा यस्य तत् अनूपम् । अत्र नामैकदेशग्रहणे नामग्रहणं यथा—'भीमो भीमसेनः' इति तद्वत् 'ढम्यः' इति निर्देशात् । ८

इति गीतं षोडशम् ।

ऋष्यमूकमगमद्रघुवीरो लक्ष्मणेन सह मारुतजेन ।
तत्र सख्यमभवत्सुग्रीवे राघवस्य दृढमग्निसमेतम् ॥ ५

रघुवीरः श्रीरामः लक्ष्मणेन सह मारुतजेन ऋष्यमूकम् अगमत् अगच्छत् । तत्र राघवस्य सुग्रीवे अग्निसमेतमग्निसाक्षिकं दृढं पुष्टं सख्यम् अभवत् मैत्री बभूव ।५

सप्ततालानयं भित्त्वा वालिनं बलशालिनम् ।
सुग्रीवं भूपतिं चक्रे पूर्णानन्दो रघूत्तमः ॥ ६

पूर्णानन्दः रघूत्तमः सप्ततालान् वृक्षविशेषान् तथा बलशालिनं वालिनं भित्त्वा सुग्रीवं भूपतिं चक्रे । तथेति शेषः । ६

अथ गीतं सप्तदशम् ।

सुग्रीवः स्वचित्तं प्रति—

सुग्रीवस्स्वचित्तं प्रत्याह । अत्राहेति शेषः । तदेव रामकरीरागेण रूपकतालेन श्रीरामनामेत्यादिना गीतेन वर्ण्यते—

श्रीरामनाम मनोरमं भजामृततत्त्वमयम् ।
न तनोति यत्स्मरणेन जन्मजराधिमरणभयम् ॥१ ध्रुवपदम्

हे चित्त ! मनोरमं श्रीरामनाम भज । किम्भूतं श्रीरामनाम—अमृतमक्षरं च यत् तत्त्वं परब्रह्म तन्मयम् । ननु किं तत् श्रीरामनाम तत्राह—यत्स्मरणेन जन्म च जरा च आधिश्च मरणं च तानि तेभ्यो यद्भयं तत् न तनोति न भवति । १

सुकृतेः परं प्रकृतेः परं सत्त्वादिभावगतम् ।
विश्राममेकमनोगिरामजशङ्कराभिमतम् ॥ २

पुनः किम्भूतम्—सुकृतेः परं सुकृतिरिष्टापूर्तादिः तस्मात्परं तदुपरि वर्तमानम् । प्रकृतेः परं मायातः परिभूतम् । पुनः किम्भूतम्—सत्त्वादिभावगतम्, सत्त्वानां ब्रह्मादिस्तम्बपर्यन्तजीवानामादिभावो यस्मात्सः सत्त्वादिभावो महाविष्णुः तत्र गतिः प्रवृत्तिर्यस्य येनेति वा तत् । पुनः किम्भूतम्—एकमनोगिराम् एकस्थमनोवचसां विश्रामं विरतिस्थानम् । यत्र लग्ने वाङ्मनसे न पुनरिहावर्तेत इति भावः । पुनः किम्भूतम्—अजश्च शङ्करश्च तयोरभिमतं तयोरपीदमिष्टमन्त्रोऽस्तीति भावः । २

प्रह्लादनारदपुण्डरीकपराशरादिनुतम् ।
संसारसागरसुप्लवं मन्त्राधिमन्त्रयुतम् ॥ ३

पुनः किम्भूतम्—प्रह्लादनारदपुण्डरीकपराशरादीनां नुतिर्येन तत् । एतद्ग्रहणमात्रेणैवैषां स्तुतिरस्तीत्यर्थः । पुनः किम्भूतम्—संसारसागरसुप्लवम् । पुनः

किम्भूतम्—मन्त्राधिमन्त्रेण प्रणवेन युतं मिश्रितम् । अस्यायमर्थः— भो चित्त ! अद्यतः 'ॐ श्रीराम' एतदेवाक्षरचतुष्टयं जप कदाचित्स्वप्नेऽप्यन्यन्नैवेति । ३

ननु योगाभ्यासादिना सर्वं भविष्यत्येव किमनेनेति चेत्तत्राह—

यदि भजसि हरिमपि केवलं हृदि कर्मणा वचसा ।
योगेन किं यज्ञेन किं ह्यपरेण किं तपसा ॥ ४

भो चित्त ! हरति स्वभक्तानां दुःखमिति हरिः श्रीरामनाम तं केवलमपि ॐशब्दश्रीशब्दरहितमपि वचसा कर्मणा वाग्रूपेणापि कर्मणा यदि हृदि भजसि तर्हि योगेन किम् यज्ञेन किम् अपरेण तपसा किम् । एतदेव सर्वसिद्धिकरमित्यर्थः । हीति निश्चये । तथा च हनुमान्—'कल्याणानां निधानं कलिमलमथनं पावनं पावनानां, पाथेयं यन्मुमुक्षोस्सपदि परपदप्राप्तये प्रस्थितस्य । विश्रामस्थानमेकं कविवरवचसां जीवनं सज्जनानां, बीजं धर्मद्रुमस्य प्रभवतु भवतां भूतये रामनाम ।' इति । ४

पुनस्तदेव विशिनष्टि—

उद्गीथरम्यपदक्रमोपनिषत्सुगीतपरम् ।
शबरीजटायुरजामिलादिकतापपापहरम् ॥ ४

पुनः किम्भूतम्—उत्कृष्टतया अगायीति उद्गीथं सामवेदः रम्याश्च ये पदक्रमाः वर्णितमस्ति तस्मात्परम् । तत्र तत्रैतदेव सर्वोत्कृष्टतयोक्तमित्यर्थः । पुनः किम्भूतम्—शबरीजटायुरजामिलादिकानां तापपापहरम् । ५

रागादिदूरमशेषमुनिजनसेवितं सततम् ।
लोकाभिराममभानमानसमञ्जसाविततम् ॥ ६

पुनः किम्भूतं श्रीरामनाम—रागादयो दूरे यस्मात्तत् । अतएव पुनः किम्भूतम्—सततं निरन्तरम अशेषाश्च ये मुनिजनास्तैः सेवितम् । पुनः

किम्भूतम्-लोकाभिरामं मुमुक्षुविषयिणामपि मनोमोहनम् । पुनः किम्भूतम्—अमानं निरभिमानं मानसं भक्तानां चित्तं येन तत् । एतत्प्रभावादेव प्रह्लादादीनामहंकृतिनिराकृतिरासीदित्यर्थः । पुनः किम्भूतम्—अञ्जसा अनायासेनैव विततिर्यस्य तत् अञ्जसाविततम् । ईषदेव कथनेन विपुलीभविष्णु ।

ब्रह्माण्डसम्पुटरत्नमुज्ज्वलमकलमप्रलयम् ।
सर्वाश्रयं सर्वातिगं सर्वार्तिहं च समम् ॥ ७

पुनः किम्भूतम्—ब्रह्माण्डसम्पुटरत्नम् ब्रह्माण्डे रत्नमेतदेव । पुनः—किम्भूतम्—उज्ज्वलम् मलरहितं निरञ्जनमित्यर्थः । पुनः किम्भूतम्—नान्यत् कलं मधुरं यस्मात्तत् । यद्वा—कलयति भवविकारमिति कलं नान्यत् कलं भवविकारौषधं यस्मात्तत् । पुनः किम्भूतम्—ए श्रीवासुदेवे प्रलयो यस्मात्तदप्रलयं श्रीरामचन्द्रे सायुज्यप्रदम् । पुनः किम्भूतम्—सर्वाश्रयं सर्वाधारम् । पुनः किम्भूतम्—सर्वातिगं सर्वमतिक्रम्य वर्तमानम् । पुनः किम्भूतम्—सर्वार्तिहं तापत्रयापहम् । पुनः किम्भूतम्—समाना भक्ताभिलाषसदृशी स्वर्गापवर्गादिफलरूपा मा लक्ष्मीर्यस्मात्तत् समम् ।७

तृष्णानिविडरजनीदिवाकरमसुरयूथमिदम् ।
जयदेवभाषितमद्भुतं भवसारभूतमिदम् ॥ ८

पुनः किम्भूतम्—तृष्णा एव निविडा महान्धकारवती रजनी रात्रिस्तन्निवारणाय दिवाकर इव भवतीति तत् । पुनः किम्भूतम्—असुरा इव ये कामक्रोधादयस्तेषां यूथं समूहं भिनत्तीति तत् । अत्र 'मूलविभुजादेः' इति कप्रत्ययः । जयदेवभाषितम् अद्भुतम् इव गीतं भवसारभूतम् अस्ति । ८

इति गीतं सप्तदशम् ।

सुग्रीवः कपिनिवहान्महीध्रतुल्यान्,
स्वर्णाभान्यखिलदिशासु संससर्ज ।
सीतायै लवणपयोधिमेत्य सर्वे,
वित्रेसुस्तरलतरंगमाकलय्य ॥ ७

सुग्रीवः सीतायै सीतायाः अन्वेषणं कर्तुं न्यखिलदिशासु स्वर्णाभान् महीध्र-तुल्यान् पर्वताकारान् कपिनिवहान् वानरसमूहान् संससर्ज प्रेषयामास । ते सर्वे लवणपयोधिम् एत्य गत्वा तरलतरंगम् आकलय्य दृष्ट्वा वित्रेसुर्बिभ्युः । तरल-तरंगमित्यत्र जातावेकवचनम् ।७

जाम्बवद्वचनात्सद्यो गत्वा गिरिमनुत्तमम् ।
हनुमानब्धिमतरत्स्मृत्वा रामांघ्रिपंकजम् ।।८

हनुमान् जाम्बवद्वचनात्सद्यः अनुत्तमं सुन्दरं गिरिं गत्वा रामांघ्रिपंकजं स्मृत्वा अब्धिम् अतरत्ततार । ८

अथ गीतमष्टादशम्

अथ सिन्धूत्तरणादनु यदासीत्तदाह–देशाख्यरागेण रूपकतालेन लङ्कापुर-मित्यादिना गीतेन—

लङ्कापुरमवलोक्य करालम् ।
नानाभटपरिपूरितशालम्,
स्मृत्य विभुं वातसुतो,
न चकार भयम् ।। १ ध्रुवपदम्

वातसुतो हनुमान् विभुं श्रीरामचन्द्रं स्मृत्य लङ्कापुरम् अवलोक्य भयं न चकार न भीतवान् । किम्भूतं लङ्कापुरम्—करालं भीषणम् । तदेव विशिनष्टि–पुनः किम्भूतम्—नानाभटैः परिपूरिताः शालाः यस्य तम् ।

बहुविधलोहयन्त्रशृगबाणम् ।
दौवारिकधृतपाणिकृपाणम् ।। २

पुनः किम्भूतम्—बहुविधाः नानाप्रकाराः लोहयन्त्रशृगबाणाः यस्य तत् । शृङ्खलानिधेयलोहनिर्मितयन्त्रविशेषाणि लोहयन्त्राणि 'शृंखलायां शृगं प्रोक्तं माला वैजन्तिका तथा ' इति वैजयन्ती । 'बाणः प्रहरणे प्रोक्तो बाणः स्यादुपरो-

धके । दैत्यभेदे च बाणः स्याद्बाणः शब्दमयेऽपि च ।' इति विश्वः । पुनः किम्भूतम्—धृताः पाणौ कृपाणाः, द्वारे नियुक्ताः दौवारिकाः, ते धृतपाणिकृपाणाः यस्मिस्तत् । 'असिः कृपाणः स्यात्खड्गो निस्त्रिंशः करवालकः' इति कोशात् । २

रुचिरनिकेतनतोरणमालम् ।
भ्राजमानमणिविरचितजालम् ।। ३

पुनः किम्भूतम्—रुचिराः मनोहराः निकेतनतोरणमालाः गेहद्वारपंक्तयो यस्मिस्तत् । 'तोरणोऽस्त्री बहिर्द्वारं पुरद्वारं तु गोपुरम् ' इत्यमरः । पुनः किम्भूतम्—भ्राजमानाः देदीप्यमानाः ये मणयस्तैर्विरचितानि जालानि गवाक्षाः यस्मिस्तत् । ३

शुभसोपानवापिकारम्यम् ।
सुरतरुभूषितविपिनमगम्यम् ।। ४

पुनः किम्भूतम्—शुभाः सोपाना यस्यामेवंविधा या वापिकास्ता रम्याः क्रीडनार्हाः यस्मिस्तत् । पुनः किम्भूतम्—सुरतरुभूषितविपिनम् । पुनः किम्भूतम्–अगम्यं शत्रुभिर्गन्तुमशक्यम् । ४

सन्ततमसुरनिकरसञ्चारम् ।
कीलितलोकपालसुरदारम् ।। ५

पुनः किम्भूतम्—सन्ततं निरन्तरम् असुरनिकराणां सञ्चारो यस्मिस्तत् । पुनः किम्भूतम्—कीलिताः बन्धनागारेषु रुद्धाः लोकपालादयो ये सुरास्तेषां दाराः यस्मिन् तत् । ५

तुङ्गकनकमयसौधविकाशम् ।
मयनिर्मितमगपतिसङ्काशम् ।। ६

६

पुनः किम्भूतं लङ्कापुरम्—तुङ्गा उच्चतरा ये कनकमयाः सौधास्तेषां विकाशः प्रकाशो यस्मिंस्तत्। 'सौधोऽस्त्री राजसदनम्' इत्यमरः। पुनः किम्भूतम्—मयविरचितम्। पुनः किम्भूतम्–अगानां पतिः कैलासस्तेन सङ्काशः सदृशः अगपतिसङ्काशस्तम्। ६

अथैतदेव पुनर्दर्शयति विशेषणद्वयेन—

अतिशयरुचिरदेववरगेहम्।
देवविनिर्मितनिरुपमगेहम्॥ ७

पुनः किम्भूतम्—अतिशयेन रुचिरो देववरस्य श्रीसदाशिवस्य गेहो यस्मिंस्तत्। पुनः किम्भूतम्—देवानामिव—विनिर्मिताः निरुपमाः उपमातीताः गेहाः यस्मिंस्तत्। ७

श्रीजयदेवविनिर्मितगानम्।
सुखयतु साधुनिचयमनुमानम्॥ ८

श्रीजयदेवेन विनिर्मितं च यदेतद्गानं श्रीजयदेवविनिर्मितगानं साधूनां श्रीरामचन्द्रभक्तानां निचयं समूहं सुखयतु सुखिनं करोतु। किम्भूतं साधुनिचयम्—अनुमानम् अनुगतः विमुखीभूतः मानोऽहम्भावो यस्मात्तम् गताभिमानमित्यर्थः। यद्वा—मन्यते ज्ञायत इति मानम् अनु पश्चाद्गतिर्यस्येत्यनुगतम् अनुगतम् अनुगीभूतं मानं ज्ञानं यस्य तम्। ज्ञानमपि यत्सेवकोऽस्तीत्यर्थः। अत्र मध्यमपदलोपोऽस्ति। ८

इति गीतमष्टादशम्।

अथ तदनु यदासीत्तदाह तीर्त्वेति—

तीर्त्वा क्षारपयोनिधिं क्षणमयो गत्वा श्रियः सन्निधौ,
दत्त्वा राघवमुद्रिकामपशुचं कृत्वा प्रविश्याटवीम्।

चतुर्थसर्गः

भङ्क्त्वाऽशेषतरून्निहत्य बहुशो रक्षोगणांस्तत्पुरीं,
दग्ध्वाऽदाय मणिं रघूत्तममगाद्वीरो हनूमान्कपिः॥ ९

•

इति श्रीरामगीतगोविन्दे महाकाव्ये
जयदेवकृतौ लङ्काप्रवेशो
नाम चतुर्थः सर्गः॥ ४

•

क्षणमयः परमानन्दमयः वीरः हनूमान् कपिः रघूत्तममगादगच्छत्। किं कृत्वा क्षीरपयोनिधिं तीर्त्वा। पुनः किं कृत्वा–श्रियः सन्निधौ गत्वा। पुनः किं कृत्वा—राघवमुद्रिकां दत्त्वा। पुनः किं कृत्वा—अपगता शुक् यया साऽपशुक् तामपशुचं कोऽर्थः शोकोत्सादनीं वार्तां कृत्वा। पुनः किं कृत्वा—अटवीमशोकवनिकां प्रविश्याशेषतरून् भङ्क्त्वा बहुशो रक्षोगणान्निहत्य। पुनः किं कृत्वा—तत्पुरीं दग्ध्वा। ९

इति श्रीमद्रामगीतगोविन्दार्थविवर्णने चतुर्थः सर्गः। ४

•
•
•

पञ्चमसर्गः

प्रणनाम मुहुर्मुहुः कपिः करुणागारमपारविक्रमः ।
रघुनाथमनाथवत्सलं कथयमास महीसुतादशाम् ।। १

अपारविक्रमः कपिः हनुमान् करुणागारं दयानिधिम् अनाथवत्सलं रघुनाथं मुहुर्मुहुः प्रणनाम महीसुतादशां कथयामास ।१

अथ गीतमेकोनविंशम्

अथ हनुमान देशरागेण रूपकतालेन रजनीचरेत्यादिना गीतेन रामं प्रत्याह—

रजनीचररमणीपरिवीता ।
वालचन्द्रकलिकेव सभीता ।।
नाथ ! हरे ! सीदति सीताऽशोकवने ।। १ ध्रुवपदम्

नाथ ! हे भगवन् ! हे हरे ! भक्तार्तिहन् ! सीता अशोकवने सीदति महान्तं कष्टभोगं कुरुते । यतः किम्भूता सीता—रजनीचररमणीपरिवीता रक्षोयोषितपरिवृता । कीदृशी केव—भीत्या सह वर्तमाना सभीता सती राहुग्रसनभयाऽऽकुला बालचन्द्रकलिकेव द्वितीयोदितचन्द्रकलेव । कलेव कलिका । अत्राभूतोपमाऽलङ्कारोऽस्ति ।१

ननु सा यदीमां दशामापन्ना तर्हि कुतस्त्वं नानीतवानसीति चेत्तत्राह—

कृशशरीरगतिरतिशयदीना ।
भूमिशयाशनसलिलविहीना ।। २

किम्भूता सीता—कृशे शरीरगती यस्याः सा । पुनः किम्भूता—अतिशयदीना अतिमूर्च्छापन्ना । अत एव भूमिशया भूमौ शयाना । पुनः किम्भूता—अशनसलिलविहीना । २

ननु तर्हि कथं जीवतीति चेत्तत्राह—

ध्यायति तव मुखचन्द्रमुदारम् ।
त्यजति भुजगमिव मणिमयहारम् ।। ३

तव मुखचन्द्रं ध्यायति । किम्भूतं मुखचन्द्रम्—उदारं, वदान्यं स्वभक्तान्मरणादेर्भयान्मोचयानमिति भावः । किञ्च—मणिमयहारं त्यजति मन्दोदर्यादिरक्षोरमणीदत्तहारादिकं हस्तेनाऽपि न स्पृशति । कमिव—भुजगमिव । अनेन स्वस्यानुनयनाय रक्षोरमणीदत्तवस्तुनि तस्या यदीदृश्यनास्थाऽस्ति तर्हि तेषु तद्दत्तवस्तुषु च कीदृश्यनास्थाऽस्तीति न ज्ञायत इति सूचितम् । ३

भजति निशेषकिरणमिव जालम् ।
स्पृशति करेण मुहुर्निजभालम् ।। ४

निर्गमनाशक्यत्वात् जालमिव मत्स्यमारणवस्त्रमिव भवतीति जालं रक्षोरमणीसमूहं भजति सेवते । किमिव—निशेषकिरणमिव मत्स्यविशेषमिव । 'किरणप्रग्रहौ रश्मी विक्षेपे मत्स्यभेदके' इति हलायुधः । किञ्च—करेण मुहुर्निजभालं स्पृशति मद्भाग्यमीदृग्विधमेवेति स्मृत्वा निश्वसितीत्यर्थः । ४

कलयति शरमिव मलयसमीरम् ।
मुञ्चति तप्तविलोचननीरम् ।। ५

किञ्च—मलयसमीरं शरमिव कलयति मन्यते । किञ्च—तप्तविलोचननीरं तप्तदुःखाश्रुजलं मुञ्चति । ५

विरहतया विदधाति न हासम् ।
जनयति बह्निविषमनिश्वासम् ।। ६

किञ्च—विरहतया हासं न विदधाति । अन्यच्च किम्—वह्नेरपि विषमः अग्नेरप्यसह्यः स चासौ निश्वासस्तं जनयति त्यजतीत्यर्थः । ६

सा तु स्वकीयनिश्वासाग्निज्वालयैव तद्वचापादने समर्थाऽस्ति तथाऽपि त्वयैव तं रावणं व्यापादयितुकामा त्वदाख्यामन्त्रप्रयोगं प्रकुर्वाणास्तीत्याह—

रामरामरामेति सकामम् ।
वदति विलापतया वसुयामम् ।। ७

सकामं ससङ्कल्पं यथा स्यात्तथा वसुयाममर्हनिशं यथा स्यात्तथा विशिष्टाश्चासौ लापो विलापः शास्त्रवचनं तस्य भावो विलापता तया विलापतया शास्त्रोक्ततया । यद्वा—विलापतया प्रलापतया अत्युच्चतरशब्देन वा रामरामरामेति वदति । अत्र त्रिरुच्चारणेन किमनुमीयते मनसा तव स्मरणं कृत्वा हस्ताभ्यां च तव प्रतिकृतिं कृत्वा वचसा राम एतदेवाक्षरद्वयं जपतीति । ७

श्रीजयदेवकवेरिदमुदितम् ।
सुखयतु रामभक्तमतिमुदितम् ।। ८

श्रीजयदेवकवेः उदितम् एवम्भूतम् इदं गीतं रामभक्तं सुखयतु । किम्भूतं गीतम्—अतिशयेन मुत् अतिमुत् अतिमुदः इतिः प्राप्तिर्यस्मात्तत् । 'इण्—गतौ ।' धातोः क्तिः । समासे डः । ८

इति गीतमेकोनविंशम् ।

पद्माष्टादशसंख्यया धृतरया पाथोधिगम्भीरया,
वर्षाकालिककालिकानिबिडया शाखामृगीसेनया ।
संवीतो रघुनन्दनो जलनिधेस्तीरं तरङ्गाकुलं,
गत्वा सेतुमथो चकार रुचिरं पश्चाद् भवस्थापनम् ।। २

अथो शाखामृगीसेनया संवीतः परिवृतः रघुनन्दनः जलनिधेस्तीरं गत्वा रुचिरं सेतुं चकार । किम्भूतया सेनया—पद्माष्टादशसंख्यया । पुनः किम्भूतया—धृतं रं रंहो यया तया धृतरया धृतवेगया । यद्वा—धृता रा वीरलक्ष्मीर्यया तया । 'रः सूर्येऽग्नौ धने कामे रं जले रङ्गवेगयोः । रा रमा रमणी बाला रं तीक्ष्णे कर्कशे दृढे' इति । पुनः किम्भूतया—पाथोधिगम्भीरया । पुनः किम्भूतया—वर्षाकालिका या कालिका मेघमाला तस्या अपि निबिडया । पश्चात्तदनुभवस्थापनं चकार । २

अथ गीतं विंशम् ।

लक्ष्मणः रामं प्रति—

अत्र वाक्ये क्रियापदानुषङ्गोऽस्ति ।

अथ लक्ष्मणोदितमेव गुर्जरीरागेण रूपकतालेन पश्य पश्येत्यादिना गीतेनानुवर्ण्यते—

पश्य पश्य रघुवर ! वरसेतुम् ।
परमदुरासदरूपपयोनिधि-
सलिलविलंघनहेतुम् ।। १ ध्रुवपदम्

हे रघुवर ! वरसेतुं पश्य पश्य । किम्भूतं वरसेतुम्—परमदुरासदरूपो यः पयोनिधिस्तस्य यत्सलिलं तद्विलंघनमेव हेतुः कारणं यस्य तम् । १

शैलनिवहमानीय सुमनमिव शतयोजनपरिमाणम् ।
नानाऽऽकारशरीरवलीमुखवीरविहितनिर्माणम् ।। २

पुनः किम्भूतम्—नानाऽऽकाराणि शरीराणि येषामेवंविधा ये वलीमुखवीरा वानरवीरास्तैर्विहितं निर्माणं यस्य तम् । किं कृत्वा—शैलनिवहं पर्वतसमूहम् आनीय आ समन्तात् नीत्वा । कमिव—सुमनमिव । स्वकार्यसिद्धये सत्पुरुषमिव सुष्ठु मनो यस्य तम् । अत्र डप्रत्ययः । यद्वा—प्रवालादिभ्यः सुष्ठु मन्यत इति सुमनं पुष्पं तदिव । 'मन—ज्ञाने' अत्र घञर्थे कप्रत्ययः । पुनः किम्भूतम्—शतयोजनानि परिमाणं यस्य तम् । २

वालितनयसुग्रीववायुसुतनलनीलादिविचारम् ।
शङ्खभुजगतिमिमकरचक्रकुलसङ्कुलमतिविस्तारम् ।। ३

पुनः किम्भूतम्—वालितनयसुग्रीववायुसुतनीलादीनां विचारः सञ्चारो यस्मिन्स्तम् । पुनः किम्भूतम्—शङ्खभुजगतिमिमकरचक्रकुलैः सङ्कुलं सङ्कीर्णम् । पुनः किम्भूतम्—विस्तारं दृग्विस्तारम् अतिक्रम्य भवतीति तम् । यावानस्ति तावान्द्रष्टुमशक्यम् । ३

अञ्जननीलनीरधिमध्यगमुज्ज्वलफेनविकारम् ।
छायापथमिव गगनसमुद्यतमुडुगणमिलितमुदारम् ।। ४

पुनः किम्भूतम्—अञ्जननीलो यो नीरनिधिः समुद्रस्तस्य मध्यगस्तम् । पुनः किम्भूतम्—उज्ज्वलश्चासौ फेनस्तस्य विकारो यस्मिंस्तम् । कमिव—छायापथमिव तारामार्गमिव । किम्भूतं छायापथम्—गगनसमुद्यतं खे प्रकाशमानम् । उडुगणास्तारासमूहा मिलिताः संश्लिष्टा यस्मिंस्तम् । पुनः किम्भूतं सेतुम्—उदारं ततोऽप्यतिशोभमानम् । रघुवंशे यथा—'वैदेहि ! पश्यामलयाद्विभक्तं मत्सेतुना फेनिलमम्बुराशिम् । छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारम् ।' ४

ऋक्षभल्लवहुराजिविराजिविराजितमिन्दुकिरणसमरूपम् ।
लङ्काविजयपत्रमर्पितमिव विधिना विपुलमनूपम् ।। ५

पुनः किम्भूतम्—ऋक्षभल्लबहुराजिविराजितम् 'ऋक्षाच्छभल्लभल्लूकाः' इत्यमरः । 'ऋक्ष—हिंसायाम् ।' ऋक्षतीति ऋक्षः 'पचादेरः' । पुनः किम्भूतम्—इन्दुकिरणसमरूपम् । कमिव—विधिना ब्रह्मणा अर्पितं विपुलमनूपं लङ्काविजयपत्रमिव । ५

सिद्धयक्षविद्याधरकिन्नरसुरवरलोचनलोभम् ।
यातुधानरमणीजनलोचनरोदनमभिगतशोभम् ।। ६

पुनः किम्भूतं सेतुम्—सिद्धाश्च यक्षाश्च विद्याधराश्च सुरवश्च ते तेषां यानि लोचनानि तेषां लोभो नितरां सादराऽवलोको यत्र तम् । सुरवरा इन्द्रादयः । पुनः किम्भूतम् यातुधाना राक्षसास्तेषां या रमण्यः प्रियतमास्तासां लोचनानि रोदयतीति

तम् । पुनः किम्भूतम्—अभिगतशोभम् अभिगता त्वामभिप्राप्ता शोभा यातुधानश्रीर्यत्र तम् । ६

वालखिल्यवैखानसफेनपवनचरमुनिकृतजापम् ।
राजमानराकेयदूरकृतदारुणवन्धनपापम् ।। ७

पुनः किम्भूतम्—वालखिल्याश्च वैखानसाश्च फेनपाश्च ते तदादयश्च ये वनचराः मुनयस्तैः कृतः जापः शिवशिवेति जापो यत्र यम् । नवे नवे लब्धे पूर्वसञ्चितत्यागिनो वालखिल्याः । अकृष्टपच्यवृत्तयो वैखानसाः । स्वयंपतितफलादिभिर्जीवन्तः फेनपाः । पुनः किम्भूतम्—राजमानः राकेयश्चन्द्रो यस्मिन्सः राजमानराकेयः शिवः तेन दूर एव कृतानि विहिंसितानि दारुणानि बन्धनादीनि पापानि यस्मात्तम् । बध्नन्तीति बन्धनानि रजस्तमस्सत्त्वानि तानि आदीनि कारणानि येषां तानि बन्धनादीनि । 'कृञ्—हिंसायाम् ।' राकायाः अयं पतिः राकेयः । 'कलाहीने सानुमतिः पूर्णे राका निशाकरे' इत्यमरः । ७

पठति जनः सुचिरं सुमतिर्जयदेवविनिर्मितगीतम् ।
पश्यति नैव कदाचिदपि प्रतिबन्धकसंसृतिभीतम् ।। ८

यः जनः सुचिरं भुक्तिमुक्तिदं जयदेवविनिर्मितगीतं पठति सः प्रतिबध्नन्तीति प्रतिबन्धकाः गुणास्तत्कृता या संसृतिः तस्यां भीतं यस्मात्सः प्रतिबन्धसंसृतिभीतो यमस्तं कदाचिदपि न पश्यति । किम्भूतो जनः—सुमतिः सुबुद्धिः । शोभना चासौ चिः सुचिः सुबुद्धिः तां राति ददातीति सुचिरं भुक्तिदम् । शक्तिमत्त्वात् । यद्वा—शोभनं च तत् चि सुचि ज्ञानं तत् रातीति सुचिरं मुक्तिदम् । 'ऋते ज्ञानान्न मुक्तिः' इति निर्देशात् । 'चः पुंसि चेतने चन्द्रे चौरे होच्चारदर्शने । इदन्तश्च स्त्रियां बुद्धौ ज्ञाने चारे च पावके' । ८

इति गीतं विंशम् ।

तीर्त्वा पाथोनिधिं रामः ससैन्यः प्रतिभाषितः ।
उल्लङ्घ्य लङ्कामगमत्सुवेलमगसत्तमम् ।। ३

रामः पाथोनिधिं तीर्त्वा, लङ्काम् उल्लङ्घ्य अगसत्तमं सुवेलमगमत् । किम्भूतो रामः–ससैन्यः । पुनः किम्भूतः–प्रतिभाषितः सुवेलं व्रजेति केनचिन्मन्त्रिजनेन कथितः । ३

लङ्कां रुरोध बलिभिः कपिभिः प्रभावी,
रामोऽरविन्दनयनो रविवंशकेतुः ।
युद्धं बभूव तुमुलं हरिराक्षसानां,
शस्त्रास्त्रमुद्गरगिरिक्षितिजप्रहारम् ।। ४

प्रभावी प्रतिपन्नप्रभावः अरविन्दनयनः पद्मनेत्रः रविवंशकेतुः सूर्यवंशप्रकाशको रामः बलिभिः कपिभिर्लङ्कां रुरोध । तदा हरिराक्षसानां तुमुलं सङ्कुलं युद्धं बभूव । किम्भूतं युद्धम्–शस्त्राणि च अस्त्राणि च मुद्गराश्च गिरयश्च क्षितिजाश्च तेषां प्रहारः प्रक्षेपो यत्र तत् । 'शसु—हिंसायाम् ।' शस्येतेऽनेनेति शस्त्रं खड्गादिकम् । 'असु–क्षेपणे ।' अस्यते इत्यस्त्रं बाणादिकम् । मुद्गरा अयोदण्डाः ।४

अथ गीतमेकविंशम्

शुकः सारणं प्रति—

अत्रोवाचेति शेषः ।

स यदुवाच तदेवाऽऽशावरीरागेण रूपकतालेन लङ्कापतिरित्यादिना गीतेनोच्यते–

लङ्कापतिरालोकयदीशम् ।
इन्दीवरसमरुचिरविलोचन-
मरिमदमोचनकीशम् ।। १ ध्रुवपदम्

लङ्कापतिः रावणः ईशं श्रीरामम् आलोकयत् अपश्यत् । किम्भूतमीशम्—इन्दीवरसमरुचिरे विलोचने यस्य तम् । पुनः किम्भूतम्–अरिमदमोचनाः कीशाः वानराः यस्य तम् । १

राकापतिशतकोटिमञ्जुमुखमनुपमचिबुकलसन्तम् ।
भृकुटीकुटिलविलासतयारतिनायकचापहसन्तम् ।। २

पुनः किम्भूतम्–शतकोटिगुणं मञ्जु शतकोटिमञ्जु राकापतेश्चन्द्रात् शतकोटिमञ्जुमुखं यस्य तम् । पुनः किम्भूतम्–अनुपमं च यत् चिबुकं तेन लसन्तम् । 'अधस्तादधरोष्ठस्य चिबुः स्याच्चिबुकं तथा' इति निगमः । पुनः किम्भूतम्–भृकुटयोः कुटिला या विलासता तया रतिनायकचापं कामबाणं हसतीति तम् । २

करकोदण्डशरप्रभया लसमानसमस्तशरीरम् ।
शक्रसमर्पितवर्मभृतं समराब्धिविलङ्घनधीरम् ।। ३

पुनः किम्भूतम्—करयोः वर्त्तमानौ यौ कोदण्डशरौ धनुर्बाणौ तयोर्या प्रभा प्रतिभा तया लसमानं समस्तं शरीरं यस्य तम् । पुनः किम्भूतम्–शक्रसमर्पितवर्मभृतम् । पुनः किम्भूतम्–समराब्धिविलङ्घनधीरम् । ३

बद्धजटामुकुटं निबिडं रजनीचरनाशनदक्षम् ।
चारुरथस्थमुदग्रपताकमखण्डितरोषविपक्षम् ।। ४

पुनः किम्भूतम्–बद्धजटामुकुटम् । पुनः किम्भूतम्–निबिडं दृढम् । पुनः किम्भूतम्–रजनीचराणां रक्षसां यन्नाशनं तत्र दक्षं प्रवीणम् । पुनः किम्भूतम्–चारुरथस्थम् । उदग्रपताकम् । पुनः किम्भूतम्—अखण्डितः परिपूर्णः रोषो येषां ते अखण्डितरोषाः राक्षसाः तेषां विपक्षः शत्रुस्तम् । ४

कालनीयपशभं खलहं कलहं करदारुणमेतम् ।
मातलिसारथिसहितमत्तमहितलनबलेन समेतम् ।। ५

पुनः किम्भूतम्—कालं नयन्तीति कालन्यः तानेव यान्ति युद्धायाभिमुखा भवन्तीति कालनीयाः वीराधिवीराः तेषां पशा बाधनकर्त्री भा दीप्तिर्यस्य सः तम्। 'पश—बाधने' 'पचादेरः।' पशति बाधत इति पशा। ननु निरपराधिनोऽपि वीरान्निहन्तीति चेत्तत्राह—खलहम्। अथ खलहन्तृत्वेऽपि विशिष्टतामाह—कलहंकरदारुणम्। पुनः किम्भूतम्—एतम् आ समन्तादितः प्राप्तः एतस्तमेतम्। सर्वतो लङ्कामावृत्य तत्सर्वद्वार्षु युध्यन्तमित्यर्थः। पुनः किम्भूतम्—मातलिर्यः सारथिः सः सहितः हितकारको यस्य तम्। पुनः किम्भूतम्—मह्यां तलन्ति तिष्ठन्तीति महीतला द्रुमाः पर्वताश्च तैः सह तानादाय नटन्ति युद्धकरणकामनाहर्षेण नृत्यन्तीति महितलनाः अत एव सत्ताश्च ये महितलना मत्तमहितलनाःहनूमदादिमहावीरास्तेषां बलं यस्यैवं विधो यः सुग्रीवस्तेन समेतस्तम्। 'लल-प्रतिष्ठायाम्' 'पचादेरः।' 'नट—नर्त्तने' 'नान्निच।' इति डः। ५

परिकरकटितूणीरविभूषितमुद्गरबाणकरालम्।
आकम्पिततुलसीदलसङ्कुलकुसुमकलितवनमालम्॥ ६

पुनः किम्भूतम्—परिकरेण सहितः यः कटिः सः तूणीरेणेषुधिना विभूषितो यस्य तम्। पुनः किम्भूतम्—उद्गरा उल्बणविषा ये बाणास्ते करालाः भीषणाः यस्य तम्। पुनः किम्भूतम्—ईषत्कम्पिता तुलसीदलैः सङ्कुला मिश्रिता कुसुमकलिता वनमाला यस्य तम्। ६

तिष्ठ विमूढमते! समरे दशकण्ठमिति प्रवदन्तम्।
प्रस्फुरिताधरपल्लवयुगप्रविभासिमनोहरदन्तम्॥ ७

पुनः किम्भूतम्—हे मूढमते!। समरे तिष्ठेति दशकण्ठं प्रवदन्तम्। पुनः किम्भूतम्—प्रस्फुरिताधरपल्लवयुगे प्रतिभासिनो मनोहरा दन्ता यस्य तम्। अत्र प्रशब्दप्राग्वर्तिनो युगशब्दोत्तरवर्तिनश्चाकारस्य गुरुता नाऽस्ति। तच्च वाणीभूषणे सोदाहरणमुक्तम्—'संयुक्तपूर्वोऽपि लघुः क्वचित्स्याद्वर्णस्तु ह्रप्रादिगतो विभाषा।' इति। अत्राऽपि ह्रशब्दादिगततुशब्दस्य लघुत्वमस्ति। ७

श्रीजयदेवभणितमतिमञ्जुलरघुवरसमरविधानम्।
पठति समरजयमतिशयपुरजयमेति महाभयदानम्॥ ८

श्रीजयदेवभणितम् अतिमञ्जुलं रघुवरसमरविधानं पठति सः समरजयम् अतिशयपुरजयं वैकुण्ठलोकाधिवासविजयं च एति प्राप्नोति। किम्भूतमतिशयपुरजयम्—महाभयस्य मृत्योः दानं खण्डं यत्र तम्। ८

इति गीतमेकविंशम्।

जघान हीमान्गिरिशृङ्गसन्निभा-
न्महाबलान्मुद्गरशस्त्रयोधिनः।
दशास्यमुग्रं घननादमुद्भटं।
घटश्रुतिं चैव तथैव रामः॥ ५

हीति पादपूरणे। रामः इमान् जघान हतवान्। किम्भूतानिमान्—गिरिशृङ्गसन्निभान् गिरिसानूपमान्। पुनः किम्भूतान्—महाबलान्। पुनः किम्भूतान्—मुद्गरादीनि च यानि शस्त्राणि तैर्योद्धुं शीलं येषां तान्। इमान्कानिति चेत्तत्राह—दशास्यं रावणम् च पुनः उग्रमिन्द्रजेतारं मायायोधिनं घननादमेव। उद्भटं घटश्रुतिं कुम्भकर्णम्। ५

जित्वा रिपुं रघुवरो दशास्यं देवकण्टकम्।
चकाशे सुचिरं तत्र शारदेन्दुरिव स्फुटम्॥ ६

रघुवरः सुचिरं बहुकालिकं देवकण्टकं दशास्यं रिपुं जित्वा तत्र तस्यां समरभूमौ स्फुटं यथा स्यात्तथा चकाशे शुशुभे क इव शारदेन्दुरिव 'काशृ—दीप्तौ।' ६

अथ गीतं द्वाविंशम्।

अथ हृष्टा देवा वसन्तरागेण रूपकतालेन जय रामचन्द्रेत्यादिना गीतेन रामचन्द्रं स्तुवन्ति—

जय रामचन्द्र ! मायाऽतिदूर !।
रविवंशविभूषण ! मुकुटशूर ! ॥ १ ध्रुवपदम्

हे रामचन्द्र ! हे मायाऽतिदूर ! जय स्वीयोत्कर्षमाविष्कुरु निर्विकारस्वरूपेणास्मन्नेत्रगोचरो भवेत्यर्थः । किम्भूत—रविवंशं विभूषयतीति तत्सम्बुद्धौ । पुनः किम्भूत शूराणां मध्ये मुकुटः शिरोमणिस्तत्सम्बुद्धौ । १

ब्रह्मामहेन्द्रगन्धर्वगीत ! ।
कल्याणनिपुण ! गुणगणविनीत ! ॥ २

पुनः किम्भूत—ब्रह्मा च अः शिवश्च महेन्द्रश्च गन्धर्वाश्च तैर्गीतस्तत्सम्बुद्धौ । 'अः शिवे केशवे वायौ' इत्यक्षरमालिकायाम् । पुनः किम्भूत—कल्याणे कर्मणि निपुणस्तत्सम्बुद्धौ । पुनः किम्भूत—गुणगणाः विनीता विशिष्टा यत्र तत्सम्बुद्धौ । २

चण्डप्रयात ! खण्डितविराध ! ।
स्वर्गापवर्गद ! सरदगाध ! ॥ ३

पुनः किम्भूत—चण्डं प्रयातं दिग्विजयनिमित्तं गमनं यस्य तत्सम्बुद्धौ । पुनः किम्भूत—खण्डितः शकलीकृतः विराधो येन तत्सम्बुद्धौ । पुनः किम्भूत—स्वर्गापवर्गद शत्रूणामपि भुक्तिमुक्तिद । पुनः किम्भूत—सरन्तीति सरदः शत्रवस्तेषामगाधोऽगम्यस्तत्सम्बुद्धौ । 'सृ—गतौ' । ३

पुनस्तदेव विशिनष्टि—

करुणानिकेततम ! प्रबलरोष ! ।
भावाधिगम्य ! जितसकलदोष ! ॥ ४

प्रकर्षेण करुणानिकेतस्तत्सम्बुद्धौ । पुनः किम्भूत—प्रबलः रोषो यस्य तत्सम्बुद्धौ । तत्सत्वे कारणमाह—भावेन अधिगम्यः भावाधिगम्यस्तत्सम्बुद्धौ हे

भावाधिगम्य ! हे यथाभाव ! । तथासत्त्वेऽप्यथ वैचित्र्यं दर्शयति—जिताः सकलाः दोषा येन तत्सम्बुद्धौ । ४

धाराधरप्रतिम ! नीलदेह ! ।
सद्रूपबोधमयमोदगेह ! ॥ ५

पुनः किम्भूत—धाराधरेण मेघेन प्रतिमः सदृशस्तत्सम्बुद्धौ । मेघो यथा सर्वत्र जले स्थलेऽपि च वर्षति तथा त्वमपि सर्वेषु जनेषु कामवर्षोऽसीत्यर्थः । पुनः किम्भूत—नीलः देहो यस्य तत्सम्बुद्धौ । पुनः किम्भूत—सद्रूपबोधमयः ब्रह्मज्ञानात्मको यो मोदः आनन्दस्तस्य गेहो वासस्थानं तत्सम्बुद्धौ । ५

व्यालादपत्र ! शतपत्रनेत्र ! ।
कूटस्थ ! पाणितलकलितवेत्र ! ॥ ६

पुनः किम्भूत—व्यालान्सर्पानत्तीति व्यालादो गरुडः सः पत्रं वाहनं यस्य तत्सम्बुद्धौ । पुनः किम्भूत—शतपत्रनेत्र । पुनः किम्भूत—कूटस्थ अन्तर्गतोऽपि सन् विकारेभ्यो बहिर्भूत । पुनः किम्भूत—पाणितले कलितं वेत्रं येन तत्सम्बुद्धौ । ६

सीतापतिरघुपतिजैनरुद्ध ! ।
विशसितसमस्तमायाविरुद्ध ! ॥ ७

जैनं नास्तिकं यन्मतं तत् रुद्धं निराकृतं येन सः जैनरुद्धस्तत्सम्बुद्धौ । अत्र शाकपार्थिवादीनामिति मध्यमपदलोपः । सीतापतिः रघुपतिर्योऽसौ जैनरुद्धस्तत्सम्बुद्धौ । पुनः किम्भूत—विशसिताः समस्ताः मायोद्भवाः विरुद्धाः येन सः तत्सम्बुद्धौ । 'शसु—हिंसायाम्' । ७

अथ कविर्गीतान्ते स्वनामनिबध्नन् प्रार्थयते—

जयदेवविनिर्मितमेव राम ! ।
कुरु तेन नाथ ! मम हृदयधाम ! ॥ ८

हे राम ! एव कोऽर्थः स्वभक्तानां हृदि रमतेऽसौ राम इति त्वन्नामार्थनिश्चयं कृत्वा एतत् जयदेवविनिर्मितमस्ति तेनानेन मद्विनिर्मितगीतेन मम हृदयं धाम कुरु ममान्तःकरणे स्थानं विधेहि मन्निश्चयं सफलीकुरु । उक्तं च—'मन्त्रे तीर्थे द्विजे देवे भैषज्ये भिषजे गुरौ । यादृशी भावना यस्य सिद्धिर्भवति तादृशी' । ८

इति गीतं द्वाविंशम् ।

इति रामस्तवं कृत्वा हर्षनिर्भरमानसाः ।
देवा नभसि यानस्था ववृषुः कौसुमं चयम् ।। ७

इति रामस्तवं कृत्वा नभसि यानस्था देवाः कौसुमं चयं ववृषुः पुष्पवर्षं चक्रुः किम्भूता देवाः—हर्षनिर्भरमानसाः । ७

कृत्वा विभीषणमशेषनिशाचरेशं,
लङ्कापुरेऽसुरभटैरुपशोभमाने ।
अग्नौ विशुद्धधरणीतनयासमेतोऽ-
योध्यां ययौ रघुपतिः किल पुष्पकेण ।। ८

•

इति श्रीमद्रामगीतगोविन्दे महाकाव्ये
श्रीजयदेवकृतौ लङ्काविजयो
नाम पञ्चमः सर्गः ।। ५

•

रघुपतिः किल असुरभटैः उपशोभमाने लङ्कापुरे विभीषणं रावणानुजम् अशेषनिशाचरेशं कृत्वा पुष्पकेण पुष्पकाख्येन विमानेन अयोध्यां स्वां पुरीं ययौ जगाम । किम्भूतो रामः—अग्नौ विशुद्धा या धरणीतनया तया समेतः संयुतः । ८

इति श्रीमद्रामगीतगोविन्दार्थविवर्णने पञ्चमः सर्गः । ५

•

•

•

षष्ठसर्गः

ददर्श काननं भूध्रं गङ्गां नाशितकल्मषाम् ।
भरद्वाजं विलोक्याऽथ प्राप साकेतकं हरिः ।। १

हरिः श्रीरामः काननं दण्डकारण्यं भूध्रं विन्ध्याद्रिगिरिसमूहं नाशितकल्मषां दूरीकृतदुरितविपाकां गङ्गां भरद्वाजम् ऋषिवरं ददर्शापश्यत् । विलोक्य दृष्ट्वा अथ साकेतमयोध्यां प्राप प्राप्तवानित्यर्थः । अत्राथ ददर्शेति द्वयोः सर्वत्रान्वयोऽस्ति । १

अथ गीतं त्रयोविंशम् ।

पौराः—

अत्र रामं दृष्ट्वोचुरित्यध्याहार्यम् ।

अथ पौरोक्तमेव गुर्जरीरागेण रूपकतालेन पश्यतेत्यादिना गीतेन विवृणोति जयदेवः—

पश्यत रामचन्द्रमतिशोभम् ।
विधिहरिहरदिननाथनाक-
पतिमुनिगणमानसलोभम् । १ ध्रुवपदम्

भो जनाः ! अतिशोभं रामचन्द्रं पश्यतालोकयत । किम्भूतं रामचन्द्रम्—विधिश्च हरिश्च हरश्च दिननाथश्च नाकपतिश्च मुनिगणाश्च ते तेषां यन्मानसं चित्तं तस्य लोभो यत्र तम् । १

नीलशकलसन्निभशरीररुचिशुक्तिसुविद्रुमहारम् ।
वामभागसीताशुभशोभितमनुगतहरिपरिवारम् ।।

पुनः किम्भूतम्—शुक्तेः सुविद्रुमास्तेषां हारो यस्य सः । नीलस्य शकल खण्डं नीलशकलं तत्सन्निभा शरीरस्य रुचिः कान्तिर्यस्य सः । नीलस्य शकलं

खण्डं नीलशकलं तत्सन्निभा शरीरस्य रुचिः कान्तिर्यस्य सः । नीलशकलसन्निभशरीररुचिश्चासौ शुक्तिसुविद्रुमहारस्तम् । 'विद्रुमो वृक्षभेदे स्याच्छुक्तिजे सजलेऽपि च' इति विश्वः । शुभा कल्याणदा चासौ शोभा शुभशोभा सीतायाः शुभशोभा सीताशुभशोभा सा सञ्जाता अस्मिन्निति सीताशुभशोभितः वामभागः सीताशुभशोभितो वामभागो यस्य तम् । पुनः किम्भूतम्—अनुगतः हरिपरिवारो वानरसमूहो यस्य तम् । २

भानुसमानपुष्परथसंगतमनुजसहितमसुरघ्नम् ।
चण्डविशिखकोदण्डविनाशितसकलचराचरविघ्नम् ।। ३

पुनः किम्भूतम्—भानुसमानो योऽसौ पुष्परथः पुष्पकाख्यं विमानं तत्र संगतम् उपविष्टम् । पुनः किम्भूतम्—अनुजसहितम् । पुनः किम्भूतम्—असुरघ्नम् । पुनः किम्भूतम्—चण्डविशिखकोदण्डाभ्यां विनाशितानि अखिलानि समग्राणि चराचरविघ्नानि येन तम् । ३

भरताऽऽलिङ्गनगुरुपादाम्बुजप्रणतिविकम्पितभालम् ।
द्विजनतिकरणविधानपरस्परपृच्छं चलवनमालम् ।। ४

पुनः किम्भूतम्—भरताऽऽलिङ्गने गुरुपादाम्बुजप्रणतौ विकम्पितं भालं यस्य तम् । पुनः किम्भूतम्—द्विजनतिकरणविधाने परस्परं पृच्छा यस्य तम् । 'प्रश्नोऽनुयोगः पृच्छा च' इत्यमरः । पुनः किम्भूतम्—चला वनमाला यस्य तम् । 'आपादलम्बिनी माला वनमालेति गीयते' इत्यभिधानचिन्तामणिः । ४

मातृभवनकृतगमनमनिन्दितमणिमयपीठनिवासम् ।
चामरयुगलसितातपवारणमण्डितमञ्जुलहासम् ।। ५

पुनः किम्भूतम्—मातृभवने कृतं गमनं येन तम् । पुनः किम्भूतम्—अनिन्दितमणिमयपीठे निवास उपवेशो यस्य तम् । पुनः किम्भूतम्— चामरयुगलसितातपवारणाभ्यां मण्डितः मञ्जुलः मनोहरः हासो यस्य तम् । ५

हंसदुकूलपुञ्जमुकुटप्रभया प्रतिभासिकपोलम् ।
निजजनमुपरिकृपामयशुभ्रकटाक्षनिवेशनलोलम् ।। ६

पुनः किम्भूतम्—हंसवच्च यद्दुकूलं हंसदुकूलम्, मुकुटप्रभायाः पुञ्जः पुञ्जमुकुटप्रभा हंसदुकूलेन पुञ्जमुकुटप्रभया च प्रतिभासि प्रतिबिम्बितं कपोलं यस्य तम्। निजजनम् उपरि स्वकीयजनस्योपरिष्टात् कृपामयशुभ्रकटाक्षाणां निवेशने विन्यासे लोलश्चपलः व्यग्रचित्तस्तम् । ६

वन्दिवेषधरवेदचतुष्टयविहितविजयगुणगाथम् ।
कनकरत्नमयपाणिविशेषकृताखिललोकसनाथम् ।। ७

पुनः किम्भूतम्—बन्दिवेषधराः ये वेदास्तेषां यच्चतुष्टयं तेन विहिता आपादिता विजयगुणगाथा यस्य तम् । पुनः किम्भूतम्—कनकरत्नानां प्राचुर्यं ययोस्तौ कनकमयौ एवंविधौ यौ पाणी ताभ्यां विशेषेण कृताः अखिलाश्च ये लोकास्ते सनाथाः ऐश्वर्यवन्तो येन तम् । ७

श्रीजयदेवविनिर्मितमतिशयरघुपतिचरितमनूपम् ।
हरिचरणस्य तनोतु शिवं हृदि मानसहंससरूपम् ।। ८

अनूपं निरुपमं श्रीजयदेवविनिर्मितम् । अतिशेतेऽसौ अतिशयः अवाङ्मनोगोचरो यो रघुपतिस्तस्य चरितं यस्मिन् तदिति । अतिशयरघुपतिचरितम् । एवंविधमिदं गीतं हृदि हरिचरणस्य शिवं मानसहंससरूपं तनोतु विपुलीकरोतु । मानसो यो हंसस्तस्य समानं यद् रूपं तत् । ८

इति गीतं त्रयोविंशम् ।

निजसरसिजनेत्रैः पावयित्वा समस्तं,
निजनिकरमुनीन्द्रैर्जानकीपूर्णपार्श्वः ।
रघुपतिरथ शेते तल्पमध्ये मनोज्ञे,
विशदरुचिरवर्णे स्वर्णसौधे सुखेन ।। २

अथाऽनन्तरम् । रघुपतिः निजानि स्वकीयानि यानि सरसिजनेत्राणि तैस्तथा। निजनिकरमुनीन्द्रैः निजाः स्वकीयाश्च ये निकराः समूहास्तैः सहिता ये मुनीन्द्रास्तैः समस्तं जगत् पावयित्वा विशदरुचिरवर्णे स्वर्णसौधे मनोज्ञे तल्पमध्ये सुखेन शेते स्म । अत्र स्मयोगे लट् । तथेति शेषः । २

प्रातःकाले वैतालिकाः—

प्रातःकाले प्रभातसमये तं वैतालिकाः प्रबोधयामासुः । अत्र तं प्रबोधयामासुरिति शेषः ।

अथ गीतं चतुर्विंशम् ।

तदेव भैरवीरागेण यतितालेन जहिहीत्यादिना गीतेनोच्यते—

जहिहि शयनमरविन्दविलोचन ! खगकेतो !।
करुणापूरितशुभनयनेन विलोकय मङ्गलहेतो ! ।। १ ध्रुवपदम्

हे अरविन्दविलोचन ! हे खगकेतो ! हे गरुडध्वज ! 'ग्रहभेदे ध्वजे केतुः' इत्यमरः । शयनं शय्यां जहिहि त्यज । अथ हे मङ्गलहेतो ! करुणया दयया पूरितं पूर्णं च यत् शुभं नयनं लोचनं तेन विलोकय पश्य । १

उदयति भानुरयं विधुना सममेति समस्ततमिस्रम् ।
दधति नभोऽरुणतामरुणेन वभूव सदोजसमिश्रम् ।। २

हे अरविन्दविलोचन ! विधुना चन्द्रमसा समं सार्द्धं समस्तस्य जगतः तमिस्रं तिमिरम् एति गच्छति, अयं भानुः उदयति । अन्यत् किं च—नभ अरुणेन रविसारथिना अरुणतामारक्ततां दधति बिभर्ति । 'दध—धारणे ।' किंच—नभः सदोजसमिश्रं बभूव सत्तेजस्वितां प्राप्नोत् ओज एव ओजसं सच्च तत् ओजसं सदोजसं तेन मिश्रं मिलितम् । 'ओजस्तेजः प्रतापोऽस्त्री' इत्यमरः । 'मिश्र—सम्पर्के ।' मिश्र्यत इति मिश्रम् ।

विकसति पद्मवनं सकलं विहगावलिदातिनिनादम् ।
हंसविरावविबोधितचक्रनिचयगतसर्वविषादम्।। ३

हे अरविन्दनयन ! सकलं पद्मवनं विकसति विकासं प्राप्नोति । किम्भूतं पद्मवनम्—विहगानां पक्षिणां या आवलिः पंक्तिः सा एव दा रक्षिका तस्या अतिनिनादो यत्र तत् । 'निनादो निनदः क्वणो वाक्यं वचनमेव च' इति कोशात् । 'दो दाने पूजने क्षीणे दानशौण्डे च पालके' इत्यक्षरनाममालिकायाम् । अस्यायमर्थः—यथोपवनपालको यः कश्चिद्भवति स स्वकीयोपवनशोभातिशयं स्वामिनो दर्शयितुकामनया शुकादिभ्यस्तद्रक्षां विदधत्प्रातरुत्थाय निनदति तथैवं विहगावलिरपि स्वपद्मवनं भ्रमरगजादिभ्यो रक्षन्निव तच्छोभां भवद्दर्शयितुकामेव सती निनदतीति । पुनः किम्भूतम्—हंसानां यो विरावस्तेन विबोधितः प्रबुद्धो यश्चक्रनिचयः चक्रवाकसमूहः सः गतसर्वविषादो विगतस्त्रीवियोगदुःखो यत्र तत् । 'विरावो ध्वनिशब्दे स्यात्पक्षिशब्दे महाध्वनौ' इति कोशात् । ३

दीपशिखाऽतिविशुद्धतरा मलिनत्वमुपैति विशाला ।
सीदति कुमुदमुलूकततिः प्रतिगच्छति लयमुडुमाला ॥ ४

हे अरविन्दनयन ! अतिविशुद्धतरा विशाला शोभमाना दीपशिखा मलिनत्वं म्लानताम् उपैति प्राप्नोति । कुमुदम् उलूकततिश्च सीदति अवसादं प्राप्नोति । 'कैरवं चन्द्रकान्तं च गर्दभं कुमुदं कुमुत्' इति माधवः । उलूकाः रात्रिचरपक्षिविशेषास्तेषां ततिः समूहः । उडूनां ताराणां माला पंक्तिः लयम् अदर्शनं प्रति गच्छत्युपैति । ४

कर्षति शृंखलकं गजता युगभागविभाजितनिद्रा ।
नमति महीपसभाऽभिमुखं तव राघव ! दूरदरिद्रा ॥ ५

हे राघव ! गजानां हस्तिनां समूहो गजता गजसमूहः शृंखलकमालानं कर्षति । किम्भूता गजता—युगभागाभ्यामुभयपार्श्वाभ्यां विभाजिता दूरीकृता विभुज्य परित्यक्ता निद्रा यया सा । 'भाज—पृथक्कर्मणि' व्यभाजीति विभाजिता । हे राघव ! महीपानां सभा तवाऽभिमुखं त्वत्सम्मुखं यथा स्यात्तथा नमति नमस्करोति । किम्भूता महीपसभा—दूरे दरिद्रं दुर्गतिर्यस्याः सा । ५

गायति सामखिलामखिलामृषिराजिरखण्डितवीणा ।
नृत्यति देववधू रुचिरायुतभावभरेण नवीणा ॥ ६

ऋषिराजिः साम्नः खिला सामखिला तां सामखिलां सामवेदचं गायति । किम्भूतां सामखिलाम्—अखिलाम् उदात्तादियथोचितोच्चारतालस्वरसमग्राम् । 'खिलं खण्डे ऋचि प्रोक्तं ब्रह्मनिर्वाणकर्मसु' इति विश्वः । किम्भूता ऋषिराजि—अखण्डिता षड्जादिस्वरमूर्च्छनादिभिः परिपूर्णा वीणा यस्याः सा । रुचिरा मनोहरा देववधूर्नृत्यति नर्तने वर्तमानाऽस्ति । किम्भूता देववधूः—अयुताः असंख्याताश्च ये भावास्तेषां यो भरः समूहस्तेनोपलक्षिता नेयं वारवधूर्देवाङ्गनेयमिति परिज्ञाता । पुनः किम्भूता देववधूः—नवीणा । 'वी—गतौ' इत्यस्मात् 'रास्नादयः' इति नक्प्रत्यये निपातात्सिद्धिः । ६

शीतलमन्दसुगन्धसमीरगलितकुसुमाऽऽवलिरेखा ।
पठति परस्परमेव पटुः श्रुतिपाठमवारितवेषा ॥ ७

शीतलो मन्दः सुगन्धो यः समीरः पवनस्तेन गलितानि यानि कुसुमानि पुष्पाणि तेषां या आवलिः पंक्तिः तस्यां रेखा । मुखाग्ररोमदण्डो यस्याः सा शीतलमन्दसुगन्धसमीरगलितकुसुमाऽऽवलिरेखा । भ्रमराङ्गणा परस्परम् अन्योऽन्यं यथा स्यात्तथा श्रुतिपाठं पठति वेदपाठं करोति । किम्भूता—अवारितः अतिस्पष्टः वेषो यस्याः सा । पुनः किम्भूता—पटुः तत्पठने प्रवीणा । अनेनेयमपि काचिद्देवांगनास्ति भवद्दर्शनार्थमेवागताऽस्ति अत एनां स्वात्मानं दर्शयस्वेति सूचितम् । 'रेखा सूक्ष्मतरे पंक्तौ रेखा रोमाग्रदण्डके' इति हलायुधः । ७

श्रीकविराजशिरोमणिदामलसज्जयदेवविगीतम् ।
मोदभरं सुजनस्य तनोतु करोतु मनो रसनीतम् ॥ ८

श्रिया युक्ताश्च ये कविराजाः श्रीकविराजाः तेषां मध्ये ये शिरोमणयः तेषां यद्दाममाला तत्र लसन् देदीप्यमानो यो जयदेवस्तस्य विशिष्टं यद्गीतं तत् सुज-

नस्य सुपुरुषस्य मोदभरं परमानन्दभावं तनोतु विस्तारयतु। 'डुभृञ्—धारणपोषणयोः' 'स्वरादः' भ्रियते इति भरः। पुनः मनः रसनीतं भक्तिरसप्रवृत्तं करोतु। 'इण्–गतौ।' नितराम् इतं प्राप्तं नीतं, रसं नीतं रसनीतम्। ८

इति गीतं चतुर्विंशम्।

इदानीं प्रारब्धैतद्ग्रन्थान्ते सम्प्रवृत्ताऽखण्डानन्दमयः श्रीजयदेवः स्वे हृद्युज्जिहानं भगवन्तं श्रीमद्रामचन्द्रं पुरःस्थितं मत्वा प्रणमति—

यं ध्यात्वा सकृदेव देवमुनयो गच्छन्ति सायुज्यकं,
मोक्षस्तोत्रमुपैति यत्र वचनं संकीर्त्यमानं सताम्॥
यन्नामस्मरणान्नरोऽखिलमघं तीर्त्वा विशुद्धो भवे-
त्तं देवं प्रणमामि नित्यममलं सूक्ष्मं प्रकृत्याः परम्॥ ३

देवाश्च मुनयश्च ते देवमुनयः यं श्रीरामचन्द्रं सकृदेव ध्यात्वा सायुज्यकं गच्छन्ति। यत्र यस्मिन् श्रीरामचन्द्रे संकीर्त्यमानं प्रोच्यमानं वचनं सतां तत्र विद्यमानपुंसां मोक्षस्तोत्रम् उपैति मोक्षकरणस्तुतिं प्राप्नोति, मोक्षस्य करणं च तत्स्तोत्रं मोक्षस्तोत्रम्। अनेन यः श्रीमद्रामगुणानुवादं शृणोति सोऽपि न पुनः संसरति वक्तुस्तु किमुतेति सूचितम्। यन्नामस्मरणात् नरः अखिलम् अघं तीर्त्वा विशुद्धो भवेत् तं देवं श्रीरामचन्द्रं प्रणमामि। किम्भूतम्—नित्यमनश्वरम्। पुनः किम्भूतम्—अमलं निरञ्जनम्। पुनः किम्भूतम्—सूक्ष्ममणीयांसम्। पुनः किम्भूतम्—प्रकृत्याः परं मायातः परीभूतम्। ३

श्रीमद्विदेहनृपदेशविशेषवासो,
निःशेषभूमिपतिमण्डलमाननीयः।
एतच्चकार वरगानरसप्रधानं,
काव्यं कविप्रकरमौलिविभूषणं सत्॥ ४

श्रीमान् यः विदेहनृपस्तस्य यो देशविशेषस्तस्मिन् वासो यस्य सः। निःशेषाः समस्ताश्च ये भूमिपतयस्तेषां मण्डलेषु राष्ट्रमण्डलेषु माननीयः

मानार्हः। एवं विधः श्रीजयदेवः एतत् वरगानरसप्रधानं काव्यं चकार कृतवान्। किम्भूतं काव्यम्—कविप्रकरमौलिविभूषणम्, कवीनां ये प्रकराः समूहास्तेषां मौलिविभूषणं शिरोभूषणं शिरोमणिरिव भवतीति तत्। पुनः किम्भूतं काव्यम्—सत् समीचीनं काव्यदोषरहितमित्यर्थः। यद्वा—सत् त्रिष्वपि कालेषु सत्यं रामचरितत्वात्तन्नाशापत्यभावात्। इति। ४

अथ शिरोमणित्वमेव विवृण्वन् प्रारब्धस्वीयग्रन्थाख्याप्रतिपादनं करोति—

श्रीमद्रामायणक्षीरसागरान्मन्दरोपमः।
जयदेवो रामगीतगोविन्दं रत्नमाकरोत्॥ ५

●

इति श्रीमद्रामगीतगोविन्दे महाकाव्ये
श्रीजयदेवकृतौ रामाभिषेको,
नाम षष्ठः सर्गः॥ ६

●

श्रीमच्च तद्रामायणं तदेव क्षीरसागरो रत्नाकरस्तस्मात्, मन्दरोपमः मन्दराचलसदृशो जयदेवः रत्नमिव भवतीति रत्नं रत्नसदृशं रामगीतगोविन्दम् आकरोदाकार्षीत् नवनीतवदाकृष्य प्रादुश्चकारेत्यर्थः। रमन्ते योगिनोऽस्मिन्निति रामः रामः गीतः प्रीत्याभिवर्णितो यासु ताः रामगीताश्च याः गावः रामगीतगावः वाल्मीक्यादिवाचस्तासां यो विन्दो लाभः स यस्य तत् रामगीतगोविन्दम्। ५

एतच्छ्रीमद्रामगीतगोविन्दार्थविवर्णनम्।
हनुमानकरोच्छ्रीमत्त्रिपाठी वत्सवंशजः॥

इति श्रीमद्रामगीतगोविन्दार्थविवर्णने षष्ठः सर्गः। ६
समाप्तं चेदं सटीकं रामगीतगोविन्दनाम
महाकाव्यम्।

●

रामगीतगोविन्दस्थपद्यानामकाराद्यनुक्रमणिका

•

पद्यानि	पृष्ठसंख्याः	पद्यानि	पृष्ठसंख्याः
अ		उ	
अर्भकद्वयमवेक्ष्य	३७	उत्तुङ्गरदशिखरेण	३०
अयोध्याधिपतिर्वीरो	३७	उपवनवनभूषित	६७
अस्त्रशस्त्रसम्भूत	४१	उद्गीथरम्यपद	७८
अञ्जनीनन्दनप्रेम	५६	उदयति भानुरयम्	१०१
अञ्जननीलनीरधि	८८		
अतिशयरुचिर	८२	ऋ	
आ		ऋष्यमूकमगमद्रघु	७६
		ऋक्षभल्लबहु	८८
आदाय दक्षिणे पाणौ	३८	ए	
आजानुबाहुमुदार	५३	एककविंशतिवार	४०
आखेटैरिपुमोक्षणैः	६२	एकस्मिन् समये राजा	६२
आकलय्य भूपतिरिपु	६५	एकदा रघुपतिर्महागिरौ	७३
इ		क	
इति तेषां स्तुतीः	१३	कनककशिपुतनु	६
इन्द्रनीलाभतनुमतनु	१४	कल्पान्तकोल	१०
इति पठति यो रघुवीर	३१	कम्बुनिभकण्ठ	१४
इति रामस्तवं कृत्वा	९६	कनकमयपट्ट	१५

पद्यानि	पृष्ठसंख्याः	पद्यानि	पृष्ठसंख्याः
कम्बुरुचिरतर	१९	गवयशरभहरिणी	७१
कपिलादिकसनकादि	२३	गायति साम	१०३
कस्तूरिकाश्यामल	२५	गुहानिवासकिरात	७२
कनकासने मणिमण्डपे	५१	गोदातरलतरङ्ग	७४
कलयति शरमिव	८५	गौतमीं तारयित्वादौ	३३
करकोदण्डशर	९१	च	
करुणानिकेततम !	९४	चरणसलिलकृत	६
कर्षति शृङ्खलकम्	१०२	चण्डप्रयात !	९४
कालनीयपशभम्	९१	चम्पकभूर्जकदम्ब	७१
कालाम्भोदावभासम्	१२	चपलाविभूषित	५२
कालाऽग्निसदृश	४५	चिन्तामणिसुरधेनु	२३
कुत्र माहेश्वरं चापम्	३७	चित्रकूटमवलोकय	७०
कुलपतिर्जगतामुपकारकः	५४	ज	
कुरु भरतं कोशलपुर	६४	जयदेवभणितमय	१२
केतुदम्भोलिरेखा	५५	जलदाभमिन्दु	३१
केयूरकुण्डलमुकुट	५२	जयति विदेहनगर	३३
कैकेय्यां भरतो	१६	जय रामचन्द्र !	४४
कोदण्डकलाकौतुक	१०	जयदेवविनयमतिशय	४६
कोदण्डबाणकुठार	३०	जयदेवभाषितमष्टपद	५३
कोशलाऽधीशजाया	१६	जयति गम्भीरजयदेव	५७
कृशशरीरगति	८४	जघान हीमान्गिरि	९३
कृत्वा विभीषणमशेष	९६	जय रामचन्द्र ! माया	९४
ख		जयदेवविनिर्मितमेव	९५
खण्डितकामसमाकुल	७५	जहिहि शयनमरविन्द	१०१
ग		जाम्बवद् वचनात्	८०
गजरथतुरगपदाति	३५	जित्वा रिपुं रघुवरो	९३

पद्यानि	पृष्ठसंख्याः
त	
तडिदाभवसन !	४६
तस्मिन् गते	४८
तिष्ठ विमूढमते !	६२
तीर्त्वा क्षारपयोनिधिम्	८२
तीर्त्वा पाथोनिधिं रामः	८६
तुङ्गकनकमय	८१
तोरणनिकर	३५
तृष्णानिविड	७६
द	
ददाह पावकास्त्रेण	३२
दर्शिताऽध्वा विनीतेन	५०
दर्शनादेव लोकार्ति	५७
दण्डकवनमतिचारु	७४
ददर्श काननम्	६८
दीपशिखाति	१०२
देवगृहैरभितः	६१
देवासुररणमध्य !	६३
ध	
धर्मादिकफल	२३
धाराधरप्रतिम	६५
ध्यायति तव मुख	८५
धृतकोदण्ड	२१
न	
नमदाखण्डल	५
ननाम साकेतनृपो	२१

पद्यानि	पृष्ठसंख्याः
न तु तव धर्महानि	६४
नम्रदिक्पाल	५५
नागलतारस	१८
नानारत्नविचित्र	१८
नाट्यारं प्रकरोतु	४२
नानामुन्याश्रमं	७०
नारदमुनिदर्शन	७६
निदध्वनुः	१६
निजकरमर्प्य	६४
निर्भयकुम्भजादि	७४
निजसरसिजनेत्रैः	१००
नीलशकलसन्निभ	६८
नीलपीतसित	६७
प	
पठति यो ज्ञानमज्ञान	१६
पण्डितसुमति	३५
परशुराममवलोक्य	३८
परस्परविवादे	४४
पश्य पश्य रघुवीर	६६
पद्याष्टादशसंख्यया	८६
पश्य पश्य रघुवर	८७
पठति जनः सुचिरम्	८६
परिकरकटि	६२
पश्यत रामचन्द्र	६८
पाणौ बाणशरासनौ	६८
पूरितानन्द	५६

पद्यानि	पृष्ठसंख्याः
प्रणमामि राममनुत्तमम्	२८
प्रतिचचाल पुरीम्	३३
प्रत्युवाच कुलाचार्यम्	६३
प्रह्लादनारद	७७
प्रणनाम मुहुर्मुहुः	८४
प्राप्य नैशाचरीम्	३२
ब	
बहुविधलोहयन्त्र	८०
बद्धजटामुकुटम्	६१
बन्दिवेषधर	१००
ब्रह्मादिदेवगण	१२
ब्रह्माभिधान	२६
ब्रह्माण्डसम्पुटरत्न	७६
ब्रह्मामहेन्द्रगन्धर्व	६४
भ	
भङ्क्त्वाऽशेष	८३
भरताऽऽलिङ्गन	६६
भजति निशेष	८५
भानुसमानपुष्परथ	६६
भूभारभञ्जन !	६
भृकुटीकुटिल	३६
भृगुतिलक ! नमस्ते	४३
भृगुसनातननारद	५०
म	
मङ्गलमोदकरम्	१६
मणिचित्रकिरीट	२०

पद्यानि	पृष्ठसंख्याः
मदमोहकाम	४६
मन्दारमल्ली	५३
मन्दाकिनीप्रवाह	७०
मनुजाकार	६८
मायाविलास !	११
मातृभवनकृतगमन	६६
मारीचं मारयामास	३२
मुरचाणूर	७
मुक्तिचतुर्विध	६८
र	
रम्यबालरूपम्	१३
रराज भूपतिः	२०
रघुवरभुजदण्ड	३८
रघुवंशकमल	४५
रजनीचरप्रकर	४५
रजनीचररमणी	८४
रामरामरामेति	८६
राकापतिशतकोटि	६१
राजाधिराज !	११
रामवदनमतिमञ्जु	१७
रामचन्द्रकरकमल	२१
राजब्रह्ममहर्षिभ्यो	२५
रामचन्द्रं समालोक्य	२८
राजर्षे ! सर्वतत्त्वज्ञ !	५४
राजदनेकलवङ्ग	६१
रावणशासनकनक	७५

पद्यानि	पृष्ठसंख्या:
रावणाऽभिभव	९
रागादिदूरमशेष	७८
रुचिरलतातरु	३४
रुचिरजटामुकुट	३९
रुचिरनिकेतन	८१
ल	
ललितसुमेरु	४०
लब्ध्वा धनानि	५८
लङ्कां रुरोध	९०
लङ्कापतिरालोक्य	९०
लङ्कापुरमवलोक्य	८०
व	
वन्देऽरविन्दनयन ?	१०
वरमभीष्ट	२२
वन्दे शारदपूर्णचन्द्र	४७
वाल्मीकिनाऽऽद्यकविना	३
वागीश ! सर्व	४६
वाणीजह्नुतरणि	६७
वालितनय	८७
वालखिल्यवैखानस	८९
विविधमणिचित्र	१४
विद्याविचारण	५२
विहितसुजन	७
विपुलविस्तार	५७
विहरति हरि	५९
विलिखितमकर	६०

पद्यानि	पृष्ठसंख्या
विददारपदाङ्गुष्ठ	७३
विरहतया विदधाति	८५
विकसति पद्मवनं	१०१
वेदविहितविधि	८
वैदूर्यद्युतिमिन्दु	२६
वैदेहीसहजानुजो	६६
व्यालादपत्र !	९५
श	
श्यामं सहासवदनम्	१
शरभङ्गसुतीक्ष्ण	७३
'शिव शिव शिव' शिवमन्त्र	४१
शीतलमन्द	१०३
श्रुत्वा महर्षेर्वचनम्	५८
शृणु मम वचन	६३
श्रुत्वा नृपो	६५
शुकहारीत	७२
शुभसोपान	८१
शेषभयङ्कर	३४
शैलनिवहमानीय	८७
श्रीजयदेवविधायक	८
श्रीजयदेवकवे:	२०
श्रीजयदेवभणित	८४
श्रीजयदेवकवेरुदितम्	३६
श्रीजयदेवकवेरुदितम्	४१
श्रीरामरूप	५१
श्रीजयदेवकवेरुदितं सरयू	६२

पद्यानि	पृष्ठसंख्या:
श्रीजयदेवभणितमिति	६८
श्रीजयदेवकरचित	६५
श्रीजयदेवमहाकवि	७३
श्रीजयदेवकवेरुदितं दण्डक	७६
श्रीरामनाम	७७
श्रीजयदेवविनिर्मित	८२
श्रीजयदेवकवेरिदमुदितम्	८६
श्रीजयदेवभणित	९३
श्रीजयदेवविनिर्मित	१००
श्रीकविराजशिरोमणि	१०३
श्रीमद्विदेहनृप	१०४
श्रीमद्रामायण	१०५
स	
सत्यस्वरूप	३९
सखे ! सानुरागम्	५५
सतानन्दवशिष्ठाभ्याम्	५०
समयमवाप्य	६४
सप्ततालानयं	७६
सन्ततमसुर	८१
स्फटिकपद्म	७१
स्फुरदङ्गुलि	२२
स्मृतिवेदहर	३०
स्फाटिकं विविध	५८
स्मृतिवेदाद्युद्धारक	४
संसारसागर	२
सादरमज्जदमित	५९

पद्यानि	पृष्ठसंख्या:
सारसजल	९०
सिंहासनपरिपूरित	६७
सिद्धयक्षविद्याधर	८८
सीतापतिरघुपति	९५
सुखदनासापुटम्	१५
सुबाहुमुख्यै	२०
सुखतवितान	३५
सुकृते परं प्रकृते:	७७
सुग्रीव:कपि	७९
ह	
हत्वा मार्गे मार्गणेन	२६
हंसदुकूल	१००
हेमनयनसंहारण !	५
क्ष	
क्षत्रियवंशनिकन्दन	६
क्षमापुष्पश्यामो	२४
क्षमापाल: कालो	२५
क्षीरपयोनिधि	१८
त्र	
त्रिशिर:खरदूषण	११

●●●

टीकायां निर्दिष्टानि ग्रन्थनामानि

ग्रन्थनामानि	पृष्ठाङ्काः
विश्वः	२, ४, १०, १३, १४, २०, ३२, ३५, ५०, ८१, ९९।
अमरकोषः	२, ४, ७, ९, ११, १२ १४, १६, १९, २२, २३, २४, २७, ३०, ३१, ३३, ३४, ३५, ३७, ३८, ३९, ४०, ४१, ४२, ४३, ४४, ५२, ५३, ५६, ५७, ५८, ५९, ६१, ६२, ७०, ७१, ७२, ७४, ८१, ८२, ८९, ९९।
श्रीमद्भागवतम्	६, २४, ३०, ६९।
वाल्मीकिरामायणम्	८।
हलायुधः	१०, १६, २२, ४२, ५७, ६५, ८५, १०३।
नाममालिका	१७, ३६।
अक्षरमालिका	१९, ६४।
अक्षरनाममालिका	४७।
वैजयन्ती	२४, ८०।
भगवद्गीता	३४।
दुर्गासप्तशती	३६।
निघण्टुः	३८।
मेदिनी	६५, ७१।
हनुमन्नाटकम्	७८।
रघुवंशः	८८।
वाणीभूषणम्	९२।
अभिधानचिन्तामणिः	९९।

समागतवृत्त-लक्षणानि

अनुष्टुप्—
श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥
१/६, ८, ९, ११, १६। २/१—४, ६, ८—१०। ३/१, ३। ४/६। ५/३। ६/१, ५।

वसन्ततिलका—
उक्ता वसन्ततिलका तभजा जगौ गः।
१/१, २, ३, ५। २/१६। ३/७, १२। ५/४, ८। ६/४।

वैतालीयम्—
षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः।
न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः॥
१/४, १२। ४/४। ५/१।

स्रग्धरा—
म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्।
१/७।

उपेन्द्रवज्रा—
उपेन्द्रवज्रा जतजास्ततो गौ।
१/१०। ५/५

उपजातिः
स्यादिन्द्रवज्रा यदि तौ जगौ गः, उपेन्द्रवज्रा जतजास्ततो गौ।
अनन्तरोदीरितलक्ष्मभाजौ, पादौ यदीयावुपजातयस्ताः।
इत्थं किलान्यास्वपि मिश्रितासु, वदन्ति जातिष्विदमेव नाम।
१/१३। ३/६।

वंशस्थम्— जतौ तु वंशस्थमुदीरितं जरौ ।
१/१४ ।

शिखरिणी— रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।
१/१५, १८।

शार्दूलविक्रीडितम्— सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम् ।
१/२० । २/१२, १५ । /३/६, १३, १४ । ४/६ ।
५/२ । ६/३ ।

द्रुतविलम्बितम्— द्रुतविलम्बितमाह नभौ भरौ ।
२/५ । ३/२, ४ ।

रथोद्धता— रान्नराविह रथोद्धता लगौ ।
२/७ । ३/८ । ४/२ ।

पुष्पिताग्रा— अयुजि नयुगरेफतो यकारो,
युजि च नजौ जरगाश्च पुष्पिताग्रा ।
२/११ ।

मालिनी— ननमयययुतेयं मालिनी भोगिलोकैः ।
२/१३ । ६/२ ।

पथ्यावक्त्रम्— युजोश्च चतुर्थतो जेन पथ्यावक्त्रं प्रकीर्तितम् ।
३/१०, ११ । ४/१, ३ ।

प्रहर्षिणी— त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम् ।
४/७ ।

टीकायां विशिष्टशब्दव्युत्पत्तिः

पृष्ठाङ्कः

३—रामायणम् — रमन्ते क्रीडन्ति योगिनोऽस्मिन्निति रामोऽखण्डानन्दमयब्रह्म तस्यायो निश्चय इति रामायः तं नयति प्रापयतीति रामायणम् । यद्वा रामस्य श्रीरामचन्द्रस्यऽयनं रामायणम् ।

४—रामः — रामयत्याह्लादयतीति रामः । रमन्ते योगिनोऽस्मिन्निति रामः ।

४—श्रीजयदेवनिर्मितम् — श्रीश्च जयश्च ताभ्यां सहितश्चासौ देवः श्रीजयदेवः रामचन्द्रस्तत्प्रीतये निर्मितम् ।

२३—अतिभारम् — अतिक्रान्तः भारो येन तदतिभारं भारहरम् । अतिशया चासौ भा तां राति ददातीति तत् ।

२७—सिरतारकाः — सिन्वन्ति बध्नन्ति युञ्जन्तीति सिराः रामे बद्धदृष्टयस्तारकाः येषां ते ।

४३—रामदेवः — रमन्ते युद्धाजिरे क्रीडन्तीति रामाः मारीचविराधेन्द्रजिद्रावणादयस्तान्दीव्यतीति विजगीषतीति रामदेवः श्रीरामचन्द्रः ।

४७—ए ! — 'अः शिवे केशवे वायौ' इत्यक्षरमालिकायाम् । अ एव इः इति रूपं भवति तत्सम्बुद्धौ हे ए ! इति साधुः ।

४७—रघुवरम् — रघूणां मध्ये वरस्तम् । यद्वा–रघवो वरः येन तम् ।

यद्वा–रङ् (लङ्) घन्ते रागादीनतिक्रम्य त्वाम-नुवर्तन्त इति रघवस्त्वद्भक्तास्ते वराः यस्य तम् ।

५१—अनूपमम् अनुगता उप समोपे मा सीता यस्येति तत् । यद्वा–अनुगता पश्चात् गता विमुखा उपमा यस्मिंस्तत् ।

५३—अपक्षपक्षकरम् न कश्चन पक्षो येषां ते अपक्षाः आत्मारामाः । यद्वा–अपक्षाः पक्षशून्याः तेषां पक्षकरं तद्विपक्षो-न्मूलम् ।

५७—रामम् रमन्ते योगिनोऽस्मिन्निति रामं योगिनां नियत-स्थानम् ।

६०—समयः समीयते निश्चीयते जनैरिति समयः ।

७२—वनदेवीसम् अस्य विष्णोरपत्यम् इः कामः । 'षोऽन्त कर्मणि' वनदेवीनाम् इं कामं स्यति समापयति पूरय-तीति तत्

७३—विनीतम् 'ई-गतौ' नि अतिशयेन ईयते गम्यते इति नीतिः विचित्रा नीतिर्गतिः यस्मिन्निति तत् विनीतम् ।

७३—अनिशम् न अन्यत् नितरां शं यस्मादिति अनिशो मोक्षस्तम् ।

७६—अनूपम् अनुगता पश्चाद् गता न पुरो भवित्री उपा उपमा यस्य तत् अनूपम् । अत्र नामैकदेशे नामग्रहणं यथा—'भीमो भीमसेनः' इति तद्वत् 'ब्भ्य' इति सूत्रनिर्देशात् ।

८२—अनुमानम् अनुगतः विमुखोभूतः मानोऽहम्भावो यस्मात्तम् गताभिमानमित्यर्थः । यद्वा—मन्यते ज्ञायत

इति मानम् अनु पश्चात् गतिर्यस्येत्यनुगतम् अनुगतम् अनुगीभूतम् मानं ज्ञानं यस्य तम् ।

१०४—रसनीतम् रसनीतं भक्तिरसप्रवृत्तं करोतु । 'इण्-गतौ' । नितराम् इतं प्राप्तं नीतं रसं नीतं रसनीतम् ।

१०५—रामगीतगोविन्दम् रमन्ते योगिनोऽस्मिन्निति रामः, रामः गीतः प्रीत्याभिवर्णितो यासु ताः रामगीताश्च याः गावः रामगीतगावः वाल्मीक्यादिवाचस्तासां यो विन्दः लाभः स यस्य तत् रामगीत-गोविन्दम् ।

टीकोद्धृतसारस्वत-व्याकरण-सूत्रसूची

पृष्ठानि	सूत्राणि
५	आतो डः
६	भ्यः
१३	घञर्थे कः
१५	धाञो हिः किति ते
१७	दृशादेः शः
”	दिवादेर्यः
”	य्योः
१८	घञ् भावे
२०	बपादेरित्र्
२७	स्फायादेरक्
४२	प्रशसायां रूपः
४७	स्वार्थेऽपि
”	यस्य लोपः
५५	ज्वलादेर्णः
६०	पचादेः रः
६६	नाम्नि च
६७	ऋते आदि योगे पञ्चमी
७२	टाडकाः
७६	मूलविभुजादेः कः
१०३	रास्नादयः
१०४	स्वरादेः

जयदेव–विषयिणी जनश्रुतिः

शङ्कराचार्यकृतमोहमुद्गरे पुरावृत्तं यथा—कदाचिदटव्यामटमानो जयदेवो दस्युभिर्लूनपाणिपादः कूपे क्षिप्तस्ततोऽनेकजन्मपरिचितपुण्यातिशयात्तादृक्पुण्य-शालिभूमिस्पर्शनाच्चैवाष्टव्याकरणविभूषितदन्तप्रदेशा जिह्वाग्रवर्तिकाणादगौतम-वैशेषिककृतरचनाविशेषा भगवती जयदेवहृदये जिह्वायां च प्रादुरासीत् । ततोऽनेक-जन्मकृतकृष्णसेवनपरिपाकविपाकेन कृष्णगुणवर्णनप्रधानं गीतगोविन्दमातनोति स्म । अथ कदाचिज्जलार्थं भ्रमद्भिः कैश्चिल्लूनपाणिपादो जयदेवो दृष्टः । यत्नान्निः-सारितोऽपि ततो विद्याविनोदशीलोऽयमनेककार्याकार्यविवेकविशिष्टोऽयं नियत-कर्मकर्तृ कोऽयमत्यद्भुतोऽयमिति विद्वद्भिर्नृपतिं प्रति विज्ञापित आसीत् । नृपतिश्च शिबिकामारुह्य तत्र गतस्ततोऽन्यस्यां शिबिकायामारोह्य तमानीतवान् । अथ तत्रातिविशिष्टविद्याभ्यासचातुर्यमवगम्य महति द्रव्याधिकारे दानाध्यक्षकर्मणि नियुक्तोऽथ तदङ्गलाविनोऽयमस्मान् घातयिष्यत्यतो वयमेवैनं घातयाम इति कृत-सन्धयो यदृच्छातस्तत्रागतास्तेऽपि च राज्ञाधिकृताः । अथ सभायां कदाचिदेष जयदेवोऽतिबुद्धिशाली देवाचार्य इव दृश्यत इति नृपवचः शृण्वन्तोऽपि त ऊचु-रयमतिदुष्कर्माऽस्माभिरेव निष्कासितः । पुरा मार्गघ्नो दस्युराडयम् अत एव केन-चिन्नृपतिनेदृग्गतिमापन्नोऽस्त्यतो मारणीयोऽयमन्यथा राज्यभङ्गं करिष्यति । इति शृण्वन्सन्दिग्धो राजाऽनेकधा परीक्ष्याथ तत्समक्षमेवापृच्छद् भो जयदेव! के तव गुरवः कथं त्वयेदृग्गुणो लब्ध इति निगदितो जयदेव उवाच—राजन्नमी भवत्-पार्श्वगा एवास्मद्गुरव एभ्य एवं सर्वं लब्धम् । इति शृण्वन्तोऽपि त ऊचुर्नृप ! नाऽयं सत्यवाक् । अयं निगदनेनापि मित्राणीव शत्रूदासीनानपि वशमानेतुमलम् । झटिति हन्योऽस्त्वन्यथा राज्यभङ्गं करिष्यति । अथैतदसहमानेयं भूर्दीर्णा तद्विवरेणापि तदधोगतिरासीदथ पूर्वतोऽप्यतिविशिष्टपाणिपादविद्यावैभवशीलगुण आसी–ज्जयदेव इति ।

[अस्य टीकाकारेण टीकायां समुद्धृता]

समागतरागाणां लक्षणानि

●

मालवरागः

अस्य लक्षणम्

नितम्बिनीचुम्बितवक्त्रपद्मः,
शुकद्युतिः कुण्डलवान् प्रमत्तः ।
सङ्केतशालां प्रविशन् प्रदोषे,
मालाधरो मालवरागराजः ॥

वसन्तरागः

बसन्तरागस्य लक्षणम्

षड्जादिमूर्च्छने मान्ते गनीतीव्रौ वसन्तके ॥

'संगीतपारिजाते'

वसन्ते प्रहरे तुर्ये मकरध्वजवल्लभः ।
सम्भोगे विनियोक्तव्यो वसन्तस्तत्समुद्भवः ॥
पूर्णस्तल्लक्षणो देशी हिन्दोलोऽप्येष कथ्यते ।

'संगीतरत्नाकरे'

अस्य ध्यानम्

शिखण्डिपिच्छोच्चयचारुचूड–
श्चूताङ्कुरोद्भासुरकर्णपूरः ।
नव्याम्बुदश्यामतनुर्विलासी,
वसन्तरागोऽतिमनोहरश्रीः ॥

'रसकौमुद्याम्'

गुर्जरीरागः

अस्य लक्षणम्

ग्रहांशन्यासरिः पूर्णा प्रातर्गेया तु सुन्दरी ।
बहुली मिश्रिता नित्यं षड्जहीना क्वचिद् भवेत् ॥

'रसकौमुद्याम्'

अस्य ध्यानम्

इन्दीवरः श्यामतनुः सुकेशी,
पाटीरपत्रावलिचारुतल्पा ।
श्रुतिस्वरव्यूहविभागरम्या,
तन्त्रीमुखान् ? मञ्जुलगुर्जरीयम् ॥

'रसकौमुद्याम्'

आसावरीरागः

अस्य लक्षणम्

गौरीमेलसमुत्पन्नाऽऽरोहणे गनिवर्जिता ।
मध्यमोद्ग्राहधांशाद्याऽऽसावरी न्यासपञ्चमा ॥

'रसकौमुद्याम्'

मन्त्रिकाऽऽसावरीपूर्णा, सदा गेयातिकारुणा ।

'हृदयप्रकाशे'

गान्धारश्च निषादश्च, यत्र तीव्रतरौ कृतौ
निशून्यारोहणामादिः सम्पूर्णाऽऽसासावरी मता ।

'रागचन्द्रिकायाम्'

रामकरीरागः

अस्य रागस्य विभिन्नसंगीतग्रन्थेषु रामगिरिरामकरीरामकलीराम-क्रितिनामान्तरं दरीदृश्यते ।

अस्य लक्षणम्

रिकोमला गतीव्रा या मतीव्रतरसंयुता ।
धकोमला नितीव्रा च ख्याता रामकरीति सा ।
आरोहे मनिवर्जा स्यात् पांशा धैवतमूर्च्छना ।।

'सगीतपारिजाते'

धत्ते श्यामलकंचुकीं च गलके मुक्तावलीमंशुकम्,
शोणाभ वरकंकणानि करयोः पादद्वये नुपुरौ ।
चन्द्रास्या मदविह्वला सकरुणां भाषां भृशं भाषती,
चैषा रामगिरी दिनान्तसमये रामेण गीतं पुरा ।।

'रागमालायाम्'

देशवराडीरागः

अस्य लक्षणम्

आरब्धगमनमुद्रा, निद्राघूर्णायमाननयनयुगा ।
सुखशायिनि निजदयिते, देशवराडी भवेद् गौरी ।।

देशाख्यरागः

अस्य लक्षणम्

रितीव्रतरसंयुक्तो गतीव्रेणाऽपि संयुतः ।
धगवर्ज्योऽवरोहे स्याद् गान्धारस्वरमूर्च्छनः ।
तीव्रो यत्र निषादः स्याद् देशाख्यः स विराजते ।।

'संगीतपरिजाते'

अस्य ध्यानम्

पृथुलतरशरीरो मल्लविद्यासुदक्षः,
परमवलवरिष्ठो वाहुदण्डप्रचण्डः ।

अतिशयदृढकक्षो मूर्द्धचूडाविहीनः,
प्रचरति नृपशालामेषदेशाखरागः ।।

'संगीतकल्पद्रुमाङ्कुरे'

देशरागः

देशनामको रागो न वर्तते । देसस्यैव नामान्तरं प्रतिभाति ।

अस्य लक्षणम्

रागो देसः पंचमाशोर्यमात्यः,
संपूर्णोऽयं सोरटीतुल्य एव ।
किञ्चिद्रूद्वेदाच्चावरोहे रिवक्रो,
रात्रौ यामादुत्तरं गीयतेऽसौ ।

'रागकल्पद्रुमाङ्कुरे'

पांशशो ऋषभसंवादी, सोरटीतुल्यरूपकः ।
रिवक्रो देसरागश्च, द्वितीये प्रहरे निशि ।।

'रागचन्द्रिकायाम्'

सरी मपौ निधौ पश्च. पधौ पमौ गरी गसौ ।
सोरटीतुल्यरूपोऽसौ देसाख्यो त्र्यंशको निशि ।।

'अभिनवरागमञ्जर्याम्'

भैरवीरागः

अस्य लक्षणम्

आभान्त्यस्यां रिगमधनयः कोमला मोऽत्रवादी,
सः संवादी क्वचिदपि धगौ वादिसंवादिनौ च ।

प्रातर्गेया सुरुचिरतरा स्वैरिणी सर्वगम्या,
संपूर्णा सा जनयति सुखं भैरवी रागिणीयम् ॥

'रागकल्पद्रुमाङ्कुरे'

यत्र मध्यः स्वरो वादी संवादी षड्ज ईरितः ।
स्वैरिणी गीयते प्रातर्भैरवी सर्वकोमला

'रागचन्द्रिकायाम्'

निसौ गमौ पधौ निश्च सनीधपा मगौ रिसौ ।
संपूर्णा भैरवी प्रोक्ता: धैवतांशा प्रभातगा ॥

'अभिनवरागमञ्जर्याम्'

सरोवरस्थे स्फटिकस्य मण्डपे सरोरुहैः शङ्करमर्चयन्ती ।
तालप्रभेदा प्रतिपन्नगीता गौरीतनुर्नाम हि भैरवीयम् ॥